CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलापूर्णोदयः

अनुवादकः

विद्वान् [illegible]

Rtd. Sanskrit lecturer

आन्ध्रप्रदेशसाहित्यअकादमी संस्था

प्रकाशितः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलापूर्णोदयः

आन्ध्रकाव्यस्यानुवादः

□

अनुवदिता

शिरोमणिः सन्निधानं सूर्यनारायणशास्त्री

Rtd. Sanskrit lecturer

■

आन्ध्रप्रदेशसाहित्यएकाडेमी संस्थया

प्रकटितः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमावृत्तिः 1000

मूल्यम् : रु. 6 – 00

Printed at :
Sri Ajanta Art Printers.
KOLLUR Guntur Dt.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Introduction

'Kalapurnodaya' of Pingali Surana occupies a unique place in Telugu Prabandha literature. The theme of the kavya is original it is not borrowed from any source, as is the case with all the other existing Prabandhas. Surana is said to have introduced for the first time the Slesha kavya into Telugu literature, in his "Raghava Pandaviyam". In "Kalapurnodaya" he has made another departure from the tradition by attempting to invent a new story around many well known mythological characters. Mytho-poetic imagination is the uniqueness of this poem.

Though it is generally believed that the theme of this poem is entirely conceived by the poet's imagination, and least dependent on earlier literature, some scholars traced the theme to many earlier sources like Kadambari, Lingapuranam, Katha Saritsagara, Mahabharata, Prabodhachandrodayam, Ascharya Chudamani etc. Surana's greatness lies in co-ordinating all these influences and moulding them into one organic whole, using the tremendous power of his imagination and great poetical skill. The result is a poem of great freshness and beauty.

Though we are mainly concerned with the Sanskrit translation of the poem, in all matters of evaluation, it is necessary to trace the circumstances of its creation. The poem has been considered an allegory operating on three different levels - the philosophic, the erotic, and the historical.

The main literary merit of this poem is its plot, which is as original as it is complex. As Surana himself has pointed out, the technique of this narration is novel, the main Rasa is Sringara and the descriptions are about the worthy things of life

"అత్యపూర్వ వైచిత్రీ మహనీయంబును, శృంగార రస ప్రాయం

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

బును, బుణ్యవస్తు వర్ణనాకర్ణనీయంబగు కళాపూర్ణోదయంబను మహా
కావ్యంబును నిర్మింప గడంగితిని."

Surana fulfills this promise with remarkable success.

As in many western epics and novels, the narration begins "medeasres" and the story unfolds around the situations as effectively as in a modern novel. It portrays love through various situations centering round Chatuimukha and Saraswati.

The poem abounds in Rupakatisiyokti and the central character Chaturmukha himself indulges in the recurring uses of this figure This kind of figurative expression is called allegory in English. Kalapurnodaya, thus, is a fanciful poem like Spenser's "Fairie Queen" which is also an allegory.

Kalapurnodayam has remained for centuries the exclusive treasure of Andhras. It is now fortunate that Sri, Sannidhanam Suryanarayana Sastry, the welknown poet-critic from Andhra Pradesh should make it accessible to the non-Telugu speaking world through his Sanskrit version. Though a prose rendering of this work had appeared in Sanskrit a few years ago, the present verse translation is a welcome contribution.

Sri. Sastri is known in the other parts of the country as a Sanskrit poet. But his achievements as a sound rhetorician and grammarian are less krown except in his native state. His two monumental works in Telugu - Kavyalankara Sangraha and Tatsamachandrika-testify his scholarship. Is a personal indulgence is not mistaken, my first admiration for his was aroused when I happened to read the former work prescribed as a text book for the highest degree Telugu examination of Madras University About twenty five Teluge kavyas of different length written by him won hi m a place among the Telugu poets. The present work is a fusion of Sri. Sastri's abilities and experience as poet, rhetorician and grammarian. His translation proves conclusively that a

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

good translator should employ these various accomplishments in order that the spirit of the original may fully be conveyed.

Translations are generally looked down upon as being mechanical and unfaithful. But it is necessary to resort to a translation when we cannot reach the original. Moreover, there are translations which attain the same standard of excellence as the original. The present translation is one such.

This being a free translation Sri, Sastri has deleted many descriptions from the original and retained such detailed in his narration as are necessary to preserve its artistic - appeal and to the realisation of the Rasa. The Telugu original has eight cantos and 1850 verses. The poem has been divided by many critics into two sections - the first ending with the 192nd stanza which occurs in the sixth canto. The critics contend that the most interesting part of the story ends here and the rest is superfluous. This translator rendered the original into a compact and well knit piece of art by doing away with many of the unnecessary digressions which mostly occur in the latter part of the original

The Sanskrit translation has twelve cantos as against eight in the original and a total number of 1430 verses. The Telugu poets, unlike the Sanskrit poets, employ different metrical structures within a canto. Sri. Sastri followed the Telugu tradition in his narrative. He employed 28 different metres, some being rare even in old Sanskrit classics.

In order to achieve brevity this translator has done away with such digressions like Madhuralalasa's discourse on Yoga, the love story of Klaapoorna and Madhuralalasa before their marriage etc. The description of Kalapoorna's war expedition, which runs into 20 pages in the original, is condensed into a single sragdhara metre. I personally feel that the translator should have avoided the 12th canto altogether, as it is quite superfluous to the unity of the poem.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Sri. Sastri has fully exploited the quality of brevity inherent in the Sanskrit language. For instance, the stanzas like

सम्पत्समृद्धा दिविषत्पुरी सा प्रासादहस्तेन बलाद्गृहीत्वा
तदम्बरं पौरजनारवेण महोच्चकैराह्वयते जिगीषुः ॥
जलनिधिसलिलैर्नीलैः परीत एतत्पुरीसालः
परितस्तिमिरैः परिवृत इव लोकालोकशैल आभाति ॥

bring out the meaning contained in the two long quartrains of the original. Critics have observed that Sri. Sastri's style often approaches that of Kalidasa's mellifluous Vidarbhi style The following stanzas taken at random, from this work bear testimony to this fact.

दृष्ट्वोपयान्तं मुनिवर्यमारा दांदोलिकादन्तितुरङ्गमेभ्यः
ससम्भ्रमं केचिदधोऽवतीर्णा मूर्ध्ना प्रणामान् रचयांबभूवुः ॥
कांचित्कटाक्षेण निरीक्ष्य कांश्चि त्पश्यन् स्मितास्येन शुभाशिषा च
कांचित्समुद्धाप्य करेण कांश्चि दन्वग्रहीत्पाणियुगं स्पृशंश्च ॥

We are reminded at once of Kalidasa's famous sloka:-

कम्पेन मूर्ध्नश्शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन
आलोकमात्रेण सुरानशेषान् सम्भावयामास यथाप्रधानम् ॥

Besides adopting the impressive style, the right choice of metre and the effective handling of it Sri. Sastri also employs नृत्यत्प्रायत्व of the letters ably, as can be seen in

हसन्तु विकटं जना मुनिविटोऽय मित्युच्चकैः,
स्तपोधनमुपार्जितं सकलमाप्नुयान्नाशनम्
अपैतु चिरसंचितश्च मम तत्त्वबोधो वृथा
प्रियेऽसि तरुणीमिमामनुपभुज्य नैकं क्षणम् ॥

in which the letters vie with each other to suggest the 'come-what may mood' of Manikandhara.

Sri. Sastri's command over grammar is revealed in the use of such words as

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यजेष्ट, व्युद्यः कूलमुद्रुजा and some यङन्त and यङ्लुगन्त forms. His careful handling of the Samasa दृढाभक्तयः recalls the comment of Mallinatha on the verse दृढभक्तिरिति ज्येष्ठे in Raghuvamsa,

Traditionally, Narada has been treated as a stock character promoting ill - will and quarrels among people. The psychological implications of Narada's character as a means of externalising the basic human weaknesses has never been fully realised. Surana's treatment of Narada is subtly psyschological and is in accordance with the above view. The Sanskrit translation retains the entire spirit and charm of the quarrel between the two Rambhas only to prove the psychological intricacies in the character of Narada.

"त्वं पिधेहि मुख"मित्युदीरिते "त्वं पिधेहि मुख"मित्युदीरितम्
"माद्दपस्त्व"मिवि भाषिते पुन "मांद्दपस्त्व"मिति भाषितं पुनः ॥
"न त्वां मन्ये तृणाये"ति धिक्कृते चैकया क्रुधा
"न त्वां मन्ये तृणाये"ति धिक्कृतं चान्यया रुषा ॥
"हण्डेऽपेही"ति रसिते "हण्डेपेही"ति रासितम्
"उक्ते माविस्मरे"त्युक्तं भूयो "माविस्मरे"ति च ॥
"कियती त्व"मिति प्रोक्ते "कियती त्व"मितीरितम्
"पश्यामी"त्यब्रवीदेका "पश्यामी"त्याह चापरा ॥
"न युक्ता पत्युरन्यस्या अपेक्षे"त्येकयोदिते
"न युक्ता पत्युरन्यस्या अपेक्षेत्यन्ययोदितम् ॥

While Sanskrit has enriched the other Indian languages, these languages have contributed very little to Sanskrit in their turn. Translations of this kind will introduce the native expressions and idioms peculiar to that language into Sanskrit. A few instances may be cited from Sri. Sastri's translation.

1. नेत्रं पक्ष्मेव is the translation of the welknown expression కంటికి రెప్పవలె.
2. जिह्वाग्रवाचा इमाः is the translation for another Telugu expression నాలుక చివరి మాటలు.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

3. Similarly, the Telugu proverb అడబోయిన తీర్థమెదురైనది. is rendered into Sanskrit in यत्तीर्थं मनसि पिपासितं तदेवा यातं पुरः ।

Sri. Sastri being an Alankarika seems to have exploited the close relationship between the two Rasas, Sringara and Hasya in his translation, He made Kalapoorna parody the welknown Mantra सहनाववतु in the verse.

"सहना ववतु" सुभाषो महितः "सह नौ भुनक्तु" चुम्बनशतम्
अयि ! "सहवीर्यं करवावहै" स्मरणाङ्गणेषु चन्द्रमुखि ! ॥

in the hope that the मुग्धा नायिका Madhuralalasa might chuckle at these words, effecting greater intimacy between the two.

Sri Suryanarayana Sastry is to be thanked and congratulated for the indefatigable zeal with which he has been enriching the Sanskrit literature with his excellent Sanskrit works.

I am grateful to Sri Sastry for his affectionate attitude in asking me to write an introduction to his valuable work. I cannot express my admiration for Sri Sastri in any other way than to pray God to inspire him to contribute more and more to Sanskrit literature both by his original writings and translations like this,

The Andhra Pradesh Sahitya Akademi richly deserves credit for undertaking to publish Telugu Classics for the benifit of the Sansktit readers, The Akademi, in doing so, contributes to emmotional integration on the one hand and the reviving of Sanskrit language as a medium for creative expression on the other.

Department of Sanskrit
Osmania University,
Hyderabad
24 - 4 - 67

(Sd) *P. Sreeramachandrudu*
Vedanta Siromani, Vidwan,
M.A.(Sanskrit) M.A. (Hindi)
M.A.(English)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवतारिका

यत्रेतिवृत्तमुत्पाद्यं कलापूर्णोदयाभिधम्
काव्यं व्यरचि पिंगल्युपाह्वसूरन्नसूरिणा ॥

अनल्पकल्पनाकक्ष्या कवितासम्पदाऽपि च
इदमान्ध्रसरस्वत्याः किरीटति शिरस्तटे ॥

सृष्टं रम्भायुगलं नलकूबरयुगलमस्ति काव्येऽस्मिन्
प्रियजनकृतेऽत्र कलहस्तयोर्युगलयोर्विनोदयति नितराम् ॥

रम्भे द्वे नलकूबरं क्वचन वीक्ष्यैकं मिथः स्पर्धया
मद्भर्तेति पतिर्ममेति कुरुतो वाग्युद्धमुच्चैस्तराम्
अन्यत्रान्यतरां तयो "र्मम सती' मे श्रीमती"त्युद्धतौ
मुष्टीमुष्टि पदापदि व्यतिहतोऽन्योऽन्यं कुबेरात्मजौ ॥

षेक्स्पियर्कविवर्यस्य सूरार्यस्समकालिकः
कामेडी आफ् यरर्साख्यं प्रबन्धं स्मारयत्यदः ॥

आशीर्वचोऽपेक्षणीयं सर्वलोकैश्च कल्पितम्
शापरूपेण काव्येऽस्मिन् कविना प्रतिभावता ॥

आदेरन्तं गच्छति कथान्यकाव्येषु भाषायाम्
अन्तादादिं गच्छन्त्यस्मिंश्चित्रीयते चेतः ॥

जननी पुरुषो; जनको नारी काव्यस्य नायकस्याऽस्य
भवतीह रूपकातिशयोक्तिकृतं वर्णनं यथार्थकथा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुलीनस्य वरो यथा "भवतु मा गर्भस्सुगाश्च्या मम
प्रेयस्य" इति; "भर्तृसङ्गमफलं मे जायतां पुत्रकः"
इत्यन्यश्च वरोऽदसीययुवते, रेवं विरुद्धौ कृतौ
सिद्धौ चित्रमनेन सूरसुधिया काव्ये कविब्रह्मणा ॥

बालिका मासजाताऽऽइ लब्धसर्वज्ञताऽद्भुता:
स्वस्याश्चान्यजनानाञ्च भूतपूर्वकथा इह ॥

मणिहारे सूत्रं वा मणिहारः काव्य एतस्मिन्
आमूलाग्रं गच्छति शोभां पुष्णाति चतुरश्रान् ॥

अस्ति प्रकृत्या मधुरान्ध्रभाषा सुधामयी सूरसुधीन्द्रसूक्तिः
स्वादीयसी चित्रकथा त्रिवेणीसङ्गो यथा श्लाघितमान्ध्रकाव्यम् ॥

कृत्रिमरत्नं कल्पितकथेति विमुखे पुराणकविवर्गे
सूरकविः, कालस्य प्रतीपमभिगत्य कीर्तिपात्रमभूत् ॥

कन्याल कृष्णराजाख्यभूपतेरङ्कितं कृतम्
अनेन कविचन्द्रेण काव्यमेतद्रसोज्ज्वलम् ॥

आन्ध्रेतरे यथा विद्युः प्रतिभां अन्ध्रसत्कवेः
आंग्ल्या अनूदितमिदं सुरवाचा सुधामुचा ॥

अन्येभ्यश्चान्ध्रकाव्येभ्यः काव्यमेतद्विशिष्यते
कोऽप्यपूर्वस्सन्निवेशो जागर्त्यत्र यदृच्छया ॥

कर्ता सूरसुधीर्महत्यजनि सूर्याराधकानां कुले
संशोध्याकृत शुद्धकाव्यममुकं श्रीसूर्यनारायणः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मल्लाद्यन्वयजः, पिठापुरपतिः प्राकाशयत्सूर्यरा
योर्वीशोऽन्ववदत्कृतिं सुरगिरा तां सूर्यनारायणः ॥

संबद्धं बहुसूर्यैः काव्यमिदं येन पठितेऽस्मिन्
संफुल्लो भवतितरां सहृदयहृदयारविंदसन्दोहः ॥

सर्वेषां सन्निधानस्थाः कुलवृद्धाः प्रियङ्कराः
ख्यातो वंशः कवेरस्य सन्निधानोपनामकः ॥

कवितायां शब्दशास्त्रे साहित्ये यस्य देशिकः
श्रीमान् वेलूरिवंशीयश्शिवरामसुधीमणिः ॥

ग्रन्थं तत्समचन्द्रिकाख्यमनिदंपूर्वं मथित्वाऽसकौ
पाणिन्यागममांध्रवाच्यररचज्जेगीय्यमानं बुधैः
काव्यालंकृतिसंग्रहाख्यमपरं साहित्यमीमांसकम्
व्याख्यायांध्रसरस्वतीचरणयोर्भक्त्या महत्याऽऽर्पिपत् ॥

काव्यानि पञ्चविंशतिमान्ध्र्यां पञ्चदश ♦ गैर्वाण्याम्
विरचय्यैष यशोधनमलभत नैव धनमन्यपुरुषार्थम् ॥

सुमहद्भ्यो वर्णनेभ्यो गृहीत्वा सारवन्त्यसौ
यथा कादम्बरीं पद्ये क्षेमेन्द्रोऽरचयत्कविः ॥

♦ 1. पूर्णपात्रम्; 2. विप्रवीरम्; 3. कीरसन्देशम्, 4. मधुकोशः, 5 विवेकानन्दम्, 6. रामदासम्; 7. कचदेवयानीयम् 8. संयुक्तास्वयंवरम्, 9. भर्तृदानम्, 10. नन्दचरितम्, 11. आन्ध्रदेश्यहास्यकथाः, 12. प्रवरवरूथिनीयम्. 13. भर्तृहरिचरितम्, 14. कबीरचरितम्, गीतावलिश्च, 15. कलापूर्णोदयः.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संस्कृतीकृत्यान्ध्रकाव्याल्लोकोक्ती रसबन्धुराः
प्रायूयुजद्यथाविद्युरन्ये तद्रमणीयताम् ॥

आसर्गं श्रितमेकमेव कविभिर्वृत्तं पुराणैः कृति
श्वेतस्मै कवये न रोचत इदं, गान्धर्वविद्याचणः
नैकं गायति रागमान्त, मथ रागालापगीतादिकम्
नाना गायति; येन नन्दति सभा; काव्येऽपि पन्था अयम् ॥

जात्यन्धा गुणदर्शने, शतसहस्राक्षाश्च संशोधने
दोषाणां, बुधमानिनः सहृदयंमन्याः पुरोभागिनः
* गोष्ठश्वा विमृशन्ति ये कविकृतीः कर्तुं न शक्ताः स्वयम्,
तान् संप्रीणयितुं नहि प्रभवति ब्रह्माऽपि तेभ्यो नमः ॥

व्यरूप्यन्त मुसल्मानै र्देवता प्रतिमा यथा
सत्काव्यानीह दूष्यन्ते दुर्विदग्धैर्विमर्शकैः ॥

काव्ये प्रशंस्यः प्रथमं गुणौघस्ततः प्रदर्श्यं कृतिदोषजातम्
गुणानपह्नुत्य विशोध्य ♦ दोषप्रति प्रचारस्त्वतिगर्हणीयः ॥

न हन्ति शोभां गुणवत्तरस्य काव्यस्य यः कश्चन दोषलेशः
कलानिधेश्चन्द्रमसः कलङ्को ज्योत्स्नां न किंचिन्मलिनीकरोति ॥

"कुचाभावः कुरङ्गाक्ष्याः काव्याभावो विपश्चितः"
इति सूक्तिर्व्यनक्तीदं श्लाघ्यते कविपण्डितः ॥

★ Applied figuratively to a slanderous person who stays idly at home and slanders his neighbours. (Apte's Sanskrit-English dictionary)

♦ दोषप्रति=दोषलेशः यथा शाकप्रति। सुप्प्रतिनामात्रार्थेइति सूत्रेण

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विज्ञप्तिः

आंध्रकलापूर्णोदयकाव्यकर्ता पिंगलि सूरनार्यो विजयनगराधीश्वरस्य श्रीकृष्णदेवरायस्यास्थानकवि ष्वष्टदिग्गजनाम्ना प्रथितेष्वन्यतम इति प्रथा। आंध्रकविष्वय मग्रश्रेणी मलंकरोति। अस्य कविताशैली लोकोक्तिभूयिष्ठा, भाषीयबहुला, मधुराच। अनेन कविचन्द्रेण रचिता न्यद्योपलभ्यमानानि त्रीणि काव्यानि। १) राघवपांडवीयम्; २) प्रभावतीप्रद्युम्नम्, ३) कलापूर्णोदयः। एषु त्रिषु कलापूर्णोदय उत्पाद्यप्रबन्धः।

एकैकस्या भाषायाः प्रकृत्या काप्यनिर्वचनीया शोभा वरीवर्ति। देशे देशे भिन्ना लोकोक्तयः, भिन्नानि भाषीयाणि (idioms) भिन्नानि च छन्दांसि यानि काव्यशोभां पुष्णन्ति। सा विकृतेऽनुवादे लुप्तभूयिष्ठा भवति। प्रकृतिभूतकाव्यरसः न कणेहत्यानुवादकाव्ये स्वाद्यते। आंग्लीकृतसंस्कृतनाटकादिष्विदं स्फुटं गोचरीभवत्येव। प्राहुः किल "अनूदितम् यत्तु काव्यं कृत्रिमं दत्तपुत्रवत्" इति।

यथा भारतीयेतरै रांग्लानुवादद्वारा संस्कृतकाव्यरसः स्वाद्यते तथांध्रेतरै रान्ध्रकाव्यरसास्वादः क्रियता मिति धिया संस्कृतीकृत मांध्रकाव्यम्।

षोडशोत्तरशताधिकसहस्ररूप्यक (1116) पुरस्कारपुरस्सरं मम काव्य मांध्रप्रदेश साहित्य-एकाडमीद्वारा प्रकटीकृत्य मम श्रमस्य सफलयितृभ्यः; तत्संस्थाया अध्यक्षेभ्यः, उत्तरप्रदेश राष्ट्रपालेभ्यः, साहित्यबन्धुभ्यः, श्रीमद्भ्यो बेजवाड गोपालरेड्डि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महोदयेभ्यः, कार्यदर्शिभ्यो श्रीमद्भ्यो देवुलपल्लि रामानुजरायेभ्यः अस्य ग्रन्थस्य पीठिकाकर्तृभ्यो मम सुहृत्तमेभ्यः, स्वसंस्कृतांध्रभाषा कविवरेभ्यो, वेदांतशिरोमणि - विद्वान्, M.A. (Telugu) M.A. (Sanskrit) M.A. (Hindi) बिरुदभाग्भ्यश्श्रीमद्भ्यः पुल्लेल रामचन्द्रेभ्यश्च कृतज्ञताबद्धाञ्जलयस्समर्प्यन्ते ।

इति

बुधविधेयः

— ग्रन्थकर्ता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीपरदेवतायै

कलापूर्णोदयः

अथ प्रथमस्सर्गः

— ० —

संपदामाकरो विद्यालतानां चालवालकः
केलिकामन्दिरं शौरेरस्ति द्वारावतीपुरम् ॥

शार्दूलविक्रीडितम्

आरूढाऽङ्कतलं तरंगकरसंस्पर्शैः पयोराशिना
गाढप्रीत्युपलालिताऽस्ति नगरीलक्ष्मीस्समुल्लासिनी ।
प्राप्तप्रौढवयोभरामपि सुतामंके निषण्णां पितुः
शङ्कन्ते न जना मनागितरथा ये पुत्रिकावत्सलाः ॥

संपत्समृद्धा दिविषत्पुरीं सा प्रासादहस्तेन बलाद् गृहीत्वा
तदम्बरं पौरजनारवेण महोच्चकैराह्वयते जिगीषुः ॥

जलनिधिसलिलैर्नीलैः परीत एतत्पुरीसालः
परितस्तिमिरैः परिवृत इव लोकालोकशैल आभाति ॥

स्तम्भा दिशासु चतसृषु रैवतकाद्या महीधरा, गगनम्
हर्म्यमणिद्युतिचित्रित मिदं सभामण्टपं पुरीलक्ष्म्याः ॥

बहुना किं ? मत्र षोडशसहस्रदारैश्च निर्विशति केलीः
शौरिः श्वेतद्वीपे कदाश्नुतैतादृशान् महाभोगान् ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धर्मिष्ठाः कर्मिष्ठा विद्वच्छ्रेष्ठाश्च भागवताः
तत्रत्याः सर्वेऽपि च; न शक्य मेषां विशिष्य परिगणनम् ॥

कलभाषिणीत्यनर्घ्यं कल्याख्यं नटस्य कस्याऽपि
अस्त्यस्यां पुरि यौवनविलासलावण्यसंपदां सदनम् ॥

शार्दूलविक्रीडितम्

वेणी यावदगुम्भिताऽलकचयैर्यावन्नपूगीसमौ
वक्षोजौ न नितम्बमाप गुरुतामीषच्च यावद्धिटान् ।
पश्चात्सत्वरयांचकार बहुशः पक्वेतरं तत्फलम्
भोक्तुं हन्त ! कियन्नु घूर्णयति तान् भोगोचिते यौवने ॥

मन्दाक्रांता

"स्पृष्टे गण्डे मुकुररुचिरे वक्त्रबिंबं वलन्ती
संकोचन्ती स्तनमुकुलयोः कोमलस्पर्शनै र्नः ।
व्रीडामन्दीकृतसुमशरा भीतभीता कदाऽ स्यान्
"प्रीणात्येषे" त्युदितकुतुकाः पल्लवास्तां विलोक्य ॥

युवते र्यौवन मस्या अनुक्षणं नूतनूतमुल्लसति
यूनां दृगुत्स वं संदधत्प्रफुल्लकुसुममिव भृङ्गाणाम् ॥

सीमा लावण्यस्य, नवं वयो, जन्मना च वारवधूः
न स्तोतुं शक्यं बत ! सौंदर्यविलासविभ्रमा स्तस्याः ॥

मनोज्ञवस्त्राभरणोज्ज्वलांगी रंभा द्वितीयेव विभासमाना
शतैः सखीनामनुगम्यमाना कदाचि देषोपवनं जगाम ॥

"सुमेरुवृक्षो निकटाद्व्रजन्त्या जग्राह वक्षोजपटं तरुण्याः
प्रेक्षस्व! साथ पुरुषाह्वयोऽयं स्वीयाभिधानं कुरुतेऽत्र चेटि ! ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलहायेते इव किल लिकुचौ च कुचौ सरोजवदनायाः
तन्नूपुरकोलाहलचकिताः कीरा रुवन्ति यत्र ॥

मन्दानिलेन शाखां प्रसार्य पुरतः कुरंटको वृक्षः
त्वा माश्लेष्टुमना स्सखि ! न ददासि कुत स्त्वमाश्लेषम्? ”

कलभाषिणी च सख्य इत्येवंविधमधुरसरससल्लापान्
स्मितवदनास्साकूतं कुर्वत्यो बहु विहृत्य वनमभितः ॥

अन्योऽन्यमपहसंत्यः कञ्चित्कालमपचित्य कुसुमानि
अङ्गमलंकृत्य च ताः प्राक्रंसत डोलिकाक्रीडाम् ॥

श्रीकृष्णसेवापरतन्त्रचित्तो विरिंचिपुत्रो मणिकन्धरेण
शिष्येण संगीतकलार्थिनाऽटन् यातिस्म तत्केलिवनोपरिष्टात् ॥

मणिकन्धरस्तदा तत्रावेक्ष्य दृशोः प्रियङ्करं दृश्यम्
युवतीनां; मुदितात्मा प्राहस्माब्जासनात्मजं स्वगुरुम् ॥

मन्दाक्रांता

“स्पर्धालूनां ललितलतिकाडोलिकाकेलिकायाम्
स्त्रीणां पादान् वियदभिमुखं सारितान् लक्तकांकान् ।
देवेक्षेथा ! त्रिदशतरुणीराह्वयन्ते विवादा
येत्याशंके नरयुवतयो रूपलावण्यसीमाः ॥”

शार्दूलविक्रीडितम्

श्रुत्वैतन्मुनिराह “सत्कविरसि त्वं; तथ्यमुक्तं त्वया,
नाद्राक्षं निरवद्य; मदद्भुतकरं लावण्यमेतादृशम् ।
प्रेंखोलप्रसृतैः स्वकीयचरणै रत्र स्थितम् यौवतम्
स्वःस्त्रीणामभिहन्ति शीर्षमितिव प्रोक्तेऽपि युज्येत तत् ॥”

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदैव रंभा नलकूबरेण प्रियेण मेघांतरितेन यांती
विमानयानेन निशम्य वाचो मुनेरिमा व्याकुलमानसाऽभूत् ॥

कथमपि विदिता नारद एष इति हृदयविकारमल्पमपि
वदनेऽप्रकाशयन्ती नलकूबरमाह 'भोः ! श्रुतं भवता ?'

कलहाशनेन भाव्य संदृश्यैनं निषेव्य गच्छाव
दोषाय पूज्यपूजाव्यतिक्रमणमिति वदन्त्यार्याः "॥

निशम्य रंभावचनानि मौनी "कुतोऽयमालाप इवे"ति यावत्
दिशो व्यलोकिष्ट विमान मब्दमुक्तं रवेर्बिम्बमिवैक्षि तेन ॥

नलकूबरश्च रम्भा चात्मीयविमानमस्य देवमुनेः
चरणयुगस्याधस्तात्संचार्य शनैस्तमुपसृत्य ॥

प्रण्यपद्य द्वन्द्वमेतन्नारदाय महर्षये
पादौ संस्पर्श्य मूर्धानौ सुगन्धी पारिजातकः ॥

प्रायूयुजन्मौनिचन्द्र एतयोराशिषं यथा
"संपद्यतां स्नेहबन्धो युवयो रश्लथस्सदा" ॥

तदाह रम्भा कृतकस्मितेन यथा "महर्षे ! भवदाशिषा नु
स्निग्धो मयि स्यादय; मन्यथा स्यन्मुग्धो विलासैर्नरसुन्दरीणाम् ॥

विकटोक्त्या रम्भायाः शङ्कितमतिराह नारदर्षिरमूम्
"वीणेव वितन्त्रीस्त्वं विकृतालापासि; को हेतुः ?"

शार्दूलविक्रीडितम्

पृष्टा प्रत्यवद "न्मुनीश्वर ! न चेत्कालातिपातो भव
द्यात्राया अधिरोढुमर्हति भवान् दिव्यं विमानं मम ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुर्वंत्या भवतः पदांबुरुहयोस्सेवां मया प्रेयसा
साकन्ते विनिवेद्यतेऽनुसरणं भाग्यं किल त्वादृशाम् ॥

विमानमारूढममुं सशिष्यं विरिंचिपुत्रं वरिवस्यतः स्म
पार्श्वस्थितौ चामरदण्डहस्तौ सभक्ति रम्भानलकूबरौ तौ ॥

वंशस्थम्

विवर्णमास्यं दधती सुराङ्गना स्मितं वहन्ती कृतकञ्च स्वर्वणोः
उवाच "मौनींद्र ! पुनश्च डोलिकाविहारिणीनां पठतु स्तुतिं कृताम् ॥

इति पृष्टो रम्भयाऽसौ मर्मज्ञो मुनिशेखरः
मन्दहासालंकृतास्यः स्तत्पद्यमपठीत्पुनः ॥

शार्दूलविक्रीडितम्

– – – – – "सत्कविरसि त्वं तथ्यमुक्तं त्वया
नाद्राक्षं निरवद्यमद्भुतकरं लावण्यमेतादृशम् ।
प्रेङ्खोल्प्रसृतैः स्वकीयचरणैरत्रस्थितं यौवतम्
स्वःस्त्रीणामभिहन्ति शीर्षमिति च प्रोक्तेऽपि युज्येत तत्" ॥

एवमुक्तं मया रम्भे ! मन्यसे चेत्त्वमन्यथा
ऋजूतया ! ब्रूहि ! चित्तस्थं कुत एतन्निगृहसे ? ॥

उदितैवं मुदिता सा प्राहात्भवांस्त्रिलोकसंपूज्यः
कः प्रभवति लोकेऽस्मिन् स्तुवतो वा निंदतो वा ते ? ॥

शार्दूलविक्रीडितम्

वैशिष्ट्यं नरसुन्दरीषु भवता कीदृक्समालोकितम् !
उत्प्रेक्षातिशयोत्तयलंकृतिपरैर्भाव्यं वचोभिस्तव ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नास्त्यन्या भुवनत्रयेऽपि सदृशी लावण्यमूर्तिर्ममे
त्यत्रायं सुभगो धनेशतनयः साक्षी समक्षे स्थितः" ॥

मन्दाक्रान्ता

आकर्ण्येदं त्रिदशतरुणीभाषितं मौनिचन्द्रः
प्राहस्सामूं समुचितमिदं ते वचस्सुन्दरांगि! ।
यत्ते प्रेयान् सुखयति वशस्त्वां विमुग्धस्तथापि
नैवं कालो व्रजति तव च स्याद्भविष्ये सपत्नी ॥

त्वादृशी सुन्दरी काचित्कश्च नेदृशसुन्दरः
स्यातां हृदिस्पृशेतां वां नोचितो गर्व ईदृशः ॥

वंशस्थम्

वचस्तदाकर्ण्य सुराङ्गनाऽह "भो मुनीश्वरेदृग्वचनाद्विरम्यताम्
क्षमस्व मां हास्यमयञ्च ते वचः सहे न; सत्यं नु भवेदिति व्यथे ॥

वंशस्थम्

इति प्रणत्यास्य मुनेरनुज्ञया विमानमारात्कलभाषिणीवनात्
वतार्य चामन्त्र्य ययौ प्रियेण सा प्रणम्य दूराद्धरिदिव्यमन्दिरम् ॥

आकर्णयन्ती कलभाषिणी तत्सल्लापमाकाशपथे विमाने
आसन्न आलोक्य मनोज्ञमूर्तिं भूमावतृप्ताऽन्वसरद्दिदृक्षुः ॥

याते विमाने नयने व्यतीत्य दूरं हताशा न्यवृतद्वधूटी
पुनःपुनस्तं हृदि चिंतयन्ती मुहुर्मुहुस्तां दिशमीक्षमाणा ॥

शिखरिणी

अभूदस्याश्चित्ते स्मरमपरमेवं प्रियतमम्
वशीकृत्यात्यन्तं हृपितमतिरेषा भवति का !

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञनिर्धन्यैतस्याः कियदकृत भोः प्राक्तनजनु
ष्यसौ पुण्यं? कोऽयं नयनहृदयानन्दकृ" दिति ॥

संस्मृत्य प्राह स्वां " घनेशतनयो निर्जेश" इत्युक्तम्
अमुया कथाप्रसंगे रंभानलकूबरौ भवेतां तौ " ॥

इति पुरतः प्रेक्ष्या " यं प्रष्टव्योऽभिमुखमागच्छन्
मुनिवरः एष स एव हि सिषेविपुर्यो हरिं समायाति" ॥

विचिंतयन्ती कलभाषिणीत्थं शनैरुपेत्यात्मनि संविधाना
तं नारदर्षिं प्रणिपत्य मूर्ध्ना सप्रश्रयं सांजलिरेवमूचे ॥

"भगवन्! प्रष्टव्यस्त्वं "तौ कौ यौ गच्छतो विमानेन
विचिकित्सते मनो मे रंभानलकूबरौ भवेतान्वि" ति ॥

शार्दूलविक्रीडितम्

"आ" मित्याह मुनिः "कथंनु विदिता भद्रे! त्वा" मित्यङ्गना
सा प्रत्याह "मया विमानमनुसृत्याधो व्रजंत्या श्रुतः
सल्लापो युवयोः रबोधि च तदीयोऽर्थ, स्त्वयाऽसौ कृत
न्यक्कारा रमणी स्वरूपविभवोत्सेकांधचेता" इति ॥

वंशस्थम्

ततो बभाषे स यति "रसहेत को? वचांसि लिप्तानि मदेन सुन्दरि!
नयुज्यतेऽल्पाप्यतिलोकमानिता महत्तरस्यापिच या निपातयेत् ॥

वीक्षस्वाद्य श्वोवा रंभा प्रतिरंभयाऽभिमृष्टा स्यात्
विपरीतं स्याद्भाग्यं प्रकृतिर्ह्यत्युच्छ्रयस्य विनिपातः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्यत्रान्वेष्टव्या ? किं प्रतिरंभा ? बलीयसा विधिना
प्रतिरंभया भवत्या भवितव्यं, सौभगेन नास्त्वरा ॥

वियोगिनी

उदिता कलभाषिणी यतिं पुनराहार्य ! विधेश्च तद्बलम्
लभतेऽनघरूपवैभवा तरुणी तादृक् गृहं कथं लभे ?' ॥

एवं वदन्तीं मुनिरब्रवीत्तां रंभेति मात्रा कियती पुरस्ते ?
तदस्तु, दृष्टेव पुरात्र सौधे शौरे, स्त्वमागा हरिसेवनाय ? ॥

इति पृष्टाऽवोचत सा "मुनींद्र ! हरिसेवनपराऽहम्
गच्छन्त्यासेऽद्राक्ष तत्रात्रभवन्तमस्मार्षम्" । ॥

शार्दूलविक्रीडितम्

इत्युक्तो मुनिराह, "तेऽस्मरमहं भद्र! कदाचित्पुरा
मच्छिष्ये मणिकन्धरे स्तुतवति श्रीदेवदेवं हरिम्
द्राघिष्ठोर्जितदण्डकेन सकृदेवाकर्ण्य सर्वञ्च तं
निर्दोषं न्यपठः पुरो भगवतः संश्लाघिताचाऽभवः ॥

कलभाषिण्याख्या त्वं किमस्ति वा दण्डकस्स ते स्मृत्याम्?
इत्युक्तास्तीत्युक्त्वाऽदिष्टा मधुरस्वरेण तं न्यपठत् ॥

* दण्डकः

1. कमलनयन ! मासतीकामिताकार ! कारुण्यधाराप्रपूर ! द्युति स्तोमधिक्कारितानन्तमार्तांडतेजो ! निगायन्त ! कुक्षिस्थलोक ! प्रचण्डप्रभाव ! प्रभो! ॥

---

* (दंडकोऽयं संग्रामनामकः । ईदृशो मालतीमाधवे पञ्चमांके (23) दृश्यते ।)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

2. कविवरद ! सुरेश ! सर्वश्च धाता च ते दिव्यचारित्रमातं न शक्तावभिष्टोतुमित्युच्यते, तर्ह्यहं भोः ! कियान् ! मृष्यतां मामकं चापलं माधव ! ॥

3. जननरहित ! भोस्सदानन्द गोविन्द ! हन्नपर्व कुर्वन् प्रदत्से बृहत्सम्मदं त्वं, ततोऽचिन्तया ते वचोऽगोचरत्वं मनोऽगोचरत्वं च जाने नहि श्रीपते ! ॥

4. दनुजदमन ! तावकानुग्रहप्राप्तये केऽपि सम्पाद्य शांतिं च दांतिं च हित्वैहिकं भोगमारण्यवृत्तिं श्रयन्ते, विना क्लेशभारं तवानुग्रहः प्राप्यते माहशैः ! ॥

5. मुरहर ! भगवन् ! मदीये दृशौ कीदृशं चक्रतुः पुण्य ! मेतादृशं प्रापतुर्भाग्यमंऽहोपहर्तस्तवाव्याजकारुण्यपात्रीकृतोऽहं, न मेऽस्त्यन्य कांक्षा हरे ! ॥

6. दिविषदधिप ! पण्डितैस्सर्ववेदाश्च यागाश्च योगाश्च दानानि नैकानि ते दासदासानुदासांघ्रिसेवामहत्त्वे न कोटयंशमर्हन्ति चेत्युच्यते केशव ! ॥

7. जलधिशयन ! देव ! गोवर्धनः प्रोत्थितो बालकेन त्वया रक्षितुं धेनुबृन्दं व्रजस्थान् जनांश्चामरेन्द्रस्य पाषाणवर्षेण सम्पीडितान् लीलयैवादरात् ॥

8. परमपुरुष ! सोमको मारितो, मन्दरः प्रोत्थितो; धारिणी प्रोद्धृता राक्षसो दारितश्चक्रवर्ती बली वञ्चितो रावणो हिंसितः पूतना कंसमुख्या हताः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निपठ्य सारूयद्धवरीयशिष्यं प्रशंसता श्रीहरिणोपहारः
कृतो मणीहार इति स्मरामि तेनास्य भाव्यं गलभूषितेन ॥

पदानि सन्धाय मिथो हितानि काव्ये रसानामनुकूलरीतीः
गुणानलङ्कारगणांस्तदर्हान् बध्नन् कवीन्द्रो न महीयते कैः ? ॥

स्रग्धरा

ज्योत्स्नायाश्शीतलाया यदि सुरभिलता, शैत्यसौरभ्यभाजाम्
कर्पूराणां मृदुत्वं यदि च, मधुरिमा विद्यते चेन्निशाढ्यम् ।
वातानां चन्दनाद्रेर्मसृणमृदुलता शैत्यसौरभ्यभाजा
मर्हन्त्याख्यातुमेते सदृश इति कवेरस्य काव्यस्य वाग्भिः ॥

वंशस्थम्

भवादृशानां पदसन्निधिस्थितिः प्रकल्पते शोभनलब्धये, ततः
मनो मदीयं भगवन् ! महामुने ! त्वदीयवीणावहनक्रियोत्सुकम् ॥

वसन्ततिलका

द्वारे विसृज्य मणिकन्धरमेककस्त्वम्
वीणां वहन् हरिसभाभवनाय गच्छन्
दृष्टो मया सुबहुशश्च, विपञ्चिकां ते
स्कन्धेन बोढु महमस्पृहयं तदात्वे ॥

तावन्मात्रीं सेवां कर्तुं मां किंकरीं भवतः
अनुजानीहेत्युक्तस्तथेति सममंस्त हृदयमर्मज्ञः ॥

तेन प्रहृष्टा कलभाषिणी सा सिध्येत्स्ववांछा च भविष्यतीति
"सूचीप्रवेशो मुसलप्रवेश" इत्यार्यसूक्तिं हृदि संदधाना ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततो जिज्ञासया किंचित्पश्यन्त्यां युवतौ मुनिम्
रहस्यशङ्कया दूरं ययौ शिष्यो यदाह सा ॥

"भगवन् ! अवतार्य त्वां वने मदीये विमान मात्मीयम्
भवदपचारभिया तौ किंचिन्नीचैरचीचरताम् ॥

नलकूबरं दिदृक्ष्वा मयानुगन्त्र्या विमानमधो
आकर्णितस्तदीयः सल्लापः कौतुकावहः कोऽपि ॥

तदाह रम्भां नलकूबरोऽसौ "कथांतरायोऽजनि मौनिहेतोः
शिष्टां कलापूर्णकथां समाद्य प्रिये ! समाचक्ष्व ! शृणोमि तावत्" ।

शार्दूलविक्रीडितम्

रम्भाऽब्रूत "कथा न साऽत्र भवते कथ्या मये"त्यब्रवम्
प्रागेव प्रिय ! यस्त्वया श्रुतकथाभागोऽप्रकाश्योऽपि सः
प्राणैस्संप्रति ते शपेऽर्हमिति, भोः कोऽसौ कलापूर्ण इ
त्युक्तानुक्तकथा च केति भगवन् ! जिज्ञासते मे मनः ॥

इति पृष्टो मौनिचन्द्रो विस्मितः केति सा कथा
प्रणिधाय क्षणं जज्ञौ कालत्रयकथाः स्फुटम् ॥

ततस्तामाह "भद्रे ! सा कथाऽकथ्या मयाऽपि ते
या रम्भा स्वप्रियायापि नवाच्येत्यब्रवी" दिति ॥

चचक्षे सा ततो "देव ! मास्त्वकथ्यकथांशकः
कस्मिन् प्रकरणे रम्भा साऽस्पृशत्तां कथा ? मिति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वंशस्थम्

स आह "रम्भानलकूबराविभावनङ्गकेलीनिरतावनारतम्
रतेस्समुद्दीपनकारणानि तन्मिथो यदृच्छास्मितभाषितादयः ॥

न तत्साधारणं प्रेम कयोश्चित्कुलचिद्भवेत्
रम्भाऽदर्शत्प्रातरद्य रविं शुभ्राभ्ररेखया ॥

दृष्ट्वा सितास्याऽभ्यवर्णदेनं सरस्वतीश्लिष्टसरोजगर्भम्
येन प्रहृष्टो नलकूबरोऽसौ बिंबाधरेऽस्या अकृत क्षतं द्राक् ॥

क्षतेन तस्या गलसीम्नि कश्चिच्छब्दोऽतिहृद्यो मधुरः प्रभूतः
अभूतपूर्वाश्रुतपूर्वमेनमाकर्ण्य मुग्धो नलकूबरोऽभूत् ॥

पुनःपुनस्तां स ययाच कर्तु "महो ! अहो ! बाढमिति स्तुवानः
अपूर्वमत्यद्भुत; मेकवार, मलं पुनश्चे"त्युपलालयंश्च ।

अभ्यर्थितैवं बहुधा "न शक्यं न शक्यमेत, न्नन"चेति साह
"जहामि नत्वां नजहामि"चेति सोऽप्याह; वाक्केलिरभूत्तदैवम् ॥

मालिनी

कथमपि कमलाक्षी प्रीणयामास क्रांतम्
मधुरमणितरावं कुर्वती स्वल्पशस्तम् ।
हृषितहृदय आह "प्राङ्मया न श्रुतोऽसौ
समजनि कथमद्ये', त्युत्सुकस्तां मुहुश्च ॥

मन्दाक्रांता

प्रत्यूचे सा "मणितमिदमभ्यस्तपूर्वं मया; किं
त्वेतद्गुह्यं निभृतमवधानैकमत्याद्ययावत्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्य प्रातस्तरणिसहितान्छाभ्ररेखां मनोज्ञाम्
पश्यन्त्या मे स्मृतिगत, मभूदुद्धतं चेष्टितैस्ते ॥

पृष्टा च सा तेन "कुतोऽद्ययावद्
गुप्तं त्वये" त्याह वधूः "प्रकाशा
भवेत्कलापूर्णकथे"ति; पृच्छेः
का हानिरस्मा" दिति चेच्छृणु ! त्वम् ॥

वक्ता, कथाकर्णयिता च धात्र्यां जातस्समृद्धो धनपुत्रपौत्रैः
अनन्तभोगानधिगच्छतीति फलश्रुतिस्तत्कथकैस्तथोक्ता ॥

विद्योगिनी

कथिता यदि सा कथा मया परिभोगाय तदुच्च संपदाम्
प्रभवेयमहं क्षितौ सहे कथमेतां त्वदसंगदुर्गतिम् ॥

यदि ब्रवीषि श्रुतवत्यथेतः पुरैव नापैति फलश्रुतिस्त्वाम्
कथंन्वि "तीदं फलमाह वक्ता श्रुतेः कथयतस्समनन्तरं माम् ॥

स सिद्धवाक्कथावक्ता फलश्रुतिभिया ततः
कथां श्रावयितुं नापि श्रोतुं वा शक्यते मया" ॥

कथयांचकार रम्भा स्वप्रियमेवं; बिभेमि रम्भेव
वक्तुं, तथापि सर्पति दिशः कथेयं स्वयंकृतैर्मार्गैः ॥

वंशस्थम्

तदस्तु; रम्भा नलकूबरद्वये
मिथो ब्रुवत्येवमवातरत्तयोः ।
विमानमस्मान् निकषा, ततोऽभव
न्मनोज्ञडोलाविहरद्वधूकथा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलभाषिणीं मुनीश्वर इत्थं प्रोच्य मणिकन्धरेण सह भगवत्सेवासमयो मातिक्राम्येदिति लघुगतिरगमत् ॥

कलभाषिणी च तं यतिमामन्त्र्य सखीभिरनुगता स्वगृहान् गत्वा कृतनेपथ्या जगाम भगवत्सभासदनम् ॥

॥ इति प्रथमस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ द्वितीयस्सर्गः

कलभाषिणीं विहाय व्रजतः श्रीकृष्णमन्दिरं तस्य
स्फुरितानि मुनींद्रस्य स्वांते रम्भावचांसि दत्तानि ॥

शार्दूलविक्रीडितम्

प्राह स्वं स यथा "ऽधुना मम मनोभारोऽपयातोऽल्पशो
दत्ताया निजसौभगेन दिविषत्कान्तालला(ञ्छ)नः कृतः
सापत्न्यस्य मयांकुरार्पणविधिः; स्वांतेन यत्कांक्षितम्
सिद्धप्राय; मियं वधूर्भवितुमर्हास्ति प्रतिद्वन्द्विनी ॥

भुजङ्गप्रयातम्

असूयाप्यमुष्या मनस्यस्ति तस्या
इति द्योततेऽस्याः कथयाः प्रसङ्गात् ।
उदासस्य वैराण्यनुप्त्वा नराणाम्
मनस्स्वेति कालः कथं मेऽतिदीर्घः" ॥

चिंतयन्नारदश्चेतस्येवं समणिकन्धरः
द्वारावतीपुरीरथ्यां यातिस्म जनसंकुलाम् ॥

स्रग्धरा

"दूरादेवावतीर्णः क्षितितलमयमायाति कोवाऽस्य हेतु ?
रन्विष्यत्यर्हवर्गो किमु जननिवहे वैरबीजानि वप्तुम् ?
ऐच्छत्कर्तुं कृतार्थान् पवनविचलितैः पांसुभिः पादयोर्नॄन् ?
मार्गेणाकारि कीदृक्सुकृत ! मिति फलं किं भवेदस्य ? चेति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वंशस्थम्

विचिंतयद्भिर्विदितैः पुराजनैः कृताभिवादः पुर ऊर्ध्वबाहुभिः
समीपगैर्भूपतितैर्नमस्कृतो मुनीश्वरोऽसौ व्रजतिस्म नारदः ॥

दृष्ट्वोपयान्तं मुनिवर्यमाराद्दोलिकादन्तितुरङ्गमेभ्यः
ससंभ्रमं केचिदधोऽवतीर्णा मूर्ध्ना प्रणामान् रचयांबभूवुः ॥

कांश्चित्कटाक्षेण निरीक्ष्य कांश्चित्स्वयन् स्मितस्येन, शुभाशिषाच
कांश्चि,त्समुत्थाप्य करेण, कांश्चिदन्वग्रहीत्पाणियुगं स्पृशंश्च ॥

द्वाराण्यतीत्य क्रमशस्स पश्यंश्चित्राणि नैकानि मनोहराणि
शनैश्शनैश्चोपससर्प शौरेः प्रासादराजं सुकृतैकगम्यम् ॥

मणिकन्धरमाह मुनिस्स यथा "नगरीयमब्धिरिव सततम्
दृष्टाऽपिच शतक्रतवः करोति दर्पपर्व नूत्नशोभाभिः" ॥

प्रतीहारिजनो वीक्ष्योपागतं मुनिशेखरम्
निवेदयामास गत्वा माधवाय महात्मने ॥

स्रग्धरा

डोलायां दन्तमय्यां मणिमयकुसुमैश्चित्रितायां समन्ता
च्छृङ्गारिण्यां मनोज्ञैः कनकविरचितैः शृङ्खलैर्बधितायाम् ।
शोभिन्यां रत्नकीर्णैश्शुकमुखपतगैः पट्टतल्पोपधानै
श्चासीनस्सेवितोऽन्तःपुरयुवतिजनैर्देव आकर्ण्य वाचम् ॥

मंजुभाषिणी

अवतीर्य चासनत "आ ! मुनीश्वरः
कमलासनस्य तनयस्समागतः ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सततं दिवोऽवतर, तीदमद्य मे
प्रतिभाति चित्र"मिति संभ्रमेण सः ॥

स्रग्धरा

प्रेंखोलैर्दोलिकायां विकृतविसृमरैः केशजालैरुपेतो
व्यत्यस्ताभ्यां धृताभ्यां स्खलितपदगतिः पादुकाभ्यां निजांघ्र्योः
तांबूलिन्या प्रदत्तं मृदुलदलचयं धारयन्नेव हस्ते
सौधाद्विसृत्य मोक्तुं युवतिमवततारात्तहस्तावलम्बाम् ॥

शिखरिणी

प्रदायार्घ्यं पाद्यं हरिरतिथये देवमुनये
यथा नव्यागन्त्रेऽवहितमतिरानर्च च भृशम्
मतौ धर्मिष्ठानामतिपरिचितायापि महते
जनायातिथ्यार्पण उदयते भक्तिरधिका ॥

सेवार्थिभ्यः प्रतीक्षिभ्यो बहिस्थेभ्यस्सभागृहात्
अदत्त्वा दर्शनं कृष्णः सेवतेस्म मुनीश्वरम् ॥

शार्दूलविक्रीडितम्

तज्ज्ञात्वा मुनिराह "माधव ! बहूकृत्याय मामेव मु
त्स्रष्टुं राजविधीन् विचिंतयति चेद्वक्तुं भवानर्हति
गन्तव्यं भवतेति मां प्रति, यदि त्वं मां स्वकीयं जनम्
मन्येथास्सकलान् प्रवेशय ! समाहूयात्र सेवार्थिनः ॥

वंशस्थम्

ततः प्रविष्टा विबुधास्सुहृज्जना नियोगिनो गायनगायनीगणः
महर्षये ये क्रमशो निवेदिता भटैस्तदा तत्र गृहीतनामभिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सकलान् विसृज्य शरौ प्रयाति सत्यात्मनानुगते
शुद्धांतं; शिष्यं तं निवर्त्य जग्राह वल्लकीं मौनी ॥

प्रतीक्षमाणा मुनिसेवनार्थमुपेत्य सद्यः कलभाषिणी तम्
प्रणम्य वीणां करतोऽग्रहीद्यामभाषतालोक्य हरिः स्मितास्यः ॥

"बाले ! शिष्या भूत्वा त्रिदशमुनिं नारदं सिषेविषसे ?"
इत्युक्ता सा "न किमप्येत" दितीषदिव संकुचन्त्याह ॥

ततश्चचक्षे हरि "रंबुजाक्षि ! विशङ्कसे त्वं कुत ! ईदृशी धीः
युक्ता तःवेदृङमुनिरन्वमंस्त यच्छिष्यतां तत्खलु पुण्यपाकः ॥

पृथ्वी

त्वदीयमतिकौशलं तव गलस्य माधुर्यम
प्यमूतमिति लभ्यते यदि सुरर्षिशुश्रूषणम्
भविष्यसि किल क्षितौ युवति ! गीतविद्याचणे
त्यचिंतयमनेकशः; फलति वांछितं, सेव्यताम् ॥

इति ब्रुवन् जांबवती गृहाय गत्वा मुनींद्रेण सहाब्रवीत्ताम्
"शिष्या समानायि मया, त्वमेतां गांधर्वविद्यामभिशिक्ष"येति ॥

मुदितमनाः प्रोच्य तदा "किमियं भवता कदाप्युदितपूर्वा
कलभाषिणी"ति, मुनये समर्पयामास सातिथेयविधीन् ॥

शार्दूलविक्रीडितम्

गोविंदस्तत आह तां "मुनिरसौ गांधर्वविद्याचणोऽ
पीर्ष्यंस्तुंबुरवेऽसदीयमितराज्ञेयं कलानैपुणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आयातस्समुपार्जितुं तत इमं त्वं शिक्षयैतां कला"
मित्याबद्धकरांजलिर्नतशिरास्सांगीचकार ह्रिया ॥

अपिचाह "कलाशुद्धिः परीक्ष्यतां मेऽधुनाऽत्र भवते"ति
स्यन्दयतीव मधुकणानुपर्वाणयतिस्म जांबवती ॥

मालिनी

सरिगमपदनीत्याख्या क्रमस्तस्स्वराणाम्
श्रुतिविविधगतीस्साज्ञातवत्यर्हरीत्या
समुचितलयतालैर्मन्द्रमुख्यैः स्वरैश्च
श्रुतिहितबहुगीतैर्गायतिस्माच्युतं तम् ॥

आकर्ण्य शौरिरुक्त्वा "प्रिये ! विदग्धासि, नास्त्यवरता ते
गीतकलायां शिक्षय त्वमेन" मिति तं समर्प्य निरगच्छत् ॥

पत्याज्ञया जांबवती च सत्या विदर्भकन्या च ततःक्रमेण
एकैकमब्दं तमशिक्षयन्त शिक्षा कृतांते हरिणैकमब्दम् ॥

मंजुभाषिणी

कलभाषिणी च सततं महर्षिणा त्ववरोध एव निवसंत्यशिक्षत
मतिकौशलेन सकलांच तांकलां मणिकन्धरोऽपि भगवत्प्रसादतः ॥

शिक्षयित्वा हरिस्त्रींस्तान् गीतविद्यां समस्तुत
"समस्कन्धो न वोऽस्त्यन्यो विना वो भूदिवो"रिति ॥

अमरमुनेः पुरतोऽमूस्त्रियश्च शुद्धांतदेशवर्तिन्य
"नैवास्ति तवारोढुं तुलां कलायामितर" इति प्रोचुः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत आपृच्छच्य महर्षिर्भगवन्तं नारदस्तदवरोधात्
मणिकन्धरेण सहितः कलभाषिण्या च बहिरेत्य ॥

कथाप्रसंगेन समागतां स्वां गीतप्रशंसा मवरोधभाजाम्
स्त्रीणां समुद्दिश्य स आचचक्षे शिष्यंच शिष्यांच विलोक्य मौनी॥

"कृता प्रशंसा वरवर्णिनीभिर्हरेःपुरस्तान्मम गीतरीतेः
किंस्यादिदं सत्य ! मथोपचारो मत्प्रीणनायेति नवेद्मि किंचित् ॥

प्रहर्षिणी

प्रीत्यर्थं परहृदयस्य वक्ति विज्ञः श्रद्धेयं नहि वचनं समक्ष उक्तम्
विश्वास्यं भवति परोक्षउक्तमाप्तसंघाते य"दिति मया कृतं ह"दीति ॥

शार्दूलविक्रीडितम्

शिष्याख्य "भ्रगवन् ! मया प्रतिदिनं वीणां वहन्त्या कृतम्
यातायातमनेकशस्सुविदिता शुद्धांतकांताजनैः
शक्यं गन्तु, मथादसीयकथनं श्रोतुं च विस्रम्भतः
शंकेऽग्रे मम ताः स्पृशन्ति न कथां ते; ऽइं त्वदीया यतः ॥

लभ्येतचेद्र्रमपेक्षितायाः स्त्रियास्तदन्तःपुरचेटिकानाम्
रूपाणि धृत्वोचितकाल इत्वा विज्ञास्यते चित्तगतिर्मयेति ॥

पृथ्वी

निशम्य कलभाषिणीवचनमात्मनीत्थं मुनि
र्व्यचिंतय "दियं हृदि स्पृहयती"व रंभाकृतिः
धनाधिपतिसूनवे, सुचतुरा मिषेणामुना
प्रयोजनमिदं भवेदपि मम क्रियासिद्धये"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भुजङ्गप्रयातम्

ततस्तामवोचत्तरुण्याप्नुहि त्वं वधूरूपमिच्छानुरोधेन दद्याम्
वरं ते; चरन्ती सविस्रम्भमन्तःपुरे मे कथां विद्धि सर्वां, व्रजेति ॥

शार्दूलविक्रीडितम्

धृत्वा कृत्रिमचेटिकाकृतिमसौ शुद्धांतगोष्ठीं गता,
विस्रब्धं कृतसंकथाश्च विनिशम्यैनं निवृत्ता पुनः
निर्मिथ्याः कृततत्कथाः परिचिताः कृत्वाऽहतानेन; सं
तुष्टेनैवमवादि "शिक्षितवती गांधर्वमन्तःपुरे ॥

जांबवतीं सत्यांच विदर्भकन्यांच पद्मनाभं च
कृत्वा गुरूस्त्वमहमिव कलभाषिणि ! वञ्चनाविदग्धासि ॥

मुदिते ! भवतीप्सितचरमवाप्य रंभामनोहराकारम्
सुखमश्नुतां, वचसि मे, श्रद्धत्तां, गम्यतां त्वयाद्ये"ति ॥

कलभाषिणीं मुनींद्रो विसृज्य मणिकन्धरं समुपदिश्य
पुण्यानां तीर्थानां यात्राया, एकको यथेच्छमगात् ॥

॥ इति द्वितीयस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ तृतीयस्सर्गः

वंशस्थम्

गृहङ्गताऽसौ कलभाषिणी ततः
समाप्तविद्याभ्यसनेन हेतुना
गमागमाभ्यामुपरम्य सद्मनो
हरेः स्मरंती नलकूबरं स्थिता ॥

स्रग्विणी

प्रक्रियां सङ्गतेस्तस्य साऽजानती
दीर्घकालं कथंचिद्विनीयैकदा
वर्धमानेन तद्विप्रयोगाग्निना
तप्तचित्ता गता स्वीयकेलीवनम् ॥

वीणामुपगायन्त्याः कलभाषिण्याः शिलापट्टे
आसीनायाः पुरतः सिद्धः कोऽप्यवततार गगनपथात् ॥

विभूतिलिप्तो धृतरुक्षपालः करस्थदण्डो जटिलेन मूर्ध्ना
मनोज्ञया किन्नरया कलञ्जनाल्या युतोऽसौ मृगराजवाहः ॥

निरीक्ष्य तं वधूटी सा मनः संस्थाप्य विस्मितम्
भक्तिबद्धा ददौ तस्मा अर्घ्यपाद्ये यथाविधि ॥

उवाच सिद्धः "कलभाषिणि ! त्वं
हरिं गुरुं सेवितुमे ? प्यधीता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गान्धर्वविद्या सकला भवत्या ?
गमागमाभ्यां व्यरमन्मुनींद्रः ? ॥

पृथ्वी

गतान्यकथमाक्षिपत्तव मनस्ततो वल्लभम्
धनेशतनयं दृढं ! मुनिवरस्त्वदामन्त्रणे ।
अदाद्वर मभीप्सितं, वचनमस्य न स्याद्वृथा,
जहाहि ! न धृतिं कदाप्यतिकृशासि शोच्या भृशम् ॥

वंशस्थम्

उपोषिते मे श्रवणे तपःस्थिते विरम्य गीतान्मणिकन्धरे वधु !
यथा भवेत्पारणमेतयोस्तथा गृहीतवीणा क्षणमात्रमालप !" ॥

एवं सिद्धे निगदति मत्यामारूढविस्मयायां सा
मूर्ध्ना प्रणाममस्मै समाचरन्ती युवत्याह ॥

"आर्य ! त्वं देवो वा ! कपिलादिष्वन्यतमसिद्धः ?
महिमा तेऽश्रुतपूर्वः क्रियतां श्रुतिपथं ना"म्नेति ॥

स आह "भद्रे ! नहि देवताऽहम्
नवा च सिद्धो; मम नामधेयम्
प्राहुर्मणिस्तंभ इति प्रतीही"
त्याकर्ण्य नम्राऽभ्यदधात्पुनः सा ॥

वसंततिलका

"देव ! त्वदीयवचनं सकलञ्च चेत
श्चित्तीयते मम, कथं विदितो यथार्थम् ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अज्ञातमीषदपि नास्ति चराचरेऽस्मिन्
लोके तवेत्यवगतं श्रुतवाग्भिरद्य ॥

अत्र त्वयोक्तासु कथासु सर्वा समञ्जसो नाऽक्षरशश्च सत्या चरंस्तपस्यां मणिकन्धरोऽस्तीत्युक्तं तदारभ्य शृणोमि" चेति ॥

शालिनी

ऊचेऽसौ "मे दूरदृष्टिश्रुती स्तः
शक्तिभ्यां वेद्म्यसि याभ्यां समस्तम्
स्वस्थानस्थो यः श्रुतोऽर्थो न मिथ्या
ह्यद्य श्राव्यानन्तरीया कथा च ॥

द्रुतविलंबितम्

तरुणि ! दिव्यमुनिर्भवतीं तथा
"व्रज ! गृहा" निति दत्तवरोऽजहात्
उपदिदेश ततो मणिकन्धरम्
"भज ! हरिं; सफलास्तु कला तव ॥

वसंततिलका

संप्रीतये भगवतेऽपिच सर्वपाप
विध्वंसनाय भवतीत्यवगत्य गायन्
मोक्षप्रदं परमपूरुषमब्जनाभम्
मद्वीणया त्रिभुवनं सततं चरामि ॥

विश्वावसुर्बृहत्या तुंबुरुनामा कलावत्या
अहमेतया महत्या कच्छप्येष्टे हरिं गिरांदेवी ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्यासु गीतविद्या महत्तरा श्लाघ्यमाना च
येनार्प्यते भगवते पुण्येष्वयमुच्यतेहि पुण्यतमः ॥

मालिनी

इयदिति तव भाग्यं शक्यते नैव वक्तुम्
परमपुरुष एष प्रेक्ष्यते केन साक्षात् ?
असुलभमददात्ते गानविद्यारहस्यम्
परमकरुणयैवं देशिकत्वं प्रपन्नः ॥

ततोऽनवद्यां तव गीतविद्यामावर्तयन्नास्व ! नितान्तभक्त्या
जेगीय्यतां विष्णुकथाप्रबन्धो यत्कल्पते मृत्युभयाद्विमुक्त्यै ॥

मालिनी

अहमपि च रयेणैवाद्य निर्गत्य नाके
त्रिदशपतिसभायां वा पुरद्विट्सभायाम्
कमलभवसभायां चक्रिणो वा सभाया
मपजयहृतदर्पं तुंबुरुं व्युद्य कुर्याम् ॥

शार्दूलविक्रीडितम्

श्रुत्वैतन्मणिकन्धरस्सुरमुनिं प्राहस्स बद्धांजलि
र्ज्ञातं ते वदनेन तुंबुरुजिगीषास्तीति तावन्मया
तस्मै तुंबुरवे कुतस्त्वमसि बद्धेर्ष्यो निविष्टश्च ? भोः
क्लेशाः केच जयाय तस्य भवता सोढा महात्म!"न्निति ॥

वसंततिलका

अब्रूत नारदमुनि "भगवान् कदाचि
द्विष्णुः पितामहमुखैर्दिविषद्वरेण्यैः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संसेवितो निगमवाग्भिरभिष्टुतश्च
योगीश्वरैर्न्यषददुज्ज्वलमण्डपे स्वे ॥

शार्दूलविक्रीडितम्

कौंडिन्यात्रिमरीचिदक्षकपिलागस्त्याक्षपादांगिर
श्शांडिल्यक्रतुकण्वकुत्सभृगुविश्वामित्रदुर्वाससः
मण्डव्यासुरिवामदेवकपयश्चागु स्सभामण्डपम्
श्रीनारायणपादसेवनरताः सर्वे दृढाभक्तयः ॥

तत्रागच्छामाहं तुंबुरुविश्वावसुप्रभृतयश्च
वीणाधरा अभिरताः कतिचन कमलेशसेवायै ॥

स्रग्विणी

वेत्रहस्तैर्भटैस्संघकोलाहले सागरस्येव निर्घोषउत्थे क्रूरैः
शम्यमाने हरिः प्रेक्षतेसादराद्दिव्यवाराङ्गनानाट्यमानन्दनम् ॥

वसंततिलका

शम्पालताभिरिव वारिदवृन्दमध्या
च्चेटीजनैः परिसरप्रमदावनांतात्
पद्मालया धृतसमुज्ज्वलवेषभूषा
आगच्छतिस्म निकषा पतिमब्जनाभम् ॥

शिखरिणी

समागच्छन्त्यारादुपवनसकाशाज्जलनिधेः
सुता दृष्टाऽदृष्टान्वतिरभसमाख्यामि किमिति
कुतोऽप्यायातैर्दीर्घधृतकनकदण्डैः परिजनै
र्हतास्सभ्यास्सर्वे द्विजगण इवाशा उदपतन् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदा कथां मादृशानां किंवदा? न्यनुधावितः
बेत्रिभिः परमेष्ठी च उच्छ्वसन् प्रपलायितः ॥

तदाहूतस्तूच्चकण्ठैर्वेत्रिभि "स्तुंबुरो !" इति
जनसंकटमार्गेणागत्यासावन्वयाद्धटान् ॥

शार्दूलविक्रीडितम्

गच्छन्तं तमवेक्ष्य केचन "कुतोऽसौ तुंबुरुः किंकरै
स्तत्राहूत ? इति; प्रसक्तिरुदिता किं गीतसंबन्धिनी ?
इत्यन्ये चतुरास्ततोऽत्र नहि किं गांधर्वविद्याविद
श्चेत्येवं विशशंकिरे हृदि तदास्थानाद्बहिर्वर्तिनः ॥

मया चिंतयताहूतस्तुंबुरुः केन हेतुना
इति, ज्ञातं शृणोतीति तद्गीतं रमया हरिः ॥

अवधीर्यास्मान् सर्वांस्तमेकमाहूय माधवे रमया
शृण्वति गीतं तस्य व्रणितमिव मनः पराभवक्लिष्टम् ॥

शिखरिणी

ततो निर्यातं तं बहि "रुपहूतं तेन किं"मिति
"श्रुतं गीतं देव्या सह भगवता, किं तत ?" इति
"प्रसादं देवस्य प्रकटयति दत्तेयमुपदा"
"त्वमेको वास्त्यन्यः किं"मिति च जने पृच्छति मुहुः ॥

कनकद्युतिभिः स्नपयति पदके कंठस्थिते समीपस्थान्
धृतकनकपटश्चन्दनचर्चितगात्रस्स तुंबुरुर्दृष्टः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धगधगितकंठपदकं निगनिगिताभूल्यकनकपरिधानम्
भुगभुगितगन्धचर्चा भगभगयामास मामकं चेतः ॥

स्रग्धरा

आहूतस्तुंबुरुर्मां नकिमपि च ददंस्तत्र यातः कुतोऽसा?
वास्तां, नाहूय गत्वा प्रकटितममुनैकेन गीतं कथं भोः ;
तच्चास्ता; मग्रहीदप्युपहृतिमधिकां दूरदृष्टिं विना;ऽस्ताम्
तच्चाप्येतां गृहीत्वा नविदितमनपेत्यागतश्चात्र धिक्! धिक्!

स्वार्थेन दूषितस्सर्व ऋजुर्नैकोऽपि दृश्यते
तुंबुरो! साधु! पश्येति दशनानि प्रघट्टयन् ॥

किं मत्तोऽभ्यधिकोऽयं ? कथास्य यावत्प्रकाशतां याति
तावत्तथास्तु, नाहं लघुलघ्वेनं जहामी''ति ॥

वसंततिलका

क्रुध्यन्नहं मनसि तुंबुरवे भृशं तम्
निर्जित्य कुत्रचन गीतकलाविवादे
मद्गीतकौशलमियाद्गरुडध्वजस्य
श्रुत्योर्यथा समुचितं करवाण्युपायम् ॥

शार्दूलविक्रीडितम्

इत्यात्मन्यवधार्य नैव सहसा कार्यं विदध्यादिति
क्रोधैर्ष्ये विनियम्य पूर्ववदहं स्निह्यंश्च सख्याविव
यातायातकृदस्य दोषगुणयोर्ज्ञानं लभे; यद्विना
साध्यः स्यान्नजयो ममेत्यकरवं चित्ते तथैवाचरम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भुजङ्गप्रयातम्

गतोऽहं कदाचिद् गृहं तस्य वीणाम्
प्रगातुं वितर्द्यामुपस्थाप्य सज्जाम्
गृहांतर्गतस्तां गृहीत्वा जिगासु
स्समारप्सि कौतूहलान्मन्दमन्दम् ॥

मणिकन्धर ! किं वच्मि ? श्रुतिभिर्वीणा नितांतशुद्धाभिः
विस्माययतिस्म भृशं विहाय तां निर्गतो ह्रीतः ॥

स्रग्धरा

गातॄणामेष मुख्योऽप्यविदितमिदमस्त्ययथावत्त्रिलोक्याम्
गांधर्वे लब्धकीर्तेर्मदपि समधिकस्तुंबुरुस्सर्वथेति
आवाभ्यां नैककृत्वो द्रुहिणमुखसुपर्वौघसंसत्सु गीतम्
विद्यागांभीर्यमाविष्कृतमपि न यथाऽग्रे हरेरद्य तेन ॥

यावन्मात्रीं तु यो वेत्ति तावन्मात्रीं बुधो जनः
आविष्करोति विद्यां स्वां जलावधि जलेरुहम् ॥

विपरीताविष्क्रिया चेद्विफलैव भवेध्द्रुवम्
हिमांशु वा भस्मराशौ गीतं वा बधिरश्रुतौ ॥

भुजङ्गप्रयातम्

विचिंत्यात्मनीत्थं भ्रमन् गीतविद्या
पटुर्यत्रयत्रास्त्यमुं सेवमानः
गृहीताऽपि शिक्षा चिरं नाहमस्मि
समस्तुंबुरोरित्यदुःख्यं नितान्तम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिद्धिर्मनोरथस्यास्य विना विष्णोरनुग्रहात्
भवेन्नेति तपस्तप्तं निविष्टेन मया चिरम् ॥

स्रग्धरा

श्यामांगेनांजनाद्रेर्मदमपहरता दृग्द्वयेनांबुजानाम्
निर्जेत्रा कुण्डलाभ्यां निजरुगभिहतादित्यरोचिश्च याभ्याम्
क्रीडन्त्या छाययोरःस्थितमणिगतया स्वीययैव श्रियाच
बिभ्रद्भिश्शङ्खचक्रे असिमपिच गदां बाहुभिर्द्योतमानः ॥

वसंततिलका

संसेवितस्सुरगणैः पतगाधिरूढः
साक्षादभून्मम पुरः करुणांतरंगः
आम्नायवाग्भिरनघाभिरभिष्टुतोऽसौ
विष्णुर्मयाख्यत यथा "तव कांक्षितं किम् ॥

पृथ्वी

तदाहमवदं "प्रभो ! मम दयस्व ! तं तुंबुरुम्
जिगीषुरह; मीप्सितं मम वरं प्रदेही"ति तम्
उवाच भगवान् "शृणु ! प्रभवितास्म्यहं द्वापरे
युगेतु वसुदेवजो भुवनशासनायावनौ ॥

द्वारकानगरस्थस्य आयाहि मम सन्निधिम्
करिष्यते मया कांक्षा सफला तव नारद !" ॥

इत्युक्त्वांतरधाद्देवः प्रनिरीक्ष्य मया चिरम्
शौरेः शुश्रूषया प्राप्तमुरुगांधर्वकौशलम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इयता क्लेशेनाहं प्राप्तो गांधर्वकौशलं सुचिरात्
त्वं च कलभाषिणीचाश्राम्यन्तौ प्रापतं हरेः कृपया ॥

इत्युक्तोऽसौ मुनिना प्राहस्म "यथा मुनींद्र ! कियदेतत् ?
त्वत्पादसेवया स्यात्त्वत्तैव भ्रमरकीटकन्यायात् ॥

शार्दूलविक्रीडितम्

आहूतः सकृदेव तुंबुरुरसौ विष्णोः पुरो गीतज्ञा
नेतन्नाल्पतपोभिराप्यमिति विज्ञातं, सदा सन्निधौ
वैकुण्ठे निवसन् स्तुवन् भगवतस्सेवाञ्च कुर्वन् जनः
कीदृक्पुण्यतमो भवे ? दपिच तद्भाग्यं कथं लभ्यते ?" ॥

वाचामुया स मुदितो मुनिराह "बाढम्
बाढं त्वदीयवचनं; निरवद्य; मार्थम्
शीलञ्च, कोऽस्ति पर ईदृशपुण्यचेताः ?
कश्चितयेच्च परमां गतिमेकदापि ? ॥

* संति कुत्र कलिङ्गाः ? क्व वङ्गा अङ्गाश्च कोसलाः ?
इति जिज्ञासते; किंतु न कृतांतपुरीं जनः ॥

शिखरिणी

इदं पापं, पुण्यं त्वद इति विधिश्चाय, मपरो
निषेध, श्चेत्येतत्समुचित, मितोऽन्यत्त्वनुचितम्

---

* "अङ्गाः किमु वङ्गाः किमु इत्यनुयुंक्ते वृथा देशान्
कीदृक्कृतांतपुरमिति कोऽपि न जिज्ञासते लोकः ॥

अप्पयदीक्षितैर्विरचितवैराग्यशतकपद्यस्यानुकरणम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परलोकोऽस्तीति श्रुतिहितवचः कैर्नविदितम् ?
विवेकाद्भ्रष्टः स्यादिहसुखविमूढो भुवि जनः ॥

अधीतवेदादिसमस्तविद्यः संश्लाघ्यमानो बुध इत्यनेकैः
स्नातो गजो वा रजसाभिमृष्टः कलंकितः स्यात्कलुषेण भूयः ॥

स्रग्धरा

भूतानां प्राणिजालं ह्यधिकतर, मतो बुद्धिजीवा विशिष्टाः
तेषां मर्त्याश्च, तेषु द्रुहिणवदनजाः पंडितास्तेषु वर्याः
श्रेष्ठास्तेषां श्रुतार्थाचरणरतहृद; स्तेषु कर्ता वरिष्ठ
स्तस्माच्च ब्रह्मवेत्ता न पर इति मनुर्व्याहरद्धर्मबोधे ॥

अध्यास्से त्वं परां कोटिं प्राग्जनुःपुण्यपाकतः
श्रुतमात्रे हरेस्सेवामहत्त्वे हृदि लिप्ससे ॥

ततस्त्वया ह्यीप्सितमब्जनाभस्याश्रान्तसान्निध्यमहत्वलब्धेः
उपायमार्यैरुपदिष्टमद्य यथाश्रुतं तं कथयामि तुभ्यम् ॥

तत्त्वोपदेशस्य न योऽधिकारी तस्योपदेशोऽपिच नोपदेशः
जिज्ञासमानस्य जनस्य पापारेत्युच्यते प्राज्ञतमैः शृणु ! त्वम् ॥

स्रग्धरा

कुर्यात्कल्याणकर्माण्यकृतफलमति, दुष्टकर्माणि जह्यात्
लोलं चित्तं विदध्याद्भगवति सुदृढं; भक्तबृन्देन युज्यात्
संसर्गं दुर्जनानामपिच परिहरे; त्तीर्थयात्राश्चरेच्च
वैराग्यब्रह्मचर्ये अविलुलिततपश्चार्थ्यमाप्तुं मुकुन्दम् ॥

धर्मा इमे यस्य भवन्ति सर्वे उत्पत्य विष्णोर्निपतेत्परोक्षः
धर्मै रुपेतः कतिभिश्चिदेषां क्रमेण गच्छे; न्नवृथा श्रमोऽस्य ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिखरिणी

यथाशक्त्येतानाचर ! हरिकृपासादितमिदम्
कलायाश्चातुर्यं कुरु ! च सफलं; कीर्तय ! हरिम्
व्रज ! श्रीरंगादीन् परमपवितान् दिव्यनिलयान्
भवेच्छ्रेयो भूयस्तव तत इति प्रोच्य स मुनिः ॥

शिखरिणी

हरिं चित्ते कृत्वा पुलकिततनुः कीर्तयति तम्
नरीन; त्युच्चैराह्वयति पुरतो वर्तिनमिव
कराभ्यामूर्ध्वाभ्यां पठति निगमोक्तीः; परवशो
दिदृक्षुर्दिग्वीथीः प्रति लघुगतिर्धावति ततः ॥

मणिकन्धरमुत्सृज्य ब्रह्मविद्ब्रह्मपुत्रकः
निमील्यैवाक्षिणी यातो दूरं दूरतरं द्रुतम् ॥

मंजुभाषिणी

मणिकन्धरस्तमवलोकयन् दृशोः
पदवीं व्यतीत्य च गते महामुनौ
परिवर्त्य दृष्टिममुनोक्तवर्त्मना
प्रसितो जगाम हृदि तीर्थसेवने ॥

मंजुभाषिणी

यमुनां ददर्श मणिकन्धरो जले
प्रसृतेन शुद्धतरफेनराशिना
तरलाब्जरेणुभिरहीशतल्पगाम्
कनकांबरां हरितनूं स्मरन् हृदि ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मथुरां च हरिद्वारं सालग्रामाचलं, कुरुक्षेत्रम्
बदरीं त्रिवेण्ययोध्ये काश्यंबुधिसंगमौ च सोऽदर्शत् ॥

ततो नीलाचलक्षेत्र इन्द्रद्युम्नसरस्यथ
स्नात्वा च रोहिणीकुण्डे भक्त्यास्तावीद्रमाधवम् ॥

जगन्नाथं कूर्मनाथं सिंहाचलमहोबलम्
वेङ्कटाचलमेषोऽगाद्गायंस्तद्देवता मुहुः ॥

वसंततिलका

प्राकारमण्डपगतैर्मणिकांतिबृन्दैः
स्रोतःस्विनीजलतरंगकवीजनैश्च
संघृष्टयात्रिकविभूषणरेणुजालै
र्वाद्यस्वनैर्बहुविधैः श्रुतिपर्वकृद्भिः ॥

अगुरूत्थधूपजांबुदजननेन च तेजसोऽनिलक्षित्योः
नभसो वारां च कृता प्रवृद्धता वेङ्कटाचलक्षेत्रे ॥

मालिनी

अरिदरकरयुग्मः स्वर्णवासा उरःश्रीः
सरसिजदलनेत्रो वैजयन्तीगलश्च
द्ररहसितयुतास्यः प्रोज्ज्वलद्रत्नभूषो
विलसति भगवान् श्रीवेङ्कटेशोऽत्र शैले ॥

वसंततिलका

प्रत्यङ्गमस्य तु निरीक्ष्य निरीक्ष्य दीर्घम्
कालं निधाय हृदि नेत्रयुगं निमील्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बद्धांजलिः प्रमदवाःकणिकार्द्रगण्ड
श्चाज्ञातवीतसमय स्स उपास्त देवम् ॥

ततस्सपरमानन्दतुंदिलो मणिकन्धरः
बाष्पस्तंभितकण्ठेन स्वात्मानमवदद्यथा ॥

स्रग्धरा

"न प्रत्यावर्तते हृत्पदकमलयुगा, न्मध्यमीक्षे कथं भोः!
मध्यादेषा न वक्षः परिसरतिच, नो याति हस्तौ ततश्च
ताभ्यां कण्ठं न, तस्मान्नरुचिरमधरं, कर्णपूरौ ततो न,
नासां ताभ्यां न; तस्या न नयनतिलके याति; किंवा करोमि !

प्रहर्षिणी

साष्टांगप्रणतिशतं समर्प्य भक्त्या
वीणैकीकृतमृदुकण्ठनिस्वनेन
गायन् वेङ्कटविभुनामकीर्तनानि
नीत्वाच त्र्यहमवतीर्य शैलशृङ्गात् ॥

स्रग्धरा

कांच्यामेकाम्रनाथं परमशिवमुपास्तैष, सह्याद्रिजाताम्
श्रीरंगेशं सिषेवे, प्रमुदितमनसा कुम्भकोणाख्यपुर्याम्
श्रीकुम्भेशं च रामेश्वरमथ परिचर्याव्रजत्पद्मनाभम्
संद्रष्टुंपांड्यदेशं कृतविविधविधिस्तं न्यषेविष्ट भूयः ॥

ततःप्रांते वने शांते फलपुष्पजलैर्युते
तपःकर्तुमुपाक्रंस्त मुनींद्रो मणिकन्धरः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्युक्त्वासौ मणिस्तम्भः प्रसार्याशाममूं दृशम्
प्राह "पद्मासनासीनः समाधिं धृतवा"निति ॥

शालिनी

सर्वं श्रुत्वा कामिनी साह "देव !
तत्संबद्धां त्वं कथां वीक्षसे भोः ?
प्रत्यक्षस्थां वे"ति, सोऽब्रूत "भद्रे !
शङ्कां तेऽहं पश्य ! निष्कासयेयम् ॥

सखीः प्रेषय ! ते दूरं तासां वाचः क्रियाश्च ते
अञ्जसा कथयामीति सा बद्धांजलिरब्रवीत् ॥

वसंततिलका

"किं त्वां परीक्षितुमलं भगवन्नहं ते
श्रद्धां करोमि वचने,"ष्विति सोऽप्यदेषः
दोषो न, कौतुकमिदं प्रमदे ! सुदूर
मालीजनो व्रजतु ते क्षणमात्रमत्र ॥

शालिनी

इत्युक्ता सा प्राहिणोद्दूरमाली
स्तासां चेष्टास्तद्वचांस्यंजसोक्त्वा
प्राह; श्रद्धां तन्वि ! कुर्वस्व तीर्थ
यात्रोदंतेऽन्यत्र दृष्टे यथा त्वम्" ॥

द्रुतविलंबितम्

वचनमस्य निशम्य शुकोऽवदन्निकटवृक्षगतोऽनघ ! ते वचः
भवति सूनृतमेव; न संशय" इति, यदाह मुदा कलभाषिणी ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्रग्विणी

कीर ! कस्त्वं कथं वागियं सूनृता ?
किं प्रमाणं ? त्वया कुत्र वा स्थीयते ?
त्वं नवीनोऽसि मे, स्वागतं गृह्यताम्
संशयो वार्यतां मे त्वयाद्ये"ति तम् ॥

स्रग्धरा

कीरो ब्रूतेस्म "भद्रे ! शृणु ! मम वसतिर्नन्दने, शौरिणा प्रा
गानीते पारिजाते तमनु शकुनिभिः प्राप्य भूमिं पुनस्तैः
गच्छद्भिः स्वर्गलोकं सह मम युवतिर्नैव शक्ता प्रसूता
गन्तुं, पश्चाच्च नेच्छुस्सुरभुवनगतिं वर्ततेऽत्रैव वन्याम् ॥

"आयाहि ! नाक"मिति सा भणितापि पुनःपुनस्समाचष्ट
"कियती मात्रा नन्दन ? मित्यस्य वनस्य याति न शतांशम् ॥

सौभाग्यमेतस्य वनस्य वीक्षमाणस्य तस्मिस्तव कस्य हेतोः
न मुञ्चति प्रीति ? रिति स्मितेन कृतं पदं मे हृदयेऽधुनेति ॥

तदाहमब्रवं "तथ्यं त्वदुक्तं, किंतु बांधवाः
सन्ति सर्वेऽपि तत्रेति स्वर्भूयात्रां करोम्यतः ॥

वियत्पथेन व्रजतो ममेह श्रुतिं गताऽमूनमणिकन्धराख्या
कुतः प्रसङ्गोऽस्य समुद्गतोऽत्रेत्यवस्थितस्तच्छ्रवणेच्छयाहम् ॥

यदुक्तमेतेन तदीयतात्ययालातपस्यादिकथानकं तत्
यथार्थभूतं, विदितं मयाच यद्यच्छुभे ! ते कथयामि सर्वम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्दाक्रांता

अद्यायातौ हरिहयशचीदंपती नन्दनं; यौ
चारः कश्चिद्द्रुतमुपगतोऽवोचतैवं "प्रभो ! नः
कोऽप्युद्याने चरति तप उर्वेष काश्यादिपुण्य
क्षेत्रासेवां स्वयमकुरुतेत्यख्यदभ्यर्थितश्च ॥

शिरस्पदेऽस्य संभूता वह्निज्वालापरंपरा
वातमात्राशनस्योग्रे तपस्युत्थितचेतसः ॥

पञ्चाग्निमध्येऽथ निदाघकाले वर्षास्वनाच्छन्नतले, हिमर्तौ
जलांतरेऽतप्यत एष; देवः प्रमाणमेतां विनिशम्य वाचम्" ॥

आहूय सद्योऽप्सरसां प्रकांड रम्भां मरुत्वान् कथितं चरेण
आवेद्य सर्वं तपःप्रकारमन्तेऽब्रवी"त्किं करणीयमद्य ?

हर्तुं मदीयामरराज्यलक्ष्मीं प्राक्रंस्त तप्तुं स यमीति शंके
प्रतिक्रियाद्याभ्युचिता विचिंत्या कलाविलम्बात्फलमुर्वपेयात् ॥

अमूदृशस्तापसरूपशत्रोर्नेष्टे मदीयः शतकोटिरुग्रः
यथास्त्रशस्त्राणि मनोभवस्य यूयं शितान्यप्सरसो विचिन्त्यम् ॥

शार्दूलविक्रीडितम्

त्वं लावण्यवतीषु तास्वलमथाः स्पृह्यं पदं चित्तहृ
च्चेष्टाभिर्वचनैस्सुधारसनयैः मंदस्मितैर्दृग्गणैः
कन्दर्पस्य निशातशस्त्रसदृशैः शृङ्गारसीमासि, ये
नाबद्धोध्दुरमत्सरा युवतयश्चान्या भवत्यै शुभे ! ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विलासजालैर्मधुरोक्तिमन्त्रैर्दृगस्त्रवृंदैस्तव को न वश्यः ?
एकैकमेवाल, महो ! भवत्या महत्तरा साधनसंपदस्ति ॥

वसंततिलका

क्रीत्वा तदीयहृदयं नवमोहनेन
रूपेण तेऽतिमहता धनसञ्चयेन
तं क्रीतदासमरविंददलायताक्षि !
त्वन्मात्रजीवितगतिं सुचिरं विदध्याः ॥

वने तवांगे नयनाभिरामे विलासरूपैर्बहुपुष्पवृक्षैः
क्रीडामृगं तं कुरु! मन्मथस्य रम्भोरु! रम्भे! किमितोऽस्ति कथ्यम्॥

स्रग्धरा

इत्युक्त्वा प्राह रम्भा "क इव स भवता चिंत्यते ? संश्रुतोऽसा
वस्माभिर्नारदस्य त्रिदशमुनिवरस्यांतवासीति, नायम्
लघ्वीमात्रा, विलासास्सुरयुवतिगणस्यात्र भग्ना भवेयु
श्शैलाघातात्तरङ्गा इव, सुपरिचिता नस्त्वमुष्योग्रदीक्षा ॥

मणिकन्धरनामाऽयं भवदाज्ञापालनं न शक्यं मे
अस्ति हि हस्तिमशकयोरिवांतरममुष्य चान्यसंयमिनाम् ॥

शिखरिणी

महेन्द्रोऽवादी "त्वं प्रभवसि नचेत्का प्रभवति ?
ददे ते लावण्यं समधिकमितोऽप्युज्ज्वलतरम्
पतंगो वा जाले स * पतति पुरा विभ्रमचये
त्वदीये, विस्रब्धा भव ! कुरु ! कृतं शंकितधिया ॥

---

* पुरा पतति = पतिष्यति (यावत्पुरा निपातयोर्लट्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं रंभा कृतोत्साहा सद्योलब्धांगसंपदा
अनुयाता सखीभिश्च प्रस्थिता तत्तपोवनम् ॥

द्युलोकादवतीर्णानामप्सराणां तनूरुचः
अचीकरन् विद्युतां वा व्योम्नश्शोभां महोज्ज्वलाम् ॥

शिखरिणी

प्रतिष्ठन्ते यावन्नसुरवनिता आश्रमपदं
मयाऽयातं, भाव्यं वनमुपगताभिर्युवतिभिः
इति व्याचक्षाणं शुकममृतनिष्यंदिवचसम्
वधूटी संतुष्टा मृदुमधुरवाचाऽस्तुत यथा ॥

वसन्ततिलका

वैयासकेस्सुमहतस्सुगृहीतनाम्नः
संज्ञां वहन्नतितरां हरितत्त्वमुच्चैः
तन्वंश्च विष्णुपदसञ्चरणैकचित्तः
संश्लाघितोऽस्युचितमस्त्यमृतं वचस्ते ॥

भाग्यं त्वदीयं प्रभवामि नाहम्
स्तोतुं, न हातुं मन इच्छति त्वाम्
द्रष्टुं त्वयात्मीयकलत्रपुत्रान्
गन्तव्यमे" वेति शुकं व्यसृष्ट ॥

भुजङ्गप्रयातम्

ततः प्राह सिद्धः "शशांकानने ! ते
श्रवःपेयगीतिश्रुतेः कांक्षया हि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मयायातमत्र, श्रवःपर्व कुर्या
गृहीत्वा विपञ्चीमिति प्रार्थये त्वाम् ॥

एवमुक्ता सुन्दरी सा गातुं प्राक्रंस्त वीणया
यथा सिद्धः संदिदेह शृण्वन् वीणायुगंन्विति ॥

॥ इति तृतीयस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ चतुर्थस्सर्गः

मन्दाक्रांता

अब्दांस्त्यक्त्वा भुवमुगताश्चारुशंपालताः किम्?
किंचैतासां विरहविधुरा आगता अंबुदाः किम्?
एवं शंकावति जनगणे गात्रकैश्यानि दृष्ट्वा
रंभामुख्यास्सुरयुवतयोऽवातरन्नाश्रमान्तः ॥

अकालसंध्याघटिताकरांघ्रिशोणप्रभाभिः नखकान्तिजालम्
तारा इवासां वदनानि नैकशीतांशुबिंबा इव रेजुरभ्रे ॥

सुमरजसा पीतांबरमलिभिः कैश्यं, द्विजैरलंकारान्
क्वणतो, धृत्वा प्रत्युद्यांती वा वनरमाप्सरोबृन्दम् ॥

मंजुभाषिणी

अलयः कचाश्च, लतिकास्तनुततिः
सुमगुच्छकानि च कुचाश्च; पल्लवाः
करसञ्चय; स्सुमरुचिः स्मितानि च
मिलितानि वारि च पयांसि वा मिथः ॥

स्रग्धरा

गोभिर्लेलिह्यमानं दरमुकुलितदृग्द्वीपिनीबृन्द, मेत
स्योधस्यं पातुकामो हरिणसमुदय, स्तेन खेलन्मृगेन्द्राः
तैः कण्डूयद्भिरङ्गं हृषितकरिगण, स्तत्कटस्थालिगीतै
र्नृत्यत्सर्पा, अमीभिः प्रमुदितनकुलाः मूषिकास्तत्समीपे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूषकरक्षणसक्ता मार्जाला; यत्र रामरामेति
कूजन्तश्च शुकास्सुरयुवतीर्व्यस्मायन्त रम्भाद्याः ॥

शार्दूलविक्रीडितम्

किं शान्तस्य रसस्य मूर्ति ? रथवा पुण्यंच पुंजीकृतम् ?
प्रत्यक्षं किमु पावनस्व ? मथ वैराग्यञ्च राशीकृतम् ?
किं सत्त्वस्य घन: ? किमुच्चतपसां रूपं ? किमाध्यात्मिकम्
ज्ञानं संचितमस्त्यहो ! इति यतिस्संभाव्यतेऽत्राश्रमे ? ॥

दृढे समाधौ प्रविलीनचित्तं तं वीक्ष्य तस्योज्ज्वलतीक्ष्णदृष्टेः
स्थातुं पुरस्तात्त्रसती स्खलन्ती शनैश्च रम्भापससार पार्श्वम् ॥

प्रहर्षिणी

चित्तेऽस्या अभव "दयेऽस्य तीक्ष्णतेजो
दृग्द्वन्द्वं मम परिविद्यति प्रजात:
कंपोंऽगे; कथमिव साध्यते मघोनः
कार्यं त ? जडमतिरागता बते" ति ॥

द्रुतविलंबितम्

पुनरसौ युवती धृतिमादधत्यमरनाथवचांसि च कुर्वती
मनसि; तस्य मुनेः पुरतो गता सह सखीभिरनङ्गशितेषुभिः ॥

शालिनी

कुर्वत्यस्तास्तत्र पुष्पापचायं गायंत्यश्च श्रोत्रपेयं तरुण्यः
विक्रीडन्त्यो दोलिकाकेलिकाभिर्नर्मालापान् भाषमाणा मिथश्च ॥

उद्दीपयन्त्यो रतिमात्मवाग्भिः पाणीन् धमन्त्यश्च मिथोपहस्य
मुहुर्नटन्त्यश्च विनोदकेलीः रम्भादयो निर्विविशुस्तदात्वे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्दाक्रांता

लीलावालं सुरुचिरतनुं, विश्लथं केशपाशम्
स्रस्तं वक्षोरुहतटपटं, संचलत्सारहारम्
मन्दां मन्दां गतिः मतिमनोहारिवक्त्रारविंदम्
चञ्चन्मध्यं युवतिरचरद्बिभ्रती मौनिनोऽग्रे ॥

यदृच्छयाऽसौ विरतस्समाधेः कोलाहलं तद्विनिशम्य नेत्रे
उन्मील्य रम्भां पुरतो विलोक्य विकारि चेतो विनियच्छतिस्म ॥

दृग्भ्यां पुनर्वीक्षणतत्पराभ्यां प्रबोधितस्सन् स पुनः पुनश्च
उन्मीलिताक्षो विनिमीलिताक्षः श्रीकृष्ण ! कृष्णेत्यवृतत्स्मरंश्च ॥

मंजुभाषिणी

बलवान् स्मरश्च महती धृतिश्च त
न्मणिकन्धरस्य हृदये कृतास्पदौ
जयिनौ कदापि विजितौ च तावुभौ
भवतःस्म तत्र कलहे परस्परे ॥

शालिनी

तस्य स्वान्तं योजयामास कामो
रंभारूपेऽत्युज्ज्वलेऽदृष्टपूर्वे
छिन्दानोऽयःश‍ृङ्खलाबन्धनं तद्
धृत्याख्याकं पुष्पबाणैर्निशातैः ॥

स्मरस्य सन्तापनबाणतप्तं चेतस्तदीयं ललनाललाम्नः
लावण्यकेलीसरसीप्रविष्टं निमज्जदुन्मज्जदथावतस्थे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बद्धानुरागो मणिकन्धरोऽस्याः सौन्दर्यरेखां मुहुरीक्षतेस्म
मीनं यथा धीवरसुन्दरी तं विलासजालेन जिघृक्षतेस्म ॥

चकार चित्ते स "इयं वधूटी रंभा किमन्यैव विलासिनी स्यात्
तारुण्यदीप्तिस्तनुरूपसंपत् स्मितञ्च वक्त्रेऽप्यदृशश्च कास्ति ॥

विना साङ्गत्यमस्या मे मोक्षाल्लभ्यादृरं वने
धर्मो वृक्षस्य फुल्लस्य दोहदैरनया कृतैः ॥

पृथ्वी

हसन्तु विकटं जना मुनिविरोऽयमित्युच्चकै
स्तपोधनमुपार्जितं सकलमाप्नुयान्नाशनम्
अपैतु चिरसंचितश्च मम तत्त्वबोधो वृथा
म्रियेऽस्मि तरुणीमिमामनुपभुज्य नैक क्षणम् ॥

इति सहसोत्थायासौ सम्भ्रममुपसृत्य तत्र नृत्यन्तीम्
तरुणीमतल्लिकां तां रंभां ब्रूतेस्म मन्दहासेन ॥

दोधकम्

"सुन्दरि ! का भवती ? कुत आयादाश्रममेत ? दथैष्यति कुत्र ?
कर्णरसायनकारिवचोभिः कारणमागमनस्य वद ! त्वम् ॥

पृष्टा रंभावादी "क्रीडार्थमिहागता सखीभिरहम्"
इत्याह सोऽपि "ललने मिथ्यैतत्त्वं तपःफलं मेऽसि" ॥

उदितामेवं मुदितां स्मितेन विनताननां भृशमुपगतः
मणिकन्धरोऽग्रहीत्तच्चेलाञ्चल मवगतादसीयमतिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोपं नटन्ती कृतकं वदन्ती रंभा "क्रियास्त्वं विबुध सखीर्मे
न पश्यसी, त्यस्य करं विकृष्य न्यपीपिडत्स्वस्तनयोस्सचेलम् ॥

मन्दाक्रान्ता

सख्यस्तस्या विकटमवलोक्यास्य कामार्तभावम्
सांतर्हासा अपिच परिवृत्याहुरन्यान्य "माहो !
श्रीमानेष स्मरशरहतः, कोऽस्ति रंभाकृतानाम्
लीलानामद्भुतमति" रिति स्वल्पशा दूरमायन् ॥

मन्दाक्रान्ता

आश्लिष्टस्तां तदनु मदनाविष्ट उत्कूलमोह
श्चुम्बन्नास्यं मधुरमधरं निष्पिबन्, पीडयंश्च
वक्षोजौ द्वौ, परवशतया सस्पृशंस्तत्कलाश्च
पुष्पास्तीर्णे ललितशयने प्रान्तकुंजे स रेमे ॥

शार्दूलविक्रीडितम्

चुम्बन्ती वदनं मुहुस्तनयुगेनाह्फालयन्ती च त
द्वक्षः स्तन्मधुराधरं बत ! कणेहत्यापिबन्ती मुहुः
नानाबन्धरतिक्रियाप्रमुदितस्वान्तं च तं कुर्वती
दीर्घं कालमपि क्षणेन सदृशं रंभा नयन्मौनिना ॥

शालिनी

क्रीडन्ती सा तेन साकं हसन्ती ब्रूतेस्म "त्वं * घोटकब्रह्मचारी
किंवासि त्वं ? गौश्च साध्वी, नतिष्ठेदुद्रिक्ता चेया न गत्वांतसीमाम् ॥

---

* घोटकब्रह्मचारी इत्याभाणकः । यथा घोटकोनयावद्वडवां पश्यति
तावन्न मोहाकुलः । यदि पश्येद्वडवां मोहाकुलस्तां न जहाति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गीतं कलभाषिण्याः शृण्वन् सिद्धः कथाप्रसंगेन
मणिकन्धरस्य नामोत्थापयतिस्म पुरतस्तस्याः ॥

कौतूहलेन साख्य "भगवन् ! शक्राज्ञया समागतया
मणिकन्धरस्य तपसः किमक्रियत रंभया विघ्नः ? ॥

दृष्टिं दत्तां तस्यां दिशी"ति कथितस्तथा स कृत्वाह
"किं तप ? उपभुंक्तेऽसौ तां रंभां कुसुमकुञ्जशयन" इति ॥

जलोद्धतगतिः

प्रणम्य कलभाषिणी तमवद
"न्मदीयसदने त्वमेधि ! कतिचिद्
दिनानि; भवतः पदार्चनविधिः
शुभाय भगवन् ! प्रकल्पत" इति ॥

भुजङ्गप्रयातम्

मणिस्तंभ आहस्म ते गानलुब्ध
श्शुभे ! मन्दिरं ते समायां, परो वा
सदा हिंडमानो महिम्नः प्रदर्श्य
प्रजा वञ्चयित्वा न कालं नयामि ॥

स्रग्विणी

कांक्षिता चेन्मम त्वद्गृहेऽवस्थिति
र्ज्ञायते नेतरैस्सा यथा तत्कुरु"

तथा यावद्युवतीं न वीक्षते तावद्ब्रह्मचारी। यदि पश्यति युवतीं यो न जहाति स घोटकब्रह्मचारी।

• गौः साध्वी न कदाप्युद्रिक्ता भवति। यदि भवति सीमांतं धावित्वैव तिष्ठति। न कदाप्यंतरे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यनेनोदिता सा वधूटी स्वयम्
तस्य शुश्रूषयाऽरञ्जयन्मानसम् ॥

मालिनी

त्रिचतुरदिवसेभ्योऽनंतरं सा लताङ्गी
धनपतिसुतसंगप्राप्तये कामयाना
मनसि निभृतमुत्थाप्याप्सरःस्त्रीप्रसंगम्
विविदिषुरवदत्त सिद्धमेकांतगोष्ठ्याम् ॥

"विस्मापयते मां यद्भुवनं मणिकन्धरस्य गाढतपः
एष पुनरपि च तप्तुं व्यवसित? उत रंभया रमते ?॥

इति, सिद्धः समीक्ष्याशां तामुवाच हसन्मुखः
"कलभाषिणि ! कुंजेऽसौ सुरवध्वा तपस्यति" ॥

इति, साहस्म पुनः "किं कुत्राप्यन्यत्र तौ विहर्तुमितः ?
तत्रैव वितिष्ठेते ? कृपया कथयंतु देवपादा मे" ॥

बहुकृत्वः पृच्छामीत्यत्र भवान् किन्नु मन्यत" इति हृदि
शंके; मर्षित्वा मां समीक्ष्य कथयंतु देवपादा मे" ॥

इत्थं तया प्रार्थित आह सिद्धः "अलंविशंक्य, प्रियकृत्तवाहम्
भवत्कृतेऽहं शतकृत्व ईक्षे" इति ब्रुवंस्तां दिशमीक्षमाणः ॥

संज्ञापयन्नेककरेण तन्वीं "मूका भवे"रित्यवधाय चित्तम्
आकर्ण्य"हंत ! प्रियतेयतीहि वागङ्गनाना"मिति स व्यहासीत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सकौतुकं 'तत्किमि' ति प्रपृष्टः पुनःपनश्चायमुवाच "भद्रे ! किं वच्मि ? नेशो हसितस्य भूयो निगृह्यमाणस्य समुद्गतस्य ॥

कृत्वा तपोभ्रष्टमयं मुनींद्रम्
रम्भा यदंतेऽकृत भाषणं तत्
धिक् ! श्रूयतां तं मणिकंधरं सा
निपात्य मोहांधतमिस्रकूपे ॥

स्पृष्ट्वा कला ओष्ठसुधां निपीय
मोहांधचेता अलसा च केल्याम्
आक्रन्ददेवं "नलकूबरारे !
मां मुञ्च मुञ्चातितरामखिद्ये" ॥

आत्मना रममाणायां रंभायां नलकूबरम्
स्मरन्त्यां तापसस्यास्य चेतो विद्धमिवाभवत्" ॥

शार्दूलविक्रीडितम्

इत्युक्ता कलभाषिणी कथयति" स्मार्य ! त्वया किं कृतो
हासः ? किं कुरुतेऽप्सरा ? निधिपतेः पुत्रस्तदीयः प्रियः
तां प्रीणाति यथा स्वचेतसि स एवास्ते लगन्नापरः
कुत्रायं बत ! वल्लभः प्रियतमां त्यक्तवार्तो आहिंडते ? ॥

"दृश्यता" मिति सिद्धस्य प्रणम्य प्रार्थितस्तया
"इयं हि तव कांक्षे" ति हसन्मन्दमवैक्षत ॥

पृथ्वी

निरीक्ष्य नलकूबरं ववचन तामवादी" दियम्
वधूरनुसृता यदि प्रियतमेन पत्या मुनेः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तपोविहतये भवेन्नहि समर्थी, यता
निवर्तयति मानसं न कुतुकं निजप्रेयस: ॥

तस्यादिंद्रस्य कोपायेत्यमूं नानुसरेत्प्रियाम्
न तस्या विप्रयोगाच्च सहते नलकूबरः ॥

ततस्स गत्वा मणिकन्धरस्य तपोवनस्यानतिदूर एव
अधोमहीजस्य मनोहरस्य सोत्कण्ठमुद्वीक्षत एतदर्थम् ॥

अभिधायेत्थं सिद्धः पुनराहास्मिन् मनस्तव स्निग्धे
श्लिष्टे, पुरेव गातुं न प्रभवसि, साधयामि शशिवदने ! ॥

आपृच्छे त्वामिति तं निर्जिगमिषुमाह सा पुन "भगवन् !
त्वदनन्यगतिं मां त्वं किं कर्तुं व्यवसितोऽसि गत्वे"ति ॥

शालिनी

आचष्टाऽसौ "सुंदरि ! त्वं किमात्थ ?
किं कर्तव्यं ? यामि चायामि भूयः"
श्रुत्वैतत्साह "त्वमुत्सृज्य मां प्र
त्यागच्छामीत्यात्थ बाढं वचस्ते ॥

बुभुक्षितस्य सद्योऽन्नमदत्वा "ऽगाच्छ ! पर्वणि
दास्यामि ते पायसान्न" मित्याह त्वादृशो जनः ॥

रथोद्धता

श्रूयतां मनसि मे स्थितं वचो मां नयेः कथमपि प्रियं मम
अद्य, नास्ति सदुपाय आत्मनो रक्षणेऽन्य इह, न भ्रियेऽन्यथा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

त्वद्दूजे तदुपायसाधनपटुः कोऽस्ती" ? ति संभाषिणीम्
सिद्धोऽख्यत्कलभाषिणीं "यदि मया ज्ञातोऽस्त्यपह्नूयते
किं त्वत्सुंदरि ! सङ्गमय्य विभुना हृष्टात्मनस्ते पुन
र्वीणागानमपूर्वमद्भुतमहं नाकर्णये ? किं ? वद ! ॥

क द्वारका ? तन्मणिकन्धरस्य तपोवनं यत्र निधीशसूनुः
क ? केन शक्यं व्रजितुं मुहूर्तेनैकेन तावत्परिचिंतय ! त्वम् ॥

गुरुप्रसादलब्धेन हरिणा वाहनेन मे
गन्तुं शक्यं चतसृभिर्घटिकाभिर्न तत्पुरा ॥

शार्दूलविक्रीडितम्

गन्तुं शक्यमपि श्रुतिं कुरु ! वचो मे; वाहनेन त्वया
यांतं मां गगनेऽभिवीक्ष्य मनुते लोकोऽन्यथा; वेत्ति कः
कस्य स्वांतगतं ? भवादृशवधूस्पर्शोऽपि नैवोचितो
मादृक्सिद्धजनस्य, नास्ति खलु मे दिव्यः प्रभावोऽपरः ॥

न दूरदृष्टिश्रवणे मदीये त्वत्कार्यसिध्यै पटुनी च; भद्रे !
मां ब्रूहि ! कर्तव्यमुपाय, मस्ति हितं चिकीर्षुर्यदपेक्षितं ते ॥

शिखरिणी

तदाकर्ण्याहैषा "भवति * सभवान् सिद्धपुरुषो
विशङ्कन्ते के वा ? जडजनवचः को गणयति ?

---

* यन्मां विधेयविषये सभवान्नियुंक्ते ॥
(मालतीमाधवे प्रथमांके नवमे श्लोके 'सभवान्' इति प्रयुक्तम्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न शंकेत प्राज्ञो, नहि समुचितः स्पर्श" इति मे
त्वयोक्तं, किं ते स्यादुचित इह भो मेऽसुविलयः ॥

किं बहुना ? भोस्तात ! न यावदागत्य मे प्रियसखीभिः
क्रियतेऽविदितहिताभिर्विघ्नं तावन्नय ! प्रियं मां द्राक्" ॥

स्रग्धरा

इत्युक्तो व्याघ्रचर्माच्छद‧ महिवरबद्धोदरं, शङ्खमालाम्
ग्रीवायां धारयन्तं; कनकविरचितौ पादवाहौ वहन्तम्
वश्यौषध्या खलीनं रचितमधिगतं चैकपार्श्वे दधानम्
कोशे खड्गं स सिद्धो हरिमुपगतमारुह्य‧ दृष्ट्वा च तन्वीम् ॥

"त्वमस्पृशन्ती कटिभागमस्य प्रारुह्य किं मामनुगच्छसी"ति
पप्रच्छ, साह"स्म्यनुकंपिता चेदियत्कुतस्त्वामनुयामि ने"ति ॥

अध्यास्य सिंहं कलभाषिणी तं प्रोवाच "देवाविदितं कथं माम्
*प्रियं पुरा प्रापयसी"ति, सोऽव्यदलंविशंक्याप्स्यसि तं मुहूर्तात्" ॥

इति निगदन् हर्यक्षं प्रचोद्य गगने पुनःपुनश्चामूम्
"भवितव्यं च भवत्याऽप्रमत्तये"त्युपदिशन् स निरगच्छत् ॥

मन्दाक्रान्ता

एवं यातो रभिमुखमथ व्योम्नि देवाङ्गनानाम्
बृंद मेघांतरगतिकृताद्रौंबरं, गायमानम्
दीव्यद्गात्रं, भृतपरिमलं गोचरीभूत, मासाम्
वाग्मी रम्भासुहृद इति ता ज्ञातवंतावुभौ च ॥

---

* यावत्पुरा निपातयोर्लडित्यनेन पुरायोगे भविष्यति लट् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवलोक्य तारवोचत्सिद्धः "किमिदं भवत्सखीं रम्भाम्
अपहाय गच्छ ? सैषा तत्रैव वसति मुनिमनुगृह्णाना ? ॥

स्मितानना्स्ता जगदु "निर्विघ्नः कथां मुनीशोः मणिकंधरस्य
तपोवने सा नलकूबरेण प्रियेण भुंक्ते कुसुमेषुकेलीः ॥

द्रुतविलंबितम्

प्रियसमागमहृष्टहृदं सखीं कथममूमपहाय तमुत्सवम्
अनुसरेति वदेम ? सुहृज्जनः कलुषमाचरतीदृशमत्र कः ?"॥

इत्युक्त्वा गच्छन्त्यो मिथोऽवदन् "व्योम्नि सिद्धयानचणः
एष कुतो वहति जटापटखण्डलताजिनानीत्थम् ॥

मंजुभाषिणी

रमणीशिरोमणिरियं कथं मुनेः
करमस्य मायिन उपागता बत ?
त्रिदिवे स्थिता यदि वधूरियं क्षणम्
कुरुते मरुद्विटगणं स्वसा"दिति ॥

रंभानलकूबरयोः संयोगकथाश्रुतेर्विंतेजस्कम्
कलभाषिणीमुखेन्दुं विलोक्य सिद्धो बभाषे ताम् ॥

"माकरोःस्म ! कलभाषिणि ! व्यथां मानसे कुरु धृतिं प्रतिष्ठिताम्
पश्य ! विश्वसिहि चेतसश्शुचं दूरयामि निमिषेण ते"त्विति ॥

हरिणी

विकसितमुखी तस्योक्त्याहस्म तं कलभाषिणी
"उपगमयसि त्वं मां सद्यः कथं नलकूबरम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हृदयरमणं रंभाश्लिष्टं ?" यदाह स "भोजनम्
कथमशिशिषुः पृच्छेस्त्वं मां तदायरुची ?" रिति ॥

तदा मृगेन्द्रो गगने चरिष्णुरुन्नभ्य कण्ठं न पुरः ससार
इतः पुराऽकुंठितशक्तिरप्ययमाभूदयं कुंठितपादवेगः ॥

पादाघातैः कशाघातैर्हुङ्कारै रतिभीषणैः
खलीनाकर्षणैश्चासौ सिद्धसिंहमपीपिड़त ॥

मुहुर्मुहुर्हताऽप्येवं न चकार पुरःपदम्
मुहुरुत्पुच्छयन्; गर्जन् पश्चाद्यातिस्म केसरी ॥

स्रग्धरा

संक्षुब्धात्मा त्रसंती क्षुभितमृगपतेः पृष्ठभागात्पतन्ती
स्विन्नाङ्गी, स्रस्तवेणी; विगलितकुचसंव्यानवासाः कथञ्चित्
गृह्णाना तत्कटीरं निजकरयुगलेनाह सिद्धं "किमेतत्
किम्वेतद्धो म्रियेऽहं क्षितितलपतिता· हा हतास्मी"ति चोच्चैः ॥

प्रहर्षिणी

सिद्धोऽरव्य"द्रुत ! कलभाषिणि ! प्रमादा
त्सिंहोऽसावरपथचोदितः प्रयाति
माभैषीर्युवति ! कटीरभागमप्र
मत्ताऽस्य स्वकरयुगेन संगृहाण !" ॥

द्रुतविलंबितम्

इति हरिं परिवर्त्य च पृष्ठतस्त्रिचतुराणि पदान्यवतार्य च
क्षितितलं स तया सह कांतया समवतीर्य जहौ चरितुं हरिम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वंशस्थम्

ततस्स तामाह "मृगेन्द्रवाहना
दयाल्यशक्तिः पुरतोऽस्ति; दृश्यताम्
न यांति भीता; प्रविलोक्य मन्दिरे
मृगेन्द्रमन्ये हरयोऽमुनाध्वना ॥

विस्मृतेन मया सिंहवाहनं चोदितं; भृशम्
पीडितश्च न यातिस्म देव्यालयपुरोऽध्वना ॥

देवीपूजा कल्पते नौ कार्यसिध्यै, ततश्शुभे !
एही"त्युक्त्वा गृहीतीच खड्गे देवकुलं गतः ॥

तां तत्र मण्डपं नीत्वा पुष्पाण्यवचिचीषया
सत्त्यर्चायै गतस्सिद्ध उद्यानं नातिदूरगम् ॥

हरिणी

पलितशिरसः संस्रस्तभ्रूयुगेन, वलीभिरु
च्छ्वसितकनकालेपाभाभिः, श्लथाङ्गकयष्टिना
शुषितलतिकागुच्छैर्वा निष्प्रभैरवलंबिभिः
कृशकरकुचैः कामत्यक्तं गृहं जरठाङ्गना ॥

शालिनी

आयाता काप्याह तां वीक्ष्य "कीरो
स्थूलोतुं वा पापकर्माणमेनम्
सिद्धं मत्वाऽशिश्रिय, स्त्वेष कुत्र
हन्त ! प्राप्तस्तेऽतिशोच्यासि जाते ! ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृथ्वी

अपूर्वमतिसुन्दरं तव शरीर, मेतां वनीम्
विलिंपतिविभागणैर्बहु करोति दर्पं मे
कठोरतरचेतसः करमवाप पापीयस
स्त्वमूदृशममूल्यवस्त्विति नितान्तदुःखिन्यहम् ।

पलायतां द्राग्भवती न यावदायाति पापी विनिवृत्य बाले !
द्रष्टुं क्षमा नास्मि मनोज्ञमङ्गं तवास्य खड्गेन निकृत्यमानम् ॥

जिज्ञासते मे हृदयं कथां ते शङ्के विलम्बेन भवेदनर्थः
तवेति, जाते ! वरमेष यावन्नोपैति तावत्प्रपलायनं ते ॥

पृथ्वी

किमेष जनकोऽथ ते सहज ? आप्तबन्धुः प्रियो ?
भवद्धितचिकीर्षयात्र भवतीं गृहीत्वेत्यसो ?

अहं नहि जडाप्रियं वच इदं तवास्यात्तु, म
स्त्यनेन कृतपातकं प्रतिदिनं विजानेऽङ्गने !" ॥

निशम्य वृद्धावचनं वधूटी स्वामाह "तर्कैर्मम संवदन्ति
वर्षांस्यमुष्या· अमृषैव सिद्धो मायालु, रेतद्ध्वनितं वचस्तु ॥

मुहूर्तमात्रेण मनश्शुचन्ते दूरीकरोमी"ति स आह मां प्राक्
यथेयमम्बाऽवददेष देव्यै समर्पयेन्मामिति तथ्यमेव ॥

वसंततिलका

कोक्कावनस्य नगरे किल चक्रपाणे
र्जाता, कुलेन गणिकापिच माननीया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिष्या च नारदमुनेः कृतगीतशिक्षा
देवीभिरंबुजदृशोऽभवमद्वितीया ॥

अंते मायाविना सिद्धेनास्मि शक्तेर्वलिः कृता
परिमार्ष्टुं लिपिं धातुर्नहि केनापि शक्यते ॥

इति हृदये शोचन्ती मुहुः स्मरंती सखींश्च बन्धूंश्च
"अनुभोग्यं प्रारब्धं विनानुभोगान्न नश्यति जनस्य" ॥

इति कथमपि संस्थाप्य स्वांतं धृत्वा प्रजातगद्गदिकाम्
विनिरुध्य; प्रणिपत्याब्रूतैषा वृद्धभामिनीं तरुणी ॥

वसन्ततिलका

"मात ! स्त्वदीयवचनं सकलं च सत्यम्
मायालुरेष इति नावगतोऽनुसृत्य
सिद्ध्येन्मनोरथ इति प्रबलाशयाऽहं
मायामिमां विपदमम्ब ! कथं तरेयम् ॥

अयं शीघ्रगतिस्सिद्धो मया कुत्र पलाय्यते ?
अप्यस्ति दूरदृष्टिश्च गूढां कुत्रापि वीक्षते" ॥

वृद्धाऽह "किं ते विदितास्य दूर
दृष्टिः ? स्ततस्साख्यत "वंचितास्मि
शक्त्यामुयै"वेति तदागमादिं
कथां प्रवृत्तां विदितांचकार ॥

कथाप्रसंगेन कुलञ्च नाम विद्यां निवेद्यात्ममनोरथञ्च
"आरुह्य वृक्षं फलकांक्षयाऽहमगाधगर्ते पतितेत्यरोदीत ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मंजुभाषिणी

जरती तदाह तव सूनृतं वचो
भवतीं प्रलोभ्य स खलः समानयत्
स्वमनोरथस्य फलसिद्धयेऽस्य किम्
कथयामि दूरमधिरूढमीहितम् ॥

उपार्ज्य दूरश्रुतिदूरदृष्टी दुस्साहसैस्संप्रति राज्यलिप्सुः
अनेकशोऽश्रौषमपेक्षमाणं राज्यश्रिये तद्युगलेन सार्धम् ॥

तदर्थमन्विष्यति दूरदृष्टिं प्रसार्य लोकोत्तरगीतवित्ताम्
सुरूपिणीं वारवधूं चिरात्स यां देवताया उपहर्तुमिच्छुः ॥

वीणावादनकुशलोऽसावपि गायन् विपञ्चिकया
दूरश्रवणमहिम्ना शृणोति दूरगतगीतवाद्यानि" ॥

पृथ्वी

तदाह कलभाषिणी "जननि ! दूरदृष्टिश्रुती
अनेन समुपार्जिते इह पुरा ! तदर्थं बत !
शिरांसि दलितानि क ! त्यकरुणेन ! मे कथ्यताम्
दृढं खलु भवेदमूदृशकथाश्रुतेर्मानसम् ॥

भवितव्यं भवत्येव वृथा रुदत्या मयात्र किं लभ्यम् ?
अतिवाह्यः कालश्च यावदसौ दुश्शठः समायाति ॥

संश्लाघ्य तस्याश्चरितं धृतिंच वृद्धाह "साध्वी भवती शृणोतु
दूरश्रुतेर्दूरविलोकनस्य मार्गौ न घोरा; वतिसाहसौ स्तः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्पाट्य नेत्रे नखकृन्तनेन शस्त्रेण कर्णद्वितयं च विध्वा
उपार्जयत्साहसिकस्स दूरदृष्टिश्रुती देवकुले पुराऽत्र ॥

"एही"त्युक्त्वा नीत्वा तरुणीं सन्दर्श्य देवकुलम्
तत्रस्थशिलास्तम्भे प्रालंबितशस्त्रयुग्मञ्च ॥

गन्धपुष्पार्चितं खड्गं कर्तरीं चापि, "पठ्यताम्
अत्र यल्लिखितं स्तंभे लिपिं जानासिचे,"दिति ॥

पृथ्वी

* पपाठ कलभाषिणी लिपिममू "मिहाब्दद्वयम्
जनस्य भुवनेश्वरीमनुजपस्य कर्तुः फलेत्
अभीष्टमखिलं, शरद्वयहृताक्षिकर्णो जनो
लभेत किल साहसी महितदूरदृष्टिश्रुती ॥

यश्छिनत्त्यसिना जिह्वां स भवेद्विद्वदग्रणीः
कृत्ते शिरसि कर्तर्या जीवन् हन्ति स्वघातिनम् ॥

राज्यश्रीर्लभ्यते देव्यै सुन्दरी गायनीमणिः
समर्पिता वारकांता यदि साहसकर्मणा" ॥

---

* अलघुव्रतो भुवनेश्वरीमन्त्रमत्रवर्षद्वयं जपित्वा स्वकलत्रपुत्रलाभमविंदत। मणिस्तम्भश्शरद्वयविद्धनेत्रश्रोत्रो दूरदृष्टिदूरश्रवणशक्ती अलब्ध। जिह्वां छित्त्वा मणिकन्धरःकवितासम्पदमवाप। शल्यासुरः स्वकण्ठं खण्डयित्वा स्वघातुकं मणिकन्धरमवधीत्। मणिकन्धरः कलभाषिण्याः कण्ठं विच्छिद्य जन्मन्यन्यस्मिन् राज्यश्रियं प्रापत्। सुमुखासक्तिः कलभाषिणीरक्षायै स्वकण्ठमर्पयित्वा यौवनमध्यगच्छत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इयत्पठित्वात्मवधं विदित्वा निस्संशयं निश्वसती मुहुश्च
स्रस्तां स्वाचित्तादधृतिमाकलय्य निगृह्य शिष्टं पठतिस्म चैवम् ॥

वसंततिलका

"उक्तेषु नैकमपि कर्तुमलं विधिं यो
देव्याः पुरस्स विसृजेद्यदि निर्भयोऽङ्गम्
वृद्धः कुतोऽपि पुनराप्स्यति यौवनं स्वम्
सिद्ध्येदसौ मरणकालमनोरथे च" ॥

श्रुत्वा तत्पठितं वृद्धा प्राह मन्दस्मितानना
"अस्य हेतोरहं जाते ! वसाम्यत्र चिरादपि ॥

नाम्ना सुमुखासक्तिः काश्मीरख्यातशारदापीठे
देव्या अभ्यर्चयितुर्विप्रोत्तंसस्य पुत्री" ति ॥

सिद्धो वनादर्चनसाधनानि संपाद्य पुष्पप्रभृतीनि तत्र
आगत्य पृष्ट्वा कुशलञ्च वृद्धामामन्त्र्य नाम्ना तरुणीमुवाच ॥

"गन्तव्यो दूराध्वा समर्च्य देवीं व्रजाव, आयाहि
तामामन्त्र्य त्वरया विलंबनं कार्यभङ्गाय" ॥

शालिनी

इत्युक्ता भीकंपिताङ्गी वधूटी
वृद्धामूचे "मात ! रेकाकिनीह
देव्यागारं संप्रवेष्टुं बिभेमि
मामन्वेहि ! स्निग्धवृत्त्या तनूजाम्" ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदाह सिद्धोऽ"त्र मयि स्थिते किम्
बिभेषि ! किं ते जरती करोति ?
मया सहागत्य बहोश्च दूरा
दभीतचेता इह किं बिभेषि ? ॥

शार्दूलविक्रीडितम्

उक्त्वैवं भयविह्वलामपगतच्छायाननां वीक्ष्य ताम्
"किं वृद्धावचनैरियं मम मनोभावं व्यजानाद्धत !
किंस्याद्विघ्नः ?" इति प्रकोपितमतिः प्राहोच्चकण्ठेन "किम्
वृद्धैषात्र सहायिनी भवति ते ! वीक्षेऽह" मित्युद्धतः ॥

सन्नद्धः केशेषु ग्रहीतुमुपयाति यावदेषा सा
आश्लिष्य व्यक्रोशद्वृद्धा "मम्बाव ! पुत्रिकां त" इति ॥

कृपाद्रुतात्मा जरठाङ्गना सा कृत्वा स्वपश्चात्कलभाषिणीं ताम्
मुहुर्मुहुः प्रार्थयतेस्म "रक्ष रक्षे" ति सिद्धं परिगृह्य पाणी ॥

सिद्धो वदं "स्त्वं जरठे ! चिकीर्ष
स्येषा यथा गर्भगृहं न यायात्
देव्या अयं चाभिमुखीनदेश"
इति कुथाऽस्याः परिपीड्य पाणी ॥

निर्धूय पश्चाज्जरतीं कठोर एकेन हस्तेन जटां गृहीत्वा
बध्वा द्वितीयेन गृहीतखड्गो देवीं प्रणम्योर्ध्वकृतात्मबाहुः ॥

"गृह्णातु देवीद" मिति ब्रुवाणो
यावच्चिकृत्सुर्युवतेश्शिरोऽसौ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तावत्प्रवृद्धाह "शपामि देव्याः
पद्भ्यां त्वमेनां यदि हंसि बालाम्" ॥

एवं ब्रुवती गत्वा कलभाषिण्या गले स्वकीयगलम्
आरोप्याश्वात्करुणातरङ्गितेन हृदयेन बत ! ॥

वृद्धा पुनः प्रोच्य च "सिद्ध ! रे रे ! कार्यं नसिध्येदवधीर्यतेचेत्
देव्यां प्रतिज्ञे"ति निरीक्ष्य देवीं "मां सत्यवाणीं भवती करोतु" ॥

इति ब्रुवत्या जरठाङ्गनाया निकृत्य शीर्षं प्रथमं; वधूट्याः
वेणीं गृहीत्वा यतते च यावच्छेत्तुं शिरस्तावदभूद्विचित्रम् ॥

अवधीरयते शपथं सिद्धाय मृगेन्द्रवाहना देवी
कुपिता विक्षिप्यामुं दविष्ठदेशे निपातयामास ॥

॥ इति चतुर्थस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ पंचमस्सर्गः

सिद्धस्य खड्गघातेन छिन्नकण्ठाऽत्र मायिनः
स्तम्भलिप्युक्तरीत्याऽभूज्जरती युवती क्षणात् ॥

शार्दूलविक्रीडितम्

राकेन्दुं हसताननेन; निबिडैर्नीलैरलैः कचै,
राकर्णायतदृग्द्वयेन, मुकुरद्युत्या कपोलश्रिया
पीनोरोजयुगेन, कोमलकरद्वय्या; कृशेनोच्चल
न्मध्येन, स्फुरता नितम्बयुगलेनाभाद्यथा मोहिनी ॥

ददर्श सिद्धं द्युपथेन यांतं देव्या महिम्ना प्रहतं प्रणुन्नम्
एकेन हस्तेन धृताऽसि, मन्येनाकृष्टवन्तं कलभाषिणीं सा ॥

वंशस्थम्

अवेक्षमाणा कलभाषिणीदशाम्
विषण्णचित्ताऽभवदम्बुजेक्षणा
अवाप्तकामोऽप्यनुकम्पनो जनः
परे विषण्णे न विनोदमश्नुते ॥

क्रमादसौ संसरणस्वभावविचारमार्गेण विमुक्तशोका
त्यक्तेहचिंता हृदि निश्चिकाय विनेतुमामुत्रिकजीवयात्राम् ॥

देवीकृपासादितयौवनं न यथा वृथा स्याद्विनियम्य चित्तम्
सा योगविद्यार्जनदीक्षमाणं चकार देवीं स्वगुरुं विभाव्य ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मंजुभाषिणी

कलभाषिणी कतिपयैर्दिनैः पुन
स्समुपेत्य यत्र हि मृगेन्द्रवाहना
तरुणीं विलोक्य परिपृच्छ्य तत्कथाम्
प्रणनाम विस्मितमतिः स्वरक्षिकाम् ॥

सुमखासत्तिरपृच्छत् "तरुणि ! त्वन्तु प्रभावतः शक्त्याः
सिद्धेन सहोत्क्षिप्ता कुत्रापप्तोऽक्षताऽगतात्र कथम्" ॥

महदिदमाश्चर्य" मिति ब्रुवतीं कलभाषिणी प्रणिजगाद
"नहि मे चरितं चित्रं चित्रं, चित्रतरमम्ब ! ते चरितम् ॥

वंशस्थम्

प्रपूतधर्मेण मृगेन्द्रवाहना नितान्तहृष्टा तव जीवितं पुनः
ददौ; न चित्रं वरिवस्यया तवाक्षताऽगता यत्तव सन्निधिं पुनः ॥

अंब ! कथयामि चरितं मदीयमवधीयता" मिति निगदितुम्
यावत्प्राक्रं "स्ताहं तथे"त्युपागतमदर्शदाप्तजनम् ॥

स्कन्धेन वीणां जपमालिकाञ्च करेण; शीर्षेण जटाकलापम
वहन् कुतस्त्योनुसमाययौ स्वर्महर्षिशिष्यो मणिकन्धरोऽत्र ॥

अवितर्कितोपयातं निरीक्ष्य विस्मयवती युवती
उपगत्य तं सहर्षं मूर्ध्ना प्रणिपत्य दूरेऽस्थात् ॥

दृष्ट्वा, विकसितवदनो मणिकन्धर आह "भो दिष्ट्या
दृष्टेव बन्धुकोटिभियात्र ? भवतीं विलोकयता ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृथ्वी

मम स्मरसि सुन्दरि ! त्वमिह केन वा हेतुना
विहाय गृहमागता ? नहि पदं भवत्या कृतम्
गृहाद्बहिरितःपुरा, मम विचित्रमाभाति किम्
श्रियो मणिगृहा वनान्यपि यथापुरं संति ते ? ॥

ततः कदापि त्वमया मुकुन्द
सेवार्थ ? मञ्जाक्षि ! हरिःपुरेव
मणीमयं सौधमलङ्करोति
वा ? ध्युष्य तत्रैव करोति गोष्ठीः ? ॥

उपायनार्थं हरये मरुत्वन्निर्मीयमाणं मणिमण्टपं तत्
समाप्तमासी ? द्धरिनीलवेद्यः स्थितास्तथैवास्व हि यत्रचावाम् ॥

प्रवर्धमानस्य हरेः कुटुंबस्येदं न पर्याप्तमिति प्रवृद्धैः
संकल्पितं यद्भवनं समाप्तं ? हर्म्याणि नूत्नानि च निर्मितानि ? ॥

वसन्ततिलका

किं स्मर्यते कुटिलकेशि ! मया कदाचि
न्छ्रीमंटपं प्रविशता प्रणतं भ्रमित्वा
बिंबं हरेः स्फटिकभित्तिगतं निरीक्ष्य
सर्वेऽहसन्, किमु तदास्ति मनोज्ञकुड्यम् ? ॥

नीतस्त्वया द्यूतगृहं कदाचि
दन्तःपुरे प्रैक्षिषि यत्र कीराः
"जितोऽसि, भूयोऽपि पणस्व, भूयो
जितोसि, गच्छे"ति रुवंति नित्यम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं पृष्टा सुहृदा प्राहस्म "यथातथं सुष्ठु
सकलं भार्तींद्रचहूकृतमण्टपमपि समाप्त" मिति ॥

नाराच:

पुनरपि मणिकन्धरः प्राह "विद्याप्रसंगेषु मे
स्मरसि मनसि ! दण्डको मत्पणीतस्त्वया कुत्रचित्
पुनरपि पठितो ? हरिं सेवितुं नारदोऽस्मद्गुरु
र्भवति ! मुनिवरो यथापूर्वमायाति किं प्रोच्यताम् ॥

उपहृतवत्यः श्रेष्ठां परीक्ष्य देव्यो विपञ्चीं ते
नानीता सा किमिति ? त्वया कुतः शून्यहस्तयाऽयातम् ? ॥

गुरुशुश्रूषाकाले श्रुतं मया कांक्षितं किमप्यस्ति
तव चेतसीति; तस्य व्यरमो हेतुर्विपञ्चिकाभ्यासात् !" ॥

मंजुभाषिणी

सुहृदा प्रविश्य कलभाषिणी तथा
गदिता जगाद "किमु वच्मि मे कथाम् ?
प्रबलेन तेन खलु दूरबन्धुता
क्लिशितास्मि दुर्गमवनेऽहमीदृशी" ॥

शार्दूलविक्रीडितम्

इत्युक्त्वा स्वकथा मशुश्रवदसावामूलमेनं मणि
स्तंभस्यागमनाच्छठस्य सुमुखासत्त्या कृतं रक्षणम्
यावत्प्राहच "सेयमेव महती साध्वी"ति, तस्याः कथाम्
चामूलं श्रुतिगोचरामकुरुत श्लाघ्यामघच्छेदिनीम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साख्यत्पुन "स्ते तपसोंतारयं रंभाकृतं सिद्धमुखादवेदम्
ततःप्रवृत्तं चरितं त्वदीयं जिज्ञासते मे हृदयं वदे"ति ॥

तदैव सिद्धोऽपि कुतोऽपि तत्र समागतो या परिदृश्य सैषा
सविस्मितं तं मणिकन्धरं जगा "दायं स सिद्धो भणितो मये"ति ।

मणिकन्धरो वदन् "किं ? स एव वा सिद्ध एष" इति दृष्ट्वा
दरहसितमुखस्समुचितमेनं संभावयामास ॥

सिद्धो मणिकन्धरकलभाषिण्योरागमेन तत्र हृदि
विस्मयमानोऽपृच्छ "त्कुतो युवाभ्यामिहायातम् ? ॥

कलभाषिणीमवोचत पुनरपि सिद्धो" गवेषिताऽभूस्त्वम्
तरुणि ! मया, कुत्रापि न दृष्टाऽयाता कुतो ? विचित्र"मिति ॥

ततस्स सुमुखासत्तिं वीक्ष्य "का त्वं शुभे ! वद"
इत्युक्त्वा विदितोदन्तस्तया तां तुष्टुवे मुहुः ॥

सुमुखासत्तिरपृच्छद् "व्युत्क्षिप्तस्सिद्ध ! शक्तया त्वम्
कलभाषिण्याऽपन्नः कुत्र ? कथं चाक्षतौ युवां ? चित्रम् ॥

आवेदये"ति भणितस्स आह "नह्येकमेव चित्रमिदम्
संति बहूनि; त्वरयत्यावेदयितुं मनो; ऽवधाय शृणु ! ॥

नाराचः

"शपथमविगणय्य ते दुर्मदांधेन चित्तेन मां
धिं", गसिलतिकया शिरोधिं तथा खण्डयित्वा तव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहमथ कलभाषिणीकेशपाशो गृहीतो शिर
स्त्ययतिषि विनिकर्तितुं, सद्य एवापतं दूरतः ॥

शार्दूलविक्रीडितम्

आकर्ण्यास्य वचस्तदाह सुमुखासत्वि "गृहीत्वा कचे
ष्वेकेन त्वमुदायुधेन च करेणान्येन संस्तभिना
उत्क्षिप्तो गगने व्रजन् बत ! मया दृष्टोऽभवः प्राप्तया
रूपं नव्यमिदं, ततस्तव कथामावेदयास्मा"निति ॥

रथोद्धता

सिद्ध आह "सह कांतयानया दूरवर्तिमणिकन्धराश्रमे
अक्षतः कुसुमतल्पकेऽपतं किन्नु शक्तिकृतमेतदद्भुतम् ? ॥

भयप्रतिष्टब्धशरीरयष्टिरमुञ्चमानं निजकेशपाशम्
खड्गं च हस्तात्पुरतो विलोक्य मां वेपमाना तरुणी वितस्थे ॥

नाराचः

गलितसुधमिवेन्दुबिंब विवर्णं मुखं, दृग्द्वयम्
चकितचकित, मश्रुगण्डस्थलीलग्नकैश्यं बत !
परिपतितकुचांशुकं धारयन्ती नवं विभ्रमम्
व्यकृत कमपि सुन्दरीयं, सदा सुन्दरी सुन्दरी ॥

साध्वसनाम्ना गुरुणा युवतीयं शिक्षितेव बहुलीलाः
प्रकटयतिस्म तदानीं क्षुब्धेव श्रीः स्मरस्य भातिस्म ॥

दृष्ट्वेमां कामार्तो भ्रष्टविवेकस्समाश्लिक्षम्
स्याच्चेदात्मोद्धाटितमात्मकृतं पाप्म नश्यतीत्याहुः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिखरिणी

तदैषा व्यक्रोश "च्छठमतिथं सिद्धहतको
बलान्मां गृह्णीते, त्वरितमुपसृत्यावत ! जनाः
न वा किं ? कोऽप्यत्रे, त्युदितकरुणः कोऽपि सुजन
स्ततो "मा माभैषीरयमहमुपैमी"ति च रटन् ॥

वसन्ततिलका

" रे ! जाल्म ! कस्त्वमसि ? मानवतीं पुरन्ध्री
मेवं बलाद्विकुरुषे, विजहामि न त्वाम्
उत्पाटयामि तव दुष्ट ! शिरश्शिराभि
स्त्वामन्वयामि च पलायितमादिगन्तम्" ॥

इति प्रगर्जन् प्रलयाभ्रकल्पो निर्गत्य कुञ्जान्नलकूबरो माम् ॥
अमूं विमुच्य प्रपलायमानं निगृह्य पश्चादनुधाव्य दूरम् ॥

मन्दाक्रांता

" रे धूर्त ! त्वं न भवसि मदोन्मत्त एवं बलात्काम्
गृह्णीषे स्त्रीं ? तव न हि सहे मानभङ्गापचारम्
एह्येह्यस्ति क्व च ? किमकृथा ? दर्शयागत्य तां मे
प्रायश्चित्तं समुचितमहं ते करोमी"ति रूक्षः ॥

कथमपि विचेष्टमानं स्वकीयहस्ताद्विमुक्तये बहुधा
अविमुच्याकर्षन् मां प्रत्यानिन्ये बलादसौ पश्चात् ॥

स्रग्धरा

आयाता तत्र रंभा विशिथिलितकचान् ग्रथ्नती केशपाशम्
वक्षः प्रच्छादयन्ती परिगलितपटे नासृजन्ती च नीवीम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुर्वत्यूर्ध्वं स्वफाले पतदलकचयं लीलया, पल्लवांश्च
तल्पे लग्नान् नखाङ्कानिति करलतया संस्पृशन्ती च भूयः ॥

नलकूबरस्य मार्गं स्ववल्लभस्यानुसृत्य संभ्रमतः
आगत्य तत्समीपं नासांगुलिका चचक्षे तम् ॥

मालिनी

"बत ! किमिति भवन्तं वच्मि ? हस्ते न शस्त्रम्
किमपि च, तव युक्तं किं ? यदागम्यतेऽत्र ?
प्रिय ! तव विरहेणाद्यासि खिन्नातिमात्रम्
त्वलमलमयि ! भो दुस्साहसेनैहि ! तावत्" ॥

इति वल्लभमुक्त्वा, मां निरीक्ष्य चाख्यत् "किमेष पुण्यात्मा
तादृग्दुष्कृतकृद्धिक् ! स्वच्छन्दचरं सुमास्त्रहतकं तम् ॥

सा कुत्र गते" त्यवदन्नलकूबर "एतदर्थमेवायम्
श्रीमान् गृहीत" इति, सा प्राहस च "तामदर्शयित्वाऽसौ ॥

कुत्र गमिष्यत्यधुना ? एनं मुञ्चे"ति मोचयामास
अनुसृतवद्भ्यां ताभ्यां सहगत्वेक्षे प्रसूनतल्पं तत् ॥

नहि दृष्टा तत्रैषा, ततस्स आह प्रियां "स एतस्मिन्
असत्तल्पे बध्वा तया रिरंसुः किलायातः ॥

सिद्धत्वादस्याईति सिद्धं तल्पमिति मन्दहासेन
तत्रस्थं मम खङ्गं हस्ते कृत्वाह" युद्धवीरोऽयम् ॥

इति सा प्रहसन्त्याह च "न केवलं वीर, एकवीरोऽसौ
कथमन्यथा पलायत ? विसृज्य खङ्गं प्रवेपमान !" इति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनरपि मां नलकूबर आहस्मा "सौ वधू रे ! गुप्ता
कुत्र ! ब्रूही"ति मुहुर्मुहुश्च विधुवन् मम स्कन्धौ ॥

शिखरिणी

चिरं मां क्लिश्नंतं प्रियतममसावरुयत "भवेत्
प्रविष्टैतत्त्यक्ता गहनविपिने कुत्रचिदमुम्
विमुच्चावां गत्वा युवतिमधुना काननभुवि
प्रियान्विष्यावोऽमुं जहिहि ! कृतमेतेन लघुना" ॥

इंद्रवंशा

एवं वदन्ती कण्वलिकां प्रिय
स्कंधे परे न्यस्य कुचं यथा करम्
तस्य स्पृशोत्सा भृतरामहर्षणा
दूरं गता तेन सहोल्लसन्मनाः ॥

निलीयताश्यामनुसृत्य यातः क्रीडारताभ्यां विगतस्मृतिश्चाव
कुत्रापि खड्गं परिवर्जितं मे पुनर्जिघृक्षुर्गहने सुदूरम् ॥

गुरुप्रसादलब्धं तं खड्गं हातुं न मे मतिः
प्रेयानसौ मम यथा रम्भाया नलकूबरः ॥

शार्दूलविक्रीडितम्

किंचामृग्यत दूरदृष्टिविभवेनाभ्यन्तरे कानने
तत्रैषा नहि कुत्रचिच्च युवती दृष्टा, विचित्रं महत्
ताभ्यां कुत्र च नेक्ष्यतेऽन्विति धिया चाहं गतोऽन्वीय ता
वन्ते रम्यलतागृहं विविशतुश्चिक्रीडिषू दम्पती ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसंततिलका

निर्विश्य पुष्पशरकेलिमुभौ रतान्ते
सम्मर्दनान्मृदितभूषणचेलचोलौ:
यावत्परिष्कुरुत उन्मनसौ मिथश्च
रम्भाऽपराऽऽगतवती नलकूबराय ॥

द्वितीयरम्भा प्रथमां विलोक्य व्यस्मेष्ट चित्तः नलकूबरश्च;
उद्भ्रांतचेता भवतिस्म दृष्ट्वा सविस्मयं प्रैक्षिषि चास्मि सर्वम् ॥

स्वकीयरम्भामपरां च रम्भां निधीशपुत्रो बहुशो व्यलोके
वयश्च, रूपञ्च, दुकूलभूषाभाषास्तयो रेकविधा, न भेदः ॥

पश्यन्तमेनं नलकूबरं सा
रम्भाऽदिमा प्राह "किमेत ! दित्थम्
मुहुर्मुहुः पश्यसि ? ताञ्च माञ्च
किमस्ति चित्ते तव ? मां वदे"ति ॥

प्राह स "युवयोः कस्याः का प्रतिबिंब ? मिति विभ्रान्तः
निर्णेतुमप्रभुरहं पश्यामि पुनः पुनश्च वामधुना ॥

किं बहुना कथितेन ? त्वमपेया यदि मुहूर्तमपि पार्श्वात्
न विशेषं निर्णेतुं युवयोः प्रभवामि, सत्य"मिति ॥

वसंततिलका

श्रुत्वा प्रियस्य वचनं नलकूबरस्य
संक्षुभ्य गाढममुकं परिरभ्य रम्भा
प्राहस्म नैव विजहामि मुहूर्तमात्र
मालिंगनं तव, कुतोऽवततार रक्षः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धृत्वा मदीयं वपुरञ्जसैषा समागता वञ्चयितुं बत ! त्वाम्
निष्कास्यतां दूरमियं पिशाची द्रुतस्त्व ! मास्याः प्रिय ! दुश्शठायाः ॥

इति, नवरम्भा दृष्ट्वा नासाग्रन्यस्तांगुलिर्विषण्णमतिः
शीर्षञ्च कम्पयन्ती निश्श्वसती दीर्घमास विष्टब्धा ॥

हरिणी

निधिपतिसुतस्तां दृष्ट्वाहस्म "सुन्दरि ! का त्वं ? मा
गम इह कुतः ? स्थित्वा दीर्घं विनिश्श्वसती कुतः ?
अपिच युवतेर्मे रूपं चाधरद्भवती कथम् ?
दनुजवनिता किं त्वं ? घोरा पिशाच्यसि वा वद ! " ॥

शालिनी

इत्युक्ता साऽब्रूत किं वच्म्यहं ? त्वम्
यत्प्राक्थैतद्युक्तमाभाति तावत्
यावद्वाचो मे प्रयोगेन केना
प्यादर्तव्यास्ते भविष्यन्त्यवश्यम् ॥

जलोद्धतगतिः

यथा त्वमवदस्तथाहमसुरी पिशाच्यपि च भो ! न सूनृतकथा
हुते भुवि चिरं ततस्सुविदितो भवेस्त्वमसुरी पिशाच्यपिच का ? ॥

भवता च श्रुतपूर्वा श्रत्युक्ति "सत्यमेव जयत" इति
लोकोक्तिरपिच "सलिलं निम्नं वेत्तीश्वरश्च सत्य"मिति ॥

रथोद्धता

ईश्वरोऽपि मम न त्वदस्ति वा ? प्राणनाथ ! स भवान् ममेश्वरः
तत्त्वमेव परिचिंतयावयोस्सत्यसूक्तिमवधाय मानसम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिखरिणी

नमेरुच्छायायां कुसुमशयने त्वं सह मया
रतिक्रीडालोलो युवतिरुदितं किंचन बत !
निशम्योद्वेगार्त्तां दिशमभिगतः स्वामनुसरं
त्वहं रुद्धा केनाप्यशुभशकुनेन प्रियतम ! ॥

अत्रान्तरे मां विदितां निरुद्धां कथं मदीयाकृतिमाकलय्य
मायाविनीयं समुपस्थिता त्वां कस्मात्प्रिये विद्धि ! विविच्य बुद्ध्या" ॥

इति कथयन्त्यां तस्यामाश्लिष्टैवरूहस्तेन
प्रथमा रम्भा स्ववरं नलकूबरमाह मन्दहासेन ॥

"अस्मत्कथमीक्षणिकेव सर्वां ब्रवीति संदृष्टवती कथं नु ?
स्वयं भवत्सङ्गतिमाश्नुनति स्वैवाऽन्वगात्त्वामिति च ब्रवीति ॥

नेयं वनिता, प्रियतम ! पिशाचिकैवेति वक्तव्या
कथमन्यथा कथां नावामूलं प्रभवति द्रष्टुम् ? ॥

इन्द्रवंशा

मायाविनीयं मम रूपधारिणी
विश्लिष्य मां त्वद्भवता रिरंसते
भाषास्तदर्थाः कति हन्त ! शिक्षिताः
आशङ्कते किं कुलटापभाषितुम् ? ॥

विवञ्च नयनमध्यादपहर्तुमियं मलिम्लुचा कुशला
नहि युक्तमिह स्थातुं न प्रतिकर्तुं प्रभू सति विरुद्धे" ॥

एवं निष्कासयितुं स्वां स्वपतिं प्रेरयन्तीं ताम्
प्रथमां द्वितीयरम्भा तीक्ष्णाहणदृककंठरवाचाह ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"उज्जभसे कुतस्त्वं ? गृहलेपेनैव पर्व संपन्नम् ?
इयतैव त्वं स्वीया भव ? स्यहं स्यां नु परकीया ? ॥

मम वल्लभोऽयमसिना छिनत्तु शीर्षं, व्युदास्य तुभ्यमहम्
विजहामि किं मदीयं रमणं रसवद्रसालफलमेतत् ? ॥

एवं त्वां मम पुर आश्लिष्टां प्रेयांसमीक्षितुञ्च नहि
शक्यं, धित्त्वां; हंजे ! मुक्त्वा मत्प्रियमपेहि ! दूरं द्राक् ॥

स्वत्वमुद्राङ्कनेनाप हृतं वस्तु भवेत्किमु
चोरस्यैव ? त्वदाश्लिष्टः किं ते भर्ता भवत्यसौ ?" ॥

ततो मिथो द्वे च रंभे असोढवान्योन्यभाषितम्
विपंच्यौवा छिन्नतन्त्र्यौ मुहुरुच्चैर्व्यजल्पताम् ॥

रथोद्धता

"त्वं पिधेहि ! मुख" मित्युदीरिते
"त्वं पिधेहि ! मुख" मित्युदीरितम्
"माटपस्त्व" मिति भाषिते पुन
"माटपस्त्व" मिति भाषितं पुनः ॥

"न त्वां मन्ये तृणाये"ति धिक्कृते चैकया क्रुधा
"न त्वां मन्ये तृणाये"ति धिक्कृतं चान्यया रुषा ॥

"हण्डेऽपेही"ति रसिते "हण्डेऽपेही"ति रासितम्
उक्ते "माविस्मरे"त्युक्तं भूयो "माविस्मरेति" च ॥

"कियती त्व"मिति प्रोक्ते "कियती त्व"मितीरितम्
"पश्यामीत्यब्रवीदेका" "पश्यामीत्याह " चापरा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"न युक्ता पत्युरन्यस्या अपेक्षे"त्येकयोदिते
"न युक्ता पत्युरन्यस्या अपेक्षे"त्यन्ययोदितम् ॥

एवं प्रथमा रंभा द्वितीयया रंभया प्रियेण शतम्
वारान्निवारितापि व्यवदत कोलाहलं विकुर्वाणा ॥

कलहं कल्याणं हृदि मन्वानो नारदो मुनिप्रवरः
उपवीणयंश्च चलथं श्चामरमवतीर्ण एनयोः पुरतः ॥

नलकूबरश्च रंभे द्वे अप्युपसृत्य तत्पदोः पतिताः
मुनिराहच "नलकूबर ! अनयोः का ते प्रिया? यतोऽविदितः ॥

कथमाशिषं प्रयुंजे "वर्धेयेथां दृढप्रेम्णा ?"
इति, का धात्रा विश्वामित्रेण महर्षिणाच सृष्टा का ?" ॥

शार्दूलविक्रीडितम्

न स्वस्या इतरा तव प्रियतरा; लावण्यमात्मीयमे
वैकं स्पृह्यमिति प्रगर्वितमतिं रंभामसोढढ्वा भवान्
एवैतामसृजन्नु ? सैव भवता रंतुं स्वमूर्त्यैकयाऽ
संतृप्ताऽधृतमूर्तिमेवमपरां वित्थो युवामेव तत् ॥

आस्तां, भवति भवान् किल नलकूबर ! रंभयोर्द्वयोः स्निग्धः ?
सुचिरमिमे सुन्दर्यावयोधय, द्वयोर्न्यहं प्रेक्षे ॥

अपनेतु विनोदन्ते नेच्छुः पश्यामि कौतुकात्
विहायसेऽद्य यावत्ते तुल्यस्निग्धे ह्युभे ?" इति ॥

नलकूबर आह।" मू अहं कथमयोधयं सुरमुनींद्र !
अनयोस्सारूप्यं बत ! कलहश्च ममापि विस्मयं कुरुतः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

इत्युक्त्वाह स रंभया स्वविहृतिं; चाक्रन्दनं च स्त्रिया,
स्त्यक्त्वा तां रभसेन रक्षणधिया तस्या दिशो धावनम्
दूरे मद्ग्रहणं, तदा स्वयुवतेस्तत्रागमं, तत्कृताम्
मन्मुक्तिं, तदनु स्वकीयविहृतिं, स्वस्या वधूट्या सह ॥

तदा तत्र द्वितीयस्या रंभाया आगमं तयोः
मिथः कलहभङ्गौश्च क्रमेण च सविस्तरम् ॥

संदर्श्य रम्भां प्रथमां मुनींद्रायाहावयोर्निविशतोऽत्र केलीम्
समीपमागच्छदसौ कुतोनु ? कांताऽपरा मद्युवतीव साक्षात् ॥

वसंततिलका

कस्तूरिकातिलकमाररचं मुखेऽस्या
अग्रन्थयं सुरुचिरैः कुसुमैश्च वेणीम्
कण्ठं व्यभूषयमहं रमणीयहारै
र्हस्तौ च कङ्कणगणैर्नतरलबद्धैः ॥

नवागताप्ययञ्जसैतैरलङ्कारैर्विशोभते
न मया रचितास्तस्या महच्चित्रमिदं"त्विति ॥

शालिनी

तस्मै रम्भा सा प्रणम्यर्षये "भो
द्वारावत्याः प्राङ्गणे युष्मदुक्ता
वाक्पक्वाऽभू"दित्यवोचत्तत स्सा
रम्भाचाद्या भाषतेस्मांजसैव ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जलोद्धतगतिः

महर्षिरवद"द्वचांसि युवयोः ऋतानि; फलिता, न्यहं च कमपि
द्युत्सवममुं निरैक्षिषि चिरं व्रजामि ललने ? व्रजाम्यह"मिति ॥

नलकूबर आह ततो "भगव ! न्नुभयोर्वचांस्यपिच युवयोः
सत्यानी"त्याह भवान् व्याख्यातु स्पष्टमेतदिति ॥

सोऽवोच "देकामुकयोरमेयसौंदर्यगर्वेण पुरा बभाषे
ततो मयाऽऽख्यायि"भवेत्सपत्नी तवे"ति सा वाङ्फलितेति साह ॥

अन्या मयैकं वरमाप्य धर्तुं स्त्रियाःस्वरूपं हृदि कांक्षितायाः
रम्भाकृतिः स्वप्रियमीप्सुरासीत्संस्मृत्य सा वाङ्फलितेति साह ॥

अतो मयोक्तं "युवयोर्द्वयोश्च वाचोऽपि तथ्या इति, भूय आह
कुबेरसूनु "र्भवतात्र" तथ्यां तथ्ये महर्षे ! प्रकटीक्रियेताम् ॥

इत्युक्तो मुनिरगदी "दयि ! तथ्यातथ्यनिर्णयोऽत्र कुतः ?
* एते युवती त्वमपिच मिथ्यैव, किमस्ति सत्यमिति लोके ? ॥

संदर्श्यैचकां दमयन् परस्याः सौंदर्यगर्वं रमतां यथेच्छम्
आभ्यामुभाभ्यां; तव पुण्यसंपदभूदिदानीं द्विगुणाधिके" ति ॥

---

* अत्रेदमवत्रेयं:- कलभाषिणी स्वरूपेण सत्या, रम्भारूपेणा सत्या । मणिकन्धरः स्वरूपेण सत्यः, नलकूबररूपेणासत्यः । रम्भातु स्वरूपेण सत्यैव, किंत्वद्वैतवेदांतानुरोधेन जगन्मिथ्यात्व भावनया रम्भाप्यसत्यैव । "अतः किमस्ति सत्यमिति लोके" इति युज्यते। मणिकन्धरः (मिथ्यानलकूबरः) नारदेन स्वकृत्रिम वेषो ज्ञात इति शङ्कित्वा तं केनापि मिषेणाऽमन्त्रयितुं इच्छति "निधीशपुत्र" इत्यादिना ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निधीशपुत्रस्तत आह देव! भवादृशं स्थापयितुं न युक्तम्
एवं चिरेणात्रभवान् प्रयात्वित्यामन्त्रय, त्सैरमयान्मुनींद्रः ॥

स्रग्धरा

स्वीयां रंभां गृहीत्वा निधिपतितनयः प्राह रंभां द्वितीयाम्
कीदृङ्मायाविनी त्वं नहि तव वचने श्रद्दधे; गच्छ! गच्छ!
विश्वास्यं साक्षिणं त्वानय! तव कथया विघ्निता केलिका ना
वित्युक्त्वात्मीयरम्भामृदुभुजलतया वेष्टयित्वात्महस्तम् ॥

मन्दाक्रान्ता

र्निगच्छन्तं प्रियमनुसरन्त्याह रम्भादिमा ताम्
द्वैतीयीकीं तृणमिव लघूकृत्य रम्भां धुवन्ती
" नेषलज्जा तव हृदि धिगेकांतगोष्ठीस्थयोस्त्वम्
जायापत्योः पुर इह चरस्येष दोषो न" वेति ॥

पत्यादराकुंठितकण्ठरावां कोपेन रम्भां प्रथमां निरीक्ष्य
द्वितीयरम्भा निजगाद "हंजे! अन्ते निपातो भवितोद्धतानाम् ॥

शिखरिणी

अयं दोषः पत्युर्निधिपतिसुतस्यैव मिह य
त्प्रजल्पन्तीं जिह्वां तव न विहृणाति स्मरहतः
अनश्यद्धर्मः किं ? जगति, नहि वैतास्य जनकः ?
कुबेरो ब्रह्मेंद्रोऽपिच किमु जगच्छून्यमभवत् ?" ॥

अविगणयन्ती प्रथमा रम्भा ता वाच आह तां "हण्डे !
रसनां नियच्छ! गच्छ! त्वं विलप! श्रृणोति कोनु वा तेषाम् ? ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* यदि दन्ता हस्ततले रोहेयुस्ते दशोत्तदा त्वं माम्
धित्त्वामपेहि दूराद्पेहि ! मामारटी ! रपेही" ति ॥

द्वितीया "हादरात्पत्युः कृतैर्जरत्पैःकृतं, न वा
शृणोति किं कोऽपि देवो न शास्तिश्चोचिता भवेत् ? ॥

हण्डे ! मामासंभ्रम ! विजेष्यतेऽसत्यमेव ते वचनम् ?
किमलाबु निमज्जे ! दुन्मज्जेद्ग्रावा च सलिलेषु ?" ॥

शार्दूलविक्रीडितम्

इत्युक्त्वा कतिचित्पदानि तरुणी गत्वा स्वकोपानला
दप्युद्दीप्तमनोभवानलपरीतापासहा दुःखतः
क्रुश्यन्ती गलितस्वहस्तकटका स्थित्वा क्षणं चिंतयि
त्वोपायं चतुरं समागतवती पश्चादवादीद्यथा ।।

"धृष्टायां दृप्तायां बुक्कन्त्यांच त्वयीह निरवधिकम्
एभ्यस्तेभ्यश्चाहं कथयामि कथं मनुष्यमात्रेभ्यः ? ॥

देवसभां गच्छाव आवामागच्छ ! यत्र ♦ तिष्ठेऽहम्
बृन्दारकेषु धर्मे" त्विति चेलाञ्चलमपाकर्षत् ॥

---

* अचिंत्या कापि शक्तिस्तव प्रादुःस्यात्तदा मम प्रभवेस्त्वं इति तस्याभाणकस्यार्थः ।।

♦ "प्रकाशनस्थेयाख्ययोश्च" इति स्थाधातो रात्मनेपदं । यथा "संशय्य कर्णादिषु तिष्ठते" । "यः कर्णादीन् निर्णेतृत्वेनाश्रय ती"ति । तथा बृन्दारकान् धर्मविषये निर्णेतृत्वेनाश्रयामीति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

आक्रुष्टाह निजप्रियं "तव पुरः पश्येयमुच्छृङ्खला
धूर्ता किं कुरुतेऽत्र मां; नहि वधूरेषा भवेद्राक्षसी
अत्र त्वं ह्यपराध्यसि, प्रशमयेत्संजातमात्रं नृणाम्
व्याधिं शत्रुमपीति संजगरिरे; ऽसाध्योऽन्यथांते" त्विति ॥

नलकूबर आह "ततो बिभेति कान्त ? प्रकाश्य तत्रास्याः
देवसभायां कपटं समुचितशास्तिं प्रयोजयावे" ति ॥

प्रतिरंभाहस्म ततो "विश्वस्ते तत्त्वमेहि ! मया
त्रिदशसभां, हंजे ! न त्वामिह मुञ्चामि तावदेही" ति ॥

ततः प्रथमरंभा तच्छ्रुत्वा हृदि विचिंत्य च
मुहूर्तमात्रमात्मीयं प्रेयांसं व्याजहार तम् ॥

"लब्ध्वाऽग्रणीत्वं सुरसुन्दरीणां संश्लाघ्यमाना बहुधाच ताभिः
कीर्तिं प्रतिष्ठाप्य तवापि लोके कैश्चिच्च नाद्यावधि धर्षिताच ॥

अंते पिशाच्यामुकया द्युलोकं गत्वा गतह्रीश्च "विनिर्णयध्वम्
मत्तथ्यमिथ्यात्वमिति ब्रवीमि ? न लज्जतेऽसौ किमहं न लज्जे ? ॥

रंभायाः प्रतिरंभा यत्सञ्जातेति धिक्कृतिः खलु मे
तत्रापि विवादाय द्युलोकयात्रानया पिशाचिकया ? ॥

नहि देवलोकयानं समाचितं प्रिय ! कथं गता प्रेक्षे ?
अमराणामास्यानि ? शपेऽसुभिस्ते पदं नकुर्व इतः" ॥

द्वितीया रंभा तत्कथितवच आकर्ण्य सकलम्
बभाषे "धूर्तैषा प्रभवति नहि व्योमगतये

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपह्नुत्य ब्रूते "नहि पदमितः कुर्व" इति, भोः !
कथं विस्रब्धोऽस्या वचसि सभवान् पंडित" इति ॥

निरुत्तरां तद्वचसाद्यरम्भां निधीशपुत्रो विदितो वधूटीम्
मायाविनीं तां गलहस्तयोगादपाकरोतिस्म कृपां विहाय ॥

लब्धावकाशा पुनराह दृष्ट्वा द्वितीयरंभा प्रथमां "हताशे
मिथ्याप्रसंगैः वरिवंच्य तं तद्वियोगदग्धामकृथाश्चिरान्माम् ॥

स्मरशातहेतिघातव्यथितां मां कृतवती यतस्त्वञ्च
कस्यापि हेतिघातेनैव प्राणैर्वियुज्येथाः" ॥

इत्यशप, त्तां सद्योऽपृच्छन्नलकूबरः प्रथमरंभाम्
"हंजे ! किन्नाम्नी त्वं ! कुत स्समागतवती च कथये"ति ॥

मालिनी

तदनु धनदपुत्रं प्राह रम्भा द्वितीया
"नहि किमिदमलं ? मामद्य यावन्न्यकृन्तत्
मनसिजशरजालैर्दुर्भगैषा, कृतन्ते
प्रियतम ! पुनरेतत्प्रश्नजालेन; धिक्ताम्" ॥

इति कथयित्वा प्रथमां रंभां गलहस्तयोगेन
निष्कासयतिस्म पुनस्सापिच रूक्षेक्षणा दूरम् ॥

नलकूबरश्च तस्याः प्रसक्तसम्बन्धमगणयित्वैच्छत्
निष्कासनं द्वितीयां प्रीणन्, नूत्नप्रियो हि कामिजनः" ॥

इति सिद्धोक्तां सुमुखासचिः सर्वां कथां निशम्याह
"निष्कासितया भाव्यं कृत्रिमयेत्यूहितुं शक्यम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिखरिणी

द्वितीयां रंभां या तृणमिव लघूकृत्य कृतव
त्यथ स्वैरालापान् बत ! विदितमात्रे स्वरहसि
* कृतार्धेन्दुर्मूका यदगमदिदं वीक्ष्य खलु ता
मुपेक्षां चक्रेऽसौ निधिपतिसुतोऽपास्य करुणाम् ॥

आस्तामेत, त्सिद्धावेदय ! मां निरवशेषमत्यन्तम्
आश्चर्यावह, मश्रुतमुदन्त" मित्युक्त आह स पुनस्ताम् ॥

"शृणु ! त्वमन्यच्च विचित्रमार्ये रम्भां निकृत्य प्रथमां द्वितीया
प्राप्य प्रियं प्राह यथेदृगेव पुंसां बत ! प्रेमकथाप्रसङ्गः ॥

वियुक्तमात्रे मयि भो मुहूर्तं कुतेत्वरीयं भवतोपलब्धा
अत्रापराध्याम्यहमेव दूरीकृताभिमाना त्वयि रज्यमाना ॥

त्वदेकजीविताया: किं ममेदृक्क्लेशसन्तति: ?"
इत्याकुलात्मा व्यक्रोशद्रम्भा निर्गलिताश्रवा: ॥

मन्दाक्रांता

आक्रन्दन्त्या नयनसलिलं निर्मृजन्नुत्तरीये
णाह प्रेयान् "प्रियसखि ! वदास्त्यत्र को मेऽपराध: ?
तां मत्वा त्वामिति किल कृतं प्रेम, बुद्धे यथार्थे
सद्यस्त्यक्ता, वद ! कथमहं तेऽपराद्धोऽस्मि कांते !" ॥

शार्दूलविक्रीडितम्

एवं तामनुनीय गाढमुरसा संश्लिष्य निर्मृज्य त
च्छोकं मुक्तघनं शशाङ्कमिव चार्वास्यं दधानां प्रियाम्

---

* कृतगलहस्ता ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नीत्वा प्रांतलतागृहं मनसिजक्रीडारते तत्प्रिये
तत्रान्यो नलकूबरस्समुपसृत्याहस्स कोपोज्ज्वलः ॥

" रे ! रे ! मदीयरूपं धृत्वा लोकैकसुन्दरीं रम्भाम्
अभिसरति धूर्तहतकः कश्चित्कुत्रास्ति ? कुत्र ? कुत्रेति ?

अवलोक्याहं तं हृदि व्यस्मेष्यस्य प्रदेशस्य
महिमा किं चित्राणि पतन्ति पुङ्खानुपुङ्खमत्रेति ॥

मन्दाक्रांता

आराद्दृष्ट्वा चकितचकिता विस्मिता प्राह रम्भा
प्रेय! न्नाभात्ययमविदितः कोऽपि मायाप्रपञ्चः
धृत्वा रूपं तव स विकृतं भाषते; केन योगे
नोत्तार्याद्याऽपतितविप? दुर्भ्रांतचित्तासि हन्त! ॥

हताशया मामकरूपधार्या कयाचिदद्यैव कृताद्विमुक्तौ
क्लेशा, दिदानीमपरोऽभिघात एकैकशो नौ विपदोऽभिय:

पश्यन्त्या आभाति ममाजय्योऽसाविति निविष्टः
मूर्तीकृतदर्पश्च मायाव्यपि दृश्यते त्वमायीव ॥

अविदितवियोगमविरतभोगपराभ्यां बतावाभ्याम्
रक्षोहतकोऽसूयन् कोऽपीत्थं चेष्टतेनु दुर्मायाः ॥

इत्याचक्षाणां तामभिनवनलकूबरस्समुपसृत्य
प्राहस " सुन्दरि! भवत्युद्भ्रांतमतिर्ब्रवीति विपरीतम् ॥

तव प्रियोऽहं ललने! गृहाण! मदीयरूपं धरता शठेन
मायाविना त्वं किल वञ्चितात्र श्रद्धत्स्व सत्ये वचने मदीये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रहर्षिणी

विश्वास्यं न यदि वचो मदीयमेतद्
दूरस्था सति ! परिपश्य नौ. धृत मि:
विच्छिन्नां तव पुरतश्शिराधिनस्य
विज्ञेयं भवति किलावयो ऋजुत्वम्

शिखरिणी

विषीदन्ती श्रुत्वा हृदयमिदिदं तस्य वचनम्
समाश्लिष्टा रम्भा प्रियनमगलं गाढमरुदत्
"सुराः ! सन्त्रायध्वं मम पतिरसौ हन्ति हतको
बत ! क्रव्यात्कश्चिद्धरिकिलः मम दयध्वं भो" इति मुहुः ॥

पृथ्वी

निधीशतनयो नवो रुदितमङ्गनाया बृः
न्निशम्य हसिताननोऽवद "दयि ! त्वमाशङ्कसे
निशाचरमनुं प्रियं तु नलकूबरं नेऽत्र, मा
बिभीहि ! न निरायुधं रणभयञ्च हन्यामहम् ॥

अभ्यापतेदेष शठो नु मामित्याशंक्य हन्मीत्यवदं कथाऽहम्
यद्येष वीरोऽभिजिघांसुरस्ति मां खड्गहस्तः प्रतिहन्तु सद्यः ॥

पृथ्वी

अलीकनलकूबरोऽहमिति; * सैव निर्मिध्य इ
त्यमौ रणहतोभवेन्निति भिया भृशं वेपसे
कथास्य बहिरागता सुविदिता च यावत्त्वया
करोमि नहि विप्रियं कमपि तावदाश्वस्यताम् ॥

---

* सोऽ च लोपेचेत्पादपूरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आवां परीक्षस्व शुभांगि! पूर्वा पुरातनी नर्मकथा इदानीम् ।
शास्त्रोपथाशुद्धजनं गृहाण न तावदर्हस्यपि तस्य पार्श्वम् ॥

प्रियां मम त्वां परपूरुषस्य कथं समाश्लिष्यतीं समक्षे
सहे न पश्यन्नहं, मास्व दूरेणतस्य यद्यात्महितं चिकीर्षुः ॥

इत्याकर्ण्येदमेवाह रक्षितुं स्वमनोरमम्
इति मत्वा प्रियस्य स्वस्याराद्रम्भा व्यतिष्ठत ॥

दूरगतां तां प्रथमो नलकूबर आह "न तृणाय
मन्य इमं मामैषीर्वीक्ष्यासि तस्य किं बिभेषि त्वम्" ॥

शार्दूलविक्रीडितम्

तत्रस्था नलकूबरं प्रथममब्जाक्षी द्वितीयञ्च तम्
प्रेमार्द्रैश्च मनोहरैश्च नितरां तीक्ष्णैः कटाक्षैश्चिरम्
पश्यन्त्यास्त, न तुल्यरूपविभवेनोदीयते चेतसि
प्रेमा किंतु ममत्वभावकलनेनोत्पद्यते प्राणिनाम् ॥

पृथ्वी

द्वितीयनलकूबरः प्रियवधूं समालोकयन्
उवाच "भवती गिराऽपरपनेऽनपो हान्ये
गता हि मणिकन्धराश्रम मसौ गतः कुत्र ? ते
स्वयं हृतचितः कुतः करगतः स्मरार्ते मयि ? ॥

सुरकार्यविघ्नभीत्या त्वामनुमन्तुं विराद्धिरस्य मम
पापस्य फलं यत्त्वं खिद्यासि विटे विहाय मां रमणम् ॥

पत्यावविश्वसत्या मयि तव पुरतो मया शपथः
करणीयतयाऽपतित "त्वत्पतिरहमेव नान्य" इति धिक्! धिक्! ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हरिणी

अनुगतवति त्वां गच्छन्तीं मयि प्रसिता प्रिये !
न खलु तपसो भङ्गं कर्तुं प्रभुस्त्वमिदं भवेत्
सुरपतिमनः प्रज्वालाये, त्यगच्छति मय्यसौ
प्रहरति शरैः कामश्चेति व्यथाकुलितः स्थितः ॥

भुजङ्गप्रयातम्

सुमेषोस्सुतीक्ष्णैर्हि पुङ्खानुपुङ्खैः
र्हतोऽस्त्रैरसह्यैरकार्षं हृदीत्थम्
"विषोढुं मघोनः क्रुधा शक्यते, किम्
त्वशक्यं स्मरास्त्राणि वज्राच्छितानि" ॥

द्रुतविलंबितम्

इति विचिंत्य विलम्ब्य समागतो वनमिदं भवतीं सति! वीक्षितुम्
हृदि विशंक्य पुरन्दरसाध्वसात्स्मृतिगतान्मदनार्त इह स्थितः ॥

शिखरिणी

तपोभ्रष्टं कृत्वा मुनिवरमविघ्नं कृतवती
मघोनः कार्यं मां समुपसरसि त्वं वधु ! कदा
कदा श्लिष्येयं त्वामिति बत ! समुत्कंठितमना
अवस्थाप्य प्राणान् पिकरवधुतानस्मि गहने ॥

उपभोक्तरि कस्मिंश्चित्प्रलंभितां त्वां वनेऽत्र विटधूर्ते
तत्रास्मि दुःखितात्मा पुरंदरक्रोधमभिशंक्य ॥

वसंततिलका

आगत्य नारदमुनिः प्रमदे ! मुहूर्ता
त्प्राक्तत्र मां प्रणिजगाद, "भवान् बतात्र

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कामाहतोऽस्ति, तवरूपधृदेत्य कोऽपि
रंभां विनोदयति तत्र विटः" किलेति ॥

आकर्ण्यायातोऽहं कुतोत्र लब्धावकाश एष विटः ?
कास्य कथेत्युक्ता सा "किं वच्मी" त्यैक्षतास्यनाथस्य ॥

दृष्टः प्रथमोऽवादीत्कुत एवं वीक्षते ? प्रिये ! क्लैशैः
यैर्यैर्व्यथिता भवती ते ते मां नाभियांति ? किं जहति ?

"त्वादृशी सुन्दरी काचित्कश्च नेदृश सुन्दरः
स्यातां हृदि स्पृशेतां वां नोचितो गर्व ईदृशः" ॥

इति नारदमुनिरवदत्तदा, वच इदं कथं वृथा भवति ?
फलमावयोरसूत्वा तथापि मामी, रिंम निह"न्मीति ॥

उक्त्वा केलीकुञ्जसंगुप्तखड्ग
मानेतुं निंगतुकामं द्वितीयः
दृष्ट्वाऽवोच "द्रे ! प्रगल्भस्व मा ! मा !
मुष्टीमुष्ट्यायोधनं कुर्वहेऽत्र ॥

स्रग्धरा

इत्यन्योन्यं प्रचण्डैः प्रतिरववहुलै र्दुर्भुजास्फालनैश्च
दिग्भित्तीर्भेदयद्भिर्घनरवसदृशैः सिंहनादैर्गभीरैः
निर्घातानां सदृक्षै र्गुरुतरकठिनै र्मुष्टिघातैः प्रहारैः
कोपाग्नेर्विस्फुलिंगान् स्वनयनयुगला द्वर्षयन्तावुभौ तौ ॥

शार्दूलविक्रीडितम्

हत्वा नाभिहतौ यथारयगती दूरङ्गतौ; भूयसा
हस्तं प्राप्य च विश्लथौ; बत गलौ निष्पीडयन्तौ मुहुः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्षोघ्नौ प्रतिपक्षिपादयुगलं संगृह्य दूरं समा
कर्षंतौ बहुभिश्च भङ्गिभिरमू आयोधनं चक्रतुः ॥

एकरूपौ यथा तौ द्वावेकवीरौ च हन्त ! भोः
ततोऽजय्यौ मिथोऽभूतां युध्वापि सुचिरं तथा ॥

तुल्यस्कन्धौ निरीक्ष्याह श्रांतौ तत्र स्थितौ वधूः
"कृतं युद्धेन, प्रष्टव्यौ प्राक्तनीं संकथां युवाम् ॥

यो वेत्ति संकथां तां मे स प्रेयान् नलकूबरः
इति निर्णीयते, तेन त्वितरो गन्तुमर्हति" ॥

अनुमन्यमानमेतद् द्वयं पृथक्कृत्य युवतिरेकैकम्
प्राह "कलापूर्णकथाप्रसंग उदपादि कुत्रे"ति ॥

नलकूबरं द्वितीयं समादधतमञ्जसा समुसस्रत्य
रम्भा जग्राह करं प्रथमं परिहृत्य निस्समाधिममुम् ॥

रम्भाह धूर्तं नलकूबरं तम्
" रेऽद्यावधि त्वां प्रियमित्यमसि
हताश ! जाल्मोऽसि, शठोऽसि, कस्त्वम् ?
कथं धृतं रूपमिदं त्वये" ति ॥

रम्भागृहीतो नलकूबरोऽरुयत्
"परीक्षया काक्कदतां कृतं ते
कामातुरं मां गणये" ति हस्ते
कृत्वा प्रियां, वीक्ष्य च धूर्तमेनम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"धिक्त्वां; रेऽल्पायुस्त्वं भवे"ति शप्त्वा प्ररूक्षकण्ठेन
सुरपथमगमत्, धूर्तो दीनो मणिकन्धराश्रमं विष्टः ॥

गते तस्मिस्तथा कुंजे स्थितं हृत्वा ममायुधम्
हृष्टचेतास्समायातो देवीसन्दर्शनेच्छया ॥

खड्गं प्रयच्छन् गुरुरब्रवीन्मां "यं हन्तुमिच्छस्यमुना तमेषः
हिनस्त्यवश्यं" कलभाषिणीयं जिघांसिताप्राङ्नहता तदानीम् ॥

अहतापि तदाऽवश्यं वध्या कालांतरे" त्विति
संप्रेक्ष्य कलभाषिण्या मुखं तूष्णीमवास्थित ॥

कलभाषिण्याहैनं "कृतं भवच्छङ्कया" भवत्येव
भवितव्यमिति प्राहुः किलेति सिद्धः प्रशस्य तामाह ॥

"कलभाषिणि ! भवसि त्वं विवेकिनी, भाषसे धृत्या
सत्यमपि विप्रियं यन्नभाषणीयमिति शंकेऽहम् ॥

आवेदय ! वृत्तं तव बलाद्गृहीता मयोच्चकैरुदती
त्यक्ता, न प्रपलाय्या गतेन दृष्टा, कथय !तदादी"ति ।

॥ इति पञ्चमस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ षष्ठस्सर्गः

तूणकम्

सुन्दरी विहस्य साऽब्रवी "त्वमेव मे कथा
मभ्यथाः, किमस्ति मेऽभिधातुमत्र ? सूनुना
गुह्यकेश्वरस्य मत्प्रियेण, मां विहाय प
लायितो भवांस्तदा प्रकुप्यतानुधावता ॥

बलाद्गृहीतश्च यदैव पश्चादानायि मां दर्शयितुं तदात्वे
आगत्य रम्भेव विमोच्य च त्वामरंस्यहं तेन मनोजकेलीम् ॥

अतर्कितं योपनता तदानीं सा सत्यरम्भा; कलहायमाना
तया चिरं मत्प्रियसन्निधानात्तां दूरयित्वा क्लिशितामकार्षम् ॥

शालिनी

इत्युक्तास्तेऽतीव चित्रीयमाणा
अप्राक्षुस्तां "तन्वि ! चित्रं ! भवत्या
रम्भारूपं तत्कथं वा धृतं ? ते
नारंस्थाश्चाप्तावकाशा कथं त्वम्" ॥

प्रहर्षिणी

इत्युक्ता प्रणिगदतिस्म वीक्ष्य सिद्धम्
"त्यक्त्वा मां सपदि पलायितं भयात्त्वाम्
अन्वेष्टुं गतवति तत्प्रियेऽनुयांती
रम्भाऽसावपशकुनेन वारितासीत ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रतांतनेपथ्यमवेक्ष्य तस्या
धृत्वांजसाऽगां नलकूबरं, यः
मां नान्यथाऽशङ्कत वीक्ष्य, याहं
रम्भैव नाशेन ततो विभिन्ना ॥

तथांजसा तत्तरुणीस्वरूपं धर्तुं वरं लब्धवती पुराऽहम्
कार्यान्तरार्थं; श्रुतपूर्वमेतन्महर्षिणाऽस्मत्कलहप्रसंगे ॥

अवगत्यापि मौनी मे मुखं वीक्ष्यानुकम्पया
नैव प्रकटयामास मां रम्भां कुलिमामिति ॥

भुजङ्गप्रयातम्

खलत्त्वा पुनस्तत्; तथा शप्तमेत
द्विमुह्येयमंगं जुगुप्सावहं मे
समक्षेऽम्बिकाया" इति प्राप, माहु
र्विमुक्ताः प्रमीताः पुरो देवतायाः। ।

इत्युक्त्वाह मणिस्तंभं "नान्यथा ते गुरोर्वचः
खड्गेन च्छिन्द्धि ! मां; दिष्ट्या प्राप्ताऽहं भवतोऽतिकम् ॥

शार्दूलविक्रीडितम्

हृष्टे चेतसि न भ्रमो मम वृथा, प्राप्तो मया सङ्गमः
कौबेरेरिति भाषसे त्व"मपरः कौबेरिरागा"दिति
"सोऽसौ सत्य" इति प्रशसमकरोदाद्यस्त्वि"ति, ब्रूहि ! कः
कौबेरिः प्रथमश्शठो हतविटो ? येनास्म्यहं वञ्चिता ? ॥

मणिकन्धर आहस "माभाषिष्ठा वचोऽहितम्
शुभे ! प्रथमकोबेरि रहमे"वेति सस्मितम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

श्रुत्वा तत्कलभाषिणी बहुतरां चित्रीयमाणाऽवदत्
"रूपं त्वं नलकूबरस्य सुभगस्याप: कथंवा ? कदा ?
कृत्वा ते तपसोऽतशायमसकौ रम्भा प्रियेणात्मन
स्तत्र व्याप्रियतेत्यवोचत सखीवर्गो निवृत्य व्रजन् ॥

शार्दूलविक्रीडितम्

इत्युक्तो मणिकन्धर: कथयति "स्मैवं मया सा तपो
भ्रष्टेनाश्रमसीम्नि निजरवधू रंरम्यमाणाऽलसा
गोत्रस्य स्खलितं यदाऽकुरुत निस्सिनग्धा जुगुप्सुर्भृशम्
त्यक्त्वा तामपगत्य चातृपितहृद्भूयोऽपि भोगेच्छया ॥

प्रियस्य तस्या नलकूबरस्य धृत्वा स्वरूपं तपसो व्ययेन
तयाऽरमेऽइ सुचिरं वधूटि ! तद्रूपवत्याऽविदितस्त्वयाच ॥

नलकूबरेण शापो मायारूपस्य मे फलं प्राप्त:
लब्धविवेको हृत्वा वीणां मम रत्नमालां च ॥

मृगेन्द्रवाहनादेव्या महिम्ना स्मृतिवर्तिना
चिरेण जातकुतुक आगतोऽह"मिति ब्रुवन् ॥

पृथ्वी

सितानन उदैरय "स्मति ! तपोव्ययेनोरुणा
रिरंसुरमरस्त्रियाऽहमरमे त्वया सुन्दरि !
अरंस्त भवती मया हि नलकूबरेणेति ते
प्रियेण; कथमप्यभून्मम वशाऽतिहृष्टाऽस्म्यहम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुष्पिताग्रा

तरुणि ! गुरुवरस्य शापभीत्या
त्वयि लगितं मम मानसं कथंचित्
यमित, मुदितमास गीतविद्या
भ्यसनदिनेषु ममानुरागबीजम् ॥

शार्दूलविक्रीडितम्

इत्युक्ता कलभाषिणी निगदति "साहं कृतार्था; गता
चिंता केन कलङ्किताऽसि कितवेने, तीप्सितं मे परम्
वाल्लभ्यं तव, मे मनश्च भवति स्निग्धं यथा ते मयि,
त्वां दृष्ट्वा विनिवर्ततेस्म हृदयं चेतोऽविदित्वा तव ॥

वसंततिलका

किं वच्मि ? तावकमनोहररूपसंप
त्संगीतकौशलमथ स्तवनीयशीलम्
मां पिप्रिये किय ? दिदं हृदयैकसाक्षि
प्रेयन् ! किमुक्तमपि मे वचनं वृथैव ॥

शिखरिणी

भवन्तं पश्यन्त्याः प्रियतम ! कदाचिन्मनसि मे
मणिग्रीवस्फूर्तिस्समजनि, सहभ्रातरममुम्
अशाप्सीन्मौनीति स्मृतिगत, मकंपिष्ट हृदयम्
तदारभ्य त्यक्तं त्वदभिलषितं तस्य पुरतः ॥

वंशस्थम्

तथापि ते रूपविलाससंपदो
विलोक्य मात्रां नलकूबरो मया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपेक्षितोऽन्यो न, भवान् कथञ्चन
मदीयभाग्यैस्समलंभि सुन्दर! ॥

मुनिशापभयेनाहं निवर्त्य भवतो दृशं निधीशसुतम्
प्रैक्षेनु दुर्मुहूर्ते कस्मिन् ! क्लेशा मम प्राप्ताः ॥

यथा पिपतिषुस्तल्पे यथाऽपूपश्च हस्ततः
भ्रष्ट इक्षोरसे रुच्ये स्खलिताऽप्यपतं प्रिये ॥

अपास्य हस्तागतदिव्यरत्नमपेक्षितः काचमणिस्त्ववेक्ष्य
छयालवं, दिव्यमणिस्स लब्धोऽप्यन्ते चिरं तिष्ठति नेति दूये ॥

न युक्तमेतद्वचनं ममाद्य के विश्वसेयुर्गणिकावचस्सु ?
कुर्युस्त्वचेतस्युपचार एवेत्यन्यच्च दृष्टा परकीयवांछा ॥

इति लज्जाशोकाभ्यामभिभूतां तां नताननां वीक्ष्य
कलभाषिणीं प्रियतमो मणिकन्धर आह सानुनयम् ॥

"न विश्वसेयं नहि ते वचस्सु नैव त्वमन्या गणिकेव कांते !
अस्त्यत्र लिंगं भवती च कांक्ष मां पूर्वमेवात्महृदीति किंचित् ॥

भवतीमामन्त्रयता गुरुणा नारदमहर्षिणा कृपया
प्रायुङ्यत याशीस्ते साकूतं स्मर्यतां तरुणि ! ॥

"मुदिते ! भवतीप्सितवरमवाप्य रंभामनोहराकारम्
सुखमश्नुतां; वचांसि मे श्रद्धत्तां, गम्यतां त्वयाद्येति ॥

अनुदित्वा नलकूबरमिति सूनृतवादिना मुनींद्रेण
उदिते विमृश्यमाने सत्यं यन्मां भवत्यचीकमत ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शापभयाद्यश्छन्ना सा कांक्षेति च न चित्र, मिदुमुखि!
संतीदृशानि लोके चित्राणि च तत्र तत्र, शृणवपरम् ॥

सन्दृष्टवत्यै नलकूबरं ते नरोचतेऽन्यो यदयं यथार्थः
न चित्रमेतच्च, यतोऽस्ति पुंस्त्वप्यसौ गुणो, वच्मि च संश्रृणुष्व!॥

पुरा कदाचिद्गतवाननन्त देवव्रतोद्यापनकार्यहेतोः
अनन्तपूर्वं शयनं पवित्र पुण्यस्थलं; यत्र कवींद्रबृन्दम् ॥

भगवन्तं बहुथास्तुव, दीक्षित्वाऽप्राक्ष "मीदृशी कविता
कथमुपलभ्यत ?" इति, तैः कथितोऽत्र मृगेन्द्रवाहनामहिमा ॥

अत्रागत्य शिलास्तम्भलिप्युक्तां साहसक्रियाम्
निर्वर्त्याहमुपालप्सि कवितासम्पदं पराम् ॥

कवितासम्पन्नोऽहं कदापि नारदमहर्षिणा गुरुणा
सह गत्वा सन्दृश्य च भगवन्तं दंडकेन हरिमैडि ॥

भगवान् येन सन्तुष्टो हारं मह्यमुपाहरत्
यश्चाकर्ण्य सकृन्मात्रं न्यपठीस्त्वं हरेः पुरः ॥

पुनर्गतोऽनन्तपद्मनाभं तत्क्षेत्रदेवताम्
कवित्वेनोपलब्धेन स्तुवन्नासे चिरं ततः ॥

कवितां मे प्रशंसद्भिः प्रार्थितेन मया बुधैः
रमामुकुन्दसंवादो रमणीयस्तदाऽरचि ॥

आकर्ण्य तं प्रहृष्टास्ते मामाशासत " जन्मनि
परे ते परमा भक्तिः श्रीहरौ लभ्यता" मिति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न यावत्कवितापीठे शारदायाः प्रशस्यते
न तावद्गणयामीति गतस्तत्पीठमेकदा ।।

अध्यापयन्त निगमादिविद्याश्शिष्यान् विशुद्धेन गलेन तत्र
प्राप्तो वटुः कोऽपि गुरुं स वीक्ष्य चिरायसे त्वं कुत इत्यपृच्छत् !

वटुस्स आहा"स्ति गुरो! निमित्तं चिरायितस्य श्रुतिगोचरं तत्।।
न तावदासीद्भवतोनु दूरस्थितस्य वक्ष्येऽत्रशृणोतु देवः ।।

हरिणी

सपदि भवतो वाचारामं गतोऽस्मि समीपगम्
क्वचन लतिकाकुंजे स्त्रोरुस्थितं चरणद्वयम्
मृदु निजपतेश्शालीनस्य प्रपीडयतिस्म त
द्युवतितिलकं नर्मालापान् प्रियेणतु कुर्वती ।।

शालीनो मां विलोक्याह "गुरुणा प्रेषितो भवान् ?
किं ग्रन्था ? यास्यतां किंचि" दित्युक्त्वा मां न्यषादयत् ।।

नातिदूरे निकुञ्जस्य तस्य वेदीं महीरुहः
अध्यास्यहं, सुगात्रीं स शालीनः प्राह सस्मितम् ।।

"पीता सुधा भवत्या ? सिद्धरसः कोऽप्यलंभि वा तरुणि ?
अभिवर्धते तरुणिमा प्रतिदिवसं ते दृगुत्सवं कुर्वन् ।।

पुंसोऽपि प्रागेव हि विशीर्यते यौवनं स्त्रीणाम्
इत्याहु, स्तारुण्यं तव वधु ! सितपक्षचन्द्रिकेवास्ति ।।

प्रेयसि ! वद को हेतुस्तस्ये"ति; तदा स्मिताननाह यथा
"नहि वेद्मि निमित्तमहं नास्त्यप्यस्तीव भातिहि ममत्वात्" ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निशम्य शालीन उवाच "कांते !
लावण्यमात्मीय मसन्न, सत्यम्
न वेत्सि चेत्त्वं कथयाम्युपेही"
त्याहस्स कर्णे वचनं रहस्यम् ॥

चित्रलेखा

आकर्ण्यासावपहृतवदना भर्तुरास्यान्निरीक्ष्य
दीर्घं प्रेयोमुखमभिवदति "सान्वमंस्तांबिका प्राक्
कांक्षां कांचिन्मम सफलयितुं किन्तु कुर्याद्वरं तम्
देवी ! देहि ! श्रुति"मिति युवती प्राह कर्णेऽस्य गुह्यम् ॥

शालीन आकर्ण्य वचस्तदस्याः क्रोधांधचित्तस्स्वमनुप्रयाता
धावन् कलत्रेण रयात्पपात ह्रदेऽत्र नाम्ना शततालदघ्ने ॥

ततस्सुगात्रीच "ममास्ति नान्या गतिर्विना त्वत्पदपद्मयुग्मात्
त्वया विमुक्ताऽपि कथं भवन्तमहं विमुञ्चेय"मिति ब्रुवणा ॥

तेन साकं धावमाना पततोऽनुपदं गता
ह्रदेऽपप्तद् दूरहेतोर्भवता न श्रुतो ध्वनिः ॥

पौरास्सर्वेऽपि धावित्वा तद्गम्भीरह्रदं मुहुः
शोधयित्वा जालजालैर्विषण्णा न्यवृतन् गृहान् ॥

अन्यैस्साकं तत्र गत्वा दृष्ट्वेदानीं समागतः
गृहीत्वा ग्रन्थमायामि गृह्यता"मिति तं ददौ ॥

निशम्येदं गुरुश्शोकविस्मयाभिहतोऽब्रवीत्
"धिक्कष्टं ! दम्पती एतावापन्नावितराविव ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सार्थं हृदं तच्छततालदघ्नं न जीविताशा पतितस्य यस्मिन्
न केन चित्प्राक्कृतकर्मभोगो निरुध्यते ख"ल्विति स व्यषीदत् ॥

ततो गुरुर्मया पृष्टः "शालीनः को? ऽस्य भामिनी
का सुगात्री ? कथा का च तयो ?" रित्यब्रवीदसौ ॥

"ग्रन्थोयं पुण्यदम्पत्यो श्चरित्रममुयोर्महत्
न तद्दर्शनभाग्यं तु शिष्टं श्रवणमेव नः" ॥

इत्युक्त्वा वटुनानीतं धृत्वा शीर्षेण पुस्तकम्
उपस्पर्श्य दृशौ तस्मै पठेति वटवे ददौ ॥

ग्रन्थं वटुर्गृहीत्वा तं प्रणिपत्य गुरोः पदे
स्तुत्वा सरस्वतीमादौ प्राक्रंस्त पठितुं यथा ॥

इन्द्रवंशा

"काश्मीरदेशस्य विभाति भूषणम्
श्रीशारदापीठ, मिहास्ति कश्चन
देव्यर्चको, यस्य गुणालयस्सुता
नाम्ना सुगात्रीरमणीशिरोमणिः ॥

भर्ताऽस्याश्शालीन श्श्वश्रूगृहबद्धजामाता
यस्य प्रहिता निकटं कन्या सालंकृतिर्निषेकदिने ॥

वसंततिलका

चीनाम्बरेण रमणीयकुचांशुकेन
मञ्जीरकङ्कणमनोहरकर्णपूरैः
रोरूयमाणमणिकिंकिणिकांचिदाम्ना
बोभूष्य भर्तृसविधं गमिता सुगात्री ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अलंकृतां तामभिवीक्ष्य भर्ता शालीन आत्मन्यकरोज्जुगुप्साम्
नतं शिरो नोन्नमयांश्चकार स्थित्वा चिरं तत्र वधूर्निवृत्ता ॥

निलीय तस्या रहसि स्थितस्तत्सखीगणस्तज्जननीमुपेत्य
प्राहांब ! नेयं श्रुतदृष्टपूर्वा त्वदीयजामातृकथाद्य यावत् ॥

लब्धो युना सुन्दरस्ते जामातेति मुदं गताः
साधु साध्वद्य पश्याम निशायामेतयोः कथाम् ॥

इत्युक्ता जनयित्री साख्य "मामा कदापि यूयमिह
एवं जल्पत ! जहुईसिता लज्जालवो दारान्" ॥

इति ताः प्रेष्य द्वित्राण्यहानि पुत्रीं पुरेव नयतेस्म
शयनगृहं, जामाता पुरेव चोपैक्षत वधूं ताम् ॥

मात्रादिष्टास्ततस्सख्यस्तस्या एवमुपादिशन्
"स्त्रीपुंसयोर्नर्मगोष्ठीप्रसङ्गो वां न दृश्यते ॥

बाढं ! बाढं युवां द्वावप्युचितज्ञौ विवेकिनौ
असिधाराव्रतस्याद्य दीक्षा किं स्वीकृता दृढा ? ॥

यद्युचितज्ञः कांतः कांतार्हति लज्जितुं, स लज्जालुः
कांता च तथा चेत्सखि ! मनोजगोष्ठी युगस्य तस्य कथम् ?॥

नैवासि बालिका मुग्धा न त्वां भाषयतीति सः
उदासितुं नार्हसि त्वं प्रक्रमस्व ! त्वमेव तत् ॥

पुरुषोऽस्ति भाग्यवान् भुवि नार्हति युवती तु मानमतिदीर्घम्
दारकृतसेवयाऽसौ द्रुतहृदयः प्रीणयेत्कलत्रं स्वम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृष्टमात्रां स मुग्धस्त्वां "नैच्छही" त्यूचिवानिति
कथं क्षुब्धासि ? नादाः किं ? वीटिकां समुपेत्य तम् ॥

उन्मत्तिकेवासि न वेत्सि वा त्वं? नवं वयो नाम वधूटिकानाम्
ऋतुर्हि संभोगफलस्य, रिक्तशय्यागतं तत्कुरुषे कथं त्वम् ? ॥

संपन्ने यौवने स्त्रीणां लभ्यन्ते भोगसंपदः
क्रमेण गलिते तस्मिन् म्लानं पुष्पं वधूर्भवेत्" ॥

श्रुत्वा सुगात्री वचनं "सखीनाम्
प्राहस्म, "किं मां हथ ? यूयमत्र
अहं सहे ने"ति नतानना, तम्
प्रायुंक्त मन्त्रं तरुणी निशायाम् ॥

अन्येद्युश्चापरेद्युश्च परे द्यवि च सा वधूः
एवमेव करोतिस्म वन्ध्ययत्ना न्यवर्तत ॥

सुमुखयितुं भर्तारं शतकृत्वः प्रायतिष्ट सा युवती
भवितव्यं वज्रादपि मनसा तस्यातिकर्कशेनैव ॥

प्रयुक्ताश्चेत्क्रिया अन्या विपरीतं फलं बत !
सुवीरन्निति भीतात्मा हृष्टा माङ्गल्यसंपदा ॥

अदर्शयन्ती प्रतिकूलतां सा त्वास्ते; स्वभर्त्रभ्युदस्य हेतोः
मृषा धरंती, जननीं दुरुक्तेर्निवारयंती पतिभक्तिबद्धा ॥

नियम्य वाचं जननी चिराय स्वपुत्रिकाप्रार्थनया; ऽविषह्य
कदाचिदुत्कूलनदीव धृष्टा जामातरं प्रत्यवदत्तनूजाम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अमृदशो वंध्यफलो न दृष्टः कुत्रापि; मे कुप्यसि भर्त्संयंतीम्
वंशांकुरस्ते भवतीत्यपैक्षे आधीकृता वंध्यगवी किलाऽसौ ॥

निष्कासमेतस्य गृहात्कुमारि ! प्रकल्पते ते हृदयव्यथायै
वरं ततोऽस्मद्वनपालनास्येत्याहूय जामातरमादिदेश ॥

अशङ्कमानस्सममंस्त पुष्पवनस्य रक्षां हृषितात्मना सः
यतस्सुमेभ्यः स्पृहयन्ति लोकाः श्रीशारदांबार्चनकर्यहेतोः ॥

स्रग्धरा

आवापान् पूरयन् स क्षितिरुहनिचयस्याल्पकुल्याप्रवाहै
रर्हे काले प्रयच्छन् बलमपि पिटकैस्सारमाहृत्य तेभ्यः
शाखाभिर्वृक्षकाणां कृतकतरुसमुत्पादनं, कर्षणञ्च
बीजावाप वितन्वन् समुचितसमयेऽचिंतयन् क्लेशभारम् ॥

भगवत्कैङ्कर्यं हृदि मन्वानो रक्षतिस्म तदुपवनम्
भगवत्सेवैव स्याद्भगवत्पूजार्हवस्तुरक्षापि ॥

तुलसीचंपकजातीकुरंटकाशोककेतकीमल्लीः
अतिमुक्तकुन्दपाटलमुखास्सुमलता अपूपुषत्स वने ॥

शाखोपशाखाभिरनन्तवीथीमुद्वेल्ल्य सूर्यस्य करैरगम्याः
वृक्षा, अथोमूस्सुमरेणुजालैर्मरंदवृष्ट्या बहुपङ्किलास्ति ॥

वृद्धं वनं "त्रीणि सुमानि षट्च
फलानि" यत्रेत्यतिकीर्त्यमानम्
शालीन आलोक्य वनं कृषिः स्वाऽ
व्यर्धेति हृष्टो भवतिस्म भूयः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुष्पिताग्रा

अनुदिवसमसावुषा प्रबुद्धो विरचितकालिककृत्य उत्सहिष्णुः
पठितगुरुपरंपरो जपित्वा जपमतिहर्षयुतो निविष्टचेताः ॥

वियोगिनी

कुसुमान्यवचित्य मालिका विविधाश्चित्र विचित्ररूपिणीः
परिगुंफ्य समर्पयत्यसौ जलजातासनसुंदरीगले ॥

पुष्पिताग्रा

कठिनमनस आत्मनो जनन्या
वचनवशो क्लिशिते वने प्रिये स्वे
अकृत हृदय मङ्गनोपसृत्य
"समुचित साह्यमहं करोमि" चेति ॥

ह्रिया निवृत्ता कतिचित्पदानि
गत्वा पुनः प्रास्थित धिक्कृतह्रीः
मात्रा निरुद्धाच पुनश्च गत्वा
न्यवर्ततार्धाच्च तदध्वनस्सा ॥

शिखरिणी

कदाचिच्छालीने स्थितवति वनेऽभ्रं घलघल
त्तटित्कं, निर्घातप्रपतनमहाभीषणरवम्
नितांतं कर्णारुन्तुदपटपटत्स्फूर्जथुचयम्,
बृहद्धारापातं बत ! बत ! ववर्षोरुपवनम् ॥

वसंततिलका

झंझानिलेन तरवो गिरिशृङ्गसङ्घा
भग्ना; मृताः पशुगणाः पतगा रुदन्तः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद्वृत्य कूलमवहत्सरितां चयश्च
गाढं दिवाऽपि तिमिरं प्रसृतं निशीव ॥

अभूत्साऽर्थं दुर्दिनं तत् सर्वप्राणिभयङ्करम्
अभैषिषुर्जनास्सर्वेऽ प्यकांडः प्रलयः किमु ? ॥

जलदे प्रवर्धमाने क्षणशः प्रथमोदबिंदुपतनादेः
भर्ता सिक्तः स्यादिति मनसि सुगात्री भृशं व्यथिता ॥

वंशस्थम्

विचिंतयन्ती हृदि वल्लभं मुहुः "कथं भवां! स्तत्र बते" ति शोचति
प्रतिक्षणं व्योम निरीक्षते वधूरुदश्रुनेत्राऽर्थयते च देवताम् ॥

"मदम्ब ! शारदे ! देवि ! नेत्वं पक्ष्मेव मत्पतिम्
रक्ष ! त्वमेव शरणं त्वदन्यं नैव वेद्म्यहम् ॥

शार्दूलविक्रीडितम्

अस्मिन् जन्मनि; पूर्वजन्मसु च यत्पुण्यं मया संचितम्
त्वत्सेवाव्रतदानकर्मभिरदो रक्षेत्पतिं मामकम्
नैतद्धोरतरातिवृष्टिजनितक्लेशाः स्पृशेयुर्यथा
पत्युश्चेदनुभोग्यमस्ति दुरितं तत्पीडयेन्मा" मिति ॥

कुलदेवतां सुगात्री सरस्वतीं प्रार्थयंत्येवम्
कथमपि गत्वाऽरामं भर्तारं संदिदृक्षुरासीच्च ॥

नर्कुटम्

अगणितघोरवृष्टि; रतिसाहसिकी च गृहा
न्निरगमदात्ममातुरपि साऽविदितात्मगतिः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदतिपतिव्रतात्वगुणतः किमु तत्समये
प्रशममवाप वृष्टि, रददात्पदवीं च झरी ॥

गत्वारामं दूरान्निरीक्ष्य निरुपप्लवं स्वभर्तारम्
आराममपिच "देवीप्रसाद एष" इति संहृष्टा ॥

प्रत्यागत्य सुगात्री यथापुरं वर्ततेस्म निजसदने
अश्रांतमर्चयन्ती स्वपतिक्षेमार्थिनी देवीम् ॥

॥ इति षष्ठस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ सप्तमसर्गः

अतिवृष्ट्या संक्षुब्धेष्वन्येषु वनेषु जन्तुजालेषु
शालीनं चारामं चाक्षुभितं वीक्ष्य विस्मिता जनता ॥

"व्रीडावती सुगात्री पश्यन्ती वल्लभस्य दुष्क्लेशान्
कर्तव्यविमूढ़ा सा सोढ्वा सोढ्वा चिरं चित्ते ॥

धिक्कृत्य लज्जां जननीवचश्च न्यक्कृत्य दूरात्पतिभक्तिहेतोः
पुरेव भूषाभिरलंकृताङ्गी ययौ वनं यत्र पतिर्वितस्थे ॥

तनोर्विभूषा अवमुच्य गुप्त्वा निबध्य वासस्सुदृढं च कट्याम्
मामेति पत्या विनिवारिताऽपि सहायिनी तस्य बुभूषुरेत्य ॥

शार्दूलविक्रीडितम्

कुद्दालेन समुच्चलत्कुचयुग क्षेत्रं खनन्ती ! प्रयां
त्यायान्ती च चलन्नितंबयुगलं, कुल्योपकुल्या बहूः
कुर्वाणा ततपङ्कबिंदुकमुखं; भारान् वहन्ती मुहु
श्चञ्चन्मध्यमसावहं प्रथमिकाभाक्प्रावृतस्कर्मसु ॥

प्रहर्षिणी

कुर्वत्यास्सरभसकृत्यजालमस्याः
पीनोरोजगुरुनितम्बलम्बवेणीः
उत्कम्पानिकटगतस्य पश्यतस्त
र्ह्रतुर्हृद्गत ! परिकम्पतेस्स भूयः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हरिणी

तदनु मदनास्त्राणां पुङ्खानुपुङ्खमनारतम्
न परिपततां तीक्ष्णां पीडां प्रभुस्सहितुं पतिः
प्रियमतिरुपे"त्योन्मत्ते ! ते न युक्तममूदृशम्
खननमुखकर्मेत्युक्त्वाऽमार्ट्गूढमांबु पटेन सः ॥

मुहुस्तथा मृष्टमपि प्रसूनबाणस्य जाल्मस्य कुचेष्टितेन
जाजायमानं घनघर्मवारि कपोलयोस्सुन्दरयो स्स वीक्ष्य ॥

"असोढ्वा क्लेशं मे क्लिशितहृदया श्राम्यसि भृशम्
परिग्लानं गात्रं तव बहुतरंचेति निगदन्
सुगात्रीं शालीनो निबिडमुपगुह्य स्मरवशः
पिबन् बिंबोष्ठं तद्वदनमभिजिघ्रंश्च नितराम् ॥

नीत्वा निकुञ्जं पतितैस्सुमौघैर्दलैश्च तल्पे रचिते मक्त्या
हृद्ये प्रदिष्ठे स्मरकेलिसौख्ये निमज्जयामास तलोदरीं ताम् ॥

पुनःपुनस्तामुपगूहमानो मुहुश्च चुम्बन् वदनारविन्दम्
पुनःपिबंश्चाधरमेष, कामकेलीविनोदेन निनाय कालम् ॥

गृहं गन्तुमदत्वा स्वां क्रीडन्तं प्राह सा प्रियम्
" नव्यातिनव्या गोष्ठ्येषा गन्तव्यश्च तथापि मे " ॥

इत्युक्त्वा मोचयित्वा स्वां कथञ्चिद् गृह्णती स्विकाः
गुप्ता भूषा अलंकृत्य गात्रं गेहं ययौ सती ॥

पुष्पिताग्रा

प्रियतमचरितं मुहुःस्मरन्ती हृषितमतिर्मृदिताङ्गवल्लरी सा
मधुदिवसकृतातपेन शुष्कीकृतसुमवल्लिरिवास सुन्दराङ्गी ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहङ्गताया अवलोक्य तस्या मुखस्य शोभां मृदिताङ्गवल्लीम्
माताच सख्यः प्रमदस्य कोटीं परामवापुः फलिता स्पृहेति ॥

शालिनी

सख्यस्तस्या भूषयित्वांगवल्लीम्
कौशेयाभ्यां रत्नभूषांगणेन
कृत्वान्वर्थां तां सुगात्रीं प्रजिघ्यु
स्तस्यां रात्रौ केलिकामन्दिरांतः ॥

स्रग्धरा

तत्तत्कृत्यानि कर्तुं त्वरितमत इतस्संभ्रमन्त्यास्तरुण्या
श्चञ्चन्मध्यो, नितम्बद्युतिरतिलसिता; घूसरे श्लक्ष्णचीरे,
दृष्टस्स्रस्तोत्तरीये पृथुकुचसरः आस्येन्दुकस्तूरिरेखा
स्वेदांभोमृष्टकल्पा, मुहुरपि चलिता वेणिका पूर्वदृष्टा ॥

कर्तुमदत्वात्मानं धावन्त्यास्सर्वकर्माणि
कर्तुं स्वयं वने द्राङ्मूर्तिश्चामुष्य मुद्रिताश्चित्ते ॥

अतोऽधुना तां रमणीयभूषादुकूलवासोभिरलंकृतांगीम्
पुरःस्थितामेष उपेक्षतेस्म नारोचतास्मै कृतको विलासः ॥

उदासिता तत्र चिरं स्थिता सा न जानती भर्तृमनोगतं यत्
विचिंतयन्त्यात्मकृतापचारः कोऽप्यस्तिवेत्यात्मनि शङ्कमाना ॥

मालिनी

कथमपि निविवृत्सुः स्वामवोचत्सुगात्री
" बत! बत! वनिताहं कस्य? कुत्र व्रजेयम् ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवतु भगवने यद्रोचतेऽत्र स्थितया
ममतु, नहि चलामी" त्यास्थित * द्वारदेशे ॥

पृथ्वी

चिरेण युवती स्थिता व्यथितचेतसा साहसा
दुपेत्य शयनं शनैः पतिमुवाच "किन्वश्रमत्
भवान् वनगतागतैः ? किमहमेमि ? निद्रापतद्
दृशो ? रिति सुवासितं मुखममुष्य नीत्वा मुखम् ॥

अथ शालिनोऽवादी "रिहमर्थमत्र त्वमागतामी" ति
प्रत्यवद "स्वकलत्रं किमर्थमुपयाति पति" मिति सुगात्री ॥

पुनरवद "न्मास्त्वान्यद्वन्यासि प्रिय! यतो भवान् प्रेम्णा
हित्वौदासोन्यं मम मनोरथमपृच्छ देतदेवालम् ॥

शार्दूलविक्रीडितम्

हन्त ! त्वां प्रिय ! किं वदामि ? गलितप्राया निशा; नाद्दथाः
संवाहाय पदो नेवा सविधमायाहीति, नोन्मील्य वा
नेत्रे पश्यसि चाद्य यवादपि; नैवाहं प्रभुर्ज्ञातुम
स्यौदास्यस्य निदान; मस्तरमहं न स्वापचारं हृदि ॥

मन्दाक्रान्ता

उद्याने ह्यः परिणतममुर्तिकनु पुण्यं ? म; मासम्
पात्रं प्रेम्णश्च समधिकं तस्य संस्मृत्य नाथ !

---

* "आङः प्रतिज्ञायामुपसंख्यानम्' इति वार्तिकेन स्थाधातो रात्मनेपदम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रागल्भ्येन प्रणिगदितुमारब्धमेवं प्रसन्त-
नैतत्साध्व्यास्समुचितमिति ज्ञातधर्मासि देव !"

आचक्ष्यैवं नितरां प्रवर्धमानेन मदनतापेन
भूयोभूयः क्लिन्टा साध्वी भर्तारमब्रूत ॥

"वरं शिला लीयत एकदा या परंतु चित्तं तव नैव हन्त !
उपायमूढास्मि मनो विलेतुं तवे" ति परस्पर्श पदे प्रियस्य ॥

स्पृष्ट्वोपविष्टा शयनीयभागे पत्युः पदे न्यस्य निजाङ्कयास्सा
संवाहयन्ती स्वकुचौ दृशौच गण्डावुपस्पर्शयते मुहुश्च ॥

तथापि न प्रश्लथमौनमुद्रं तं वीक्ष्य शङ्काकुलिता वदन्ती
"किमेत' दित्यार्तमनाः पुनश्च प्राहस्म मन्दं महिलामतल्ली ॥

वियोगिना

"न निवर्तयितुं प्रभुर्मनः परवांताभिरतं भवान् यदि
अविशङ्कममूं वधूटिकां परिगृह्णात्वविलंबितं प्रिय ! ॥

द्रुतविलंबितम्

प्रहिणु तत्सविधं यदि मद्वशा सपदि तां युवतीमहमानये
उपचराम्यनिशं पदकिंकरी वचसि विश्वसिहि ! त्वमुभौ युवाम् ॥

वियोगिनी

बहुना किमु ! यदपेक्षसे विपणस्वाद्य तवांघ्रिकिंकरीम्
प्रभुता किल सर्वतोमुखी निजदारेषु धवस्य कथ्यते" ॥

संवाहयन्त्येव पदे वदन्ती भर्तारमास्ते शयने सुगात्री
कर्णे प्रविष्टो नहि तस्य हन्त ! एकाक्षरश्चापि निरिंद्रिये वा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

आरामे प्रथमे स्वसङ्गमदिने रूपं दृशोर्गोचरी
भूतं यत्कृतकेतरं, सलिलसेकादिक्रियासु त्वरा
पङ्कांभःकणिकाकपोलवदनं मृष्टा च कस्तूरिका
रेखा, ता रतयश्च तस्य हृदयं मुग्धं पुरा चक्रिरे ॥

शालिनी

स्मृत्वा भर्ता तत्सुगात्र्या वनस्थम्
रूपं मुग्धं तत्परात्मा तदानीम्
नैवाश्रौषीद्वाचमस्या, हृषीकम्
मत्या त्यक्तं नैव कुर्यात्स्वकार्यम् ॥

वियोगिनी

अविराममसौ तलोदरी पदसंवाहनकार्यतत्परा
गणनीयपदा पतिव्रता जनताया निशमत्यवाहयत् ॥

भुजङ्गप्रयातम्

परेद्युस्सुगात्री यथापूर्वमित्वा
वनं, कर्म तत्तद्विनिर्वर्त्य भर्त्रा
परं प्रीणितेन प्रभूतादृताऽभू
न्नितांतं कृतार्थाऽतिहृष्टा बभूव ॥

विजानती क्रमेणैषा "स्वप्रियाय न रोचते
भूषाडम्बर इत्येनं सिषेवे निरलंकृतिः ॥

वनं यांती प्रतिदिनं वनकर्माणि कुर्वती
प्रीता भर्त्रोपभुक्तेति विज्ञायांबाह पुत्रिकाम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"जातासि जाते ! परमेष्ठिकांतावरेण मे, वेत्सि च सर्वधर्मान्
त्वया पवित्रीक्रियते स्ववंश इत्याह सा स्वप्नगता कदाचित् ॥

देशभ्रष्टे जनके तव सूनुर्मां समुद्धरेद् वृद्धाम्
इति कांक्षंती चित्ते तज्जननाय प्रतीक्षमाणाहम् ॥

शिखरिणी

यदा भर्ता न त्वामचकमत मे कांक्षितमिदम्
वृथेति प्राजल्पं, व्यथितहृदयाऽसीः प्रकुपिता
तदा, लीहास्योक्तीरपि पतिगता नैव सहसे,
सुते ! पातिव्रत्यं तव शतमुखैः श्लाघ्यमसदृक् ॥

वसंततिलका

न श्लाघसेऽन्यधनतां नच वीक्षसेऽन्य
सौंदर्यं, मर्थयसि भर्तृहिताय देवान्
हृष्टे प्रियेऽतिहृषिता, क्लिशिता च तस्मिन्
क्लिष्टे, कृशेऽतिकृशिता, दृपिता न मुग्धे ॥

न प्रोषिते भर्तरि गात्रवल्लीमनर्घ्यभूषाभिरलङ्करोषि
गम्भीरतां नैव जहासि पूर्णकुम्भी यथा दर्शयसे सुपुत्रि ! ॥

दिवानिशं स्वामतिमात्रभक्त्या निषेवमाणेषु जनेषु वाणी
सल्लापगोष्ठीं कुरुते त्वया यत्तदेव लोकोत्तरतानिदानम् ॥

वसंततिलका

जाते ! त्वयि स्फुरति कश्चन दोषलेश
आकर्ण्यतामवहितेन हृदा मदुक्तिः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संश्रूयतेऽसमयमन्मथकेलिकाभि
स्सूते सती गुणदरिद्रमिति प्रवुद्धैः ॥

मन्दाक्रांता

त्वय्यस्निग्धं तव पतिमहं वीक्ष्य संतप्तचित्ता
"गच्छोद्यानं; कुरुच वनकर्में" त्यत्रोचं कठोरम्
नासन् भृत्याः किमु ? वद ! वनीपालनेऽस्मन्नियुक्ताः ?
किं गन्तव्यं वनमनुदिनं तेन, गच्छेः कुतस्त्वम् ? ॥

कनीयस्येव वयसा ज्यायसी त्वं विवेकतः
न विधिर्वा निषेधोवा त्वयाऽज्ञातोऽस्त्यसंशयम्" ॥

एवं ब्रुवतीं जननीं निरीक्ष्य दुहिता स्मितप्रभाजालैः
द्विगुणीकृतास्यशोभा मन्दं मन्दं समाचष्ट ॥

"सद्वृत्तमात्मीयपतेर्हितं यत् दुर्वृत्तमन्यद्गणयामि मातः !
भक्त्या तदाज्ञां शिरसा वहामि नाहं स्वतन्त्रास्मि विधौ निषेधे ॥

न जहामि निषिद्धमितिच न करोमिच विहितमिदमिति विविच्य
अविशङ्कमाचरेयं पतिप्रियं, नाचरेयमन्यदहम्" ॥

ब्रुवत्या जननीमेवं साक्षाद्भूय सरस्वती
पतिभक्तिं श्लाघमाना तस्या मातरमब्रवीत् ॥

"मारंभ्रमन्विष्य ! कदाप्यमुष्या
श्शीले, स्वपापं नहि केवलं वाम्
वंशद्वयस्यापि च पापराशि
मेषा ममार्जोर्जितभर्तृभक्त्या ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इतःपरञ्चापि कथैतदीया प्रकाशतां याति पवित्रभूता
प्रकाशयिष्याम्यहमेव लोके मत्प्रीतिपात्रं भवतीयमार्या ॥

इति ग्रन्थं पठित्वाऽसौ वटुस्तमब्रवन्धत
गुरुराहानयोर्दिव्या गाथेयमवधीयताम् ॥

शार्दूलविक्रीडितम्

दम्पत्योरनयोर्नवेद्मि करुणा गीर्देवताया अहम्
यावत्यस्ति कदापि नैशसमये स्वप्ने पुरस्तान्मम
साक्षाद्भूय समर्प्य पुस्तकमिदं "पारायणं प्रत्यहम्
प्रातःकुर्वि"ति चोपदिश्य गतवत्यन्तर्धिमेकक्षणे ॥

द्रुतविलंबितम्

नहि ममैव; पुरेऽत्र समर्पितं पठनलेखनविद्भ्च इदं तया
उषसि पौरजना मिथ ऊचिरे हृदय आपुरतीवच विस्मयम् ॥

शालिनी

ह्यस्सायाह्ने तद्वने तौ प्रपूतौ
संदृश्याभ्यां स्वीकृतः स्वागतेन
विस्मृत्येमं ग्रन्थमाया; ममुष्मै
गत्वाऽऽनैषीच्छिष्य एतां प्रवृत्तिम् ॥

नर्कुटम्

इति स गुरुस्तयोस्सुगुणसम्पदमुद्गणयन्
नयनजलं मुहुश्च समुदीतमपि प्रमृजन्
प्रणतिशत विनम्रशिरसा च तयोरचयन्
हृदपतनेन तस्य मिथुनस्य शुशोच भृशम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जानपदवेषरक्तं शालीनस्य हृदयं यथान्यस्मिन्
तव नलकूबररक्तं मयि कलभाषिणि ! मनोऽपरक्तमभूत् ॥

ततस्स सुमुखासर्ति वीक्ष्याह मणिकन्धरः
"काश्मीरिका हि भवती सुगात्रीं नहि वेत्ति वा?" ॥

इत्युक्ता सुमुखासक्तिस्समाचष्ट "कुतो न ताम्
जाने ? ऽहं सा सुगात्री" ति स्मितोज्ज्वलशुभानना ॥

तत्रस्थास्तच्छ्रुत्वा प्राहुस्तां विस्मयेन "यदि भवती
सा हृदपतिता भ्रियते कथं कुतश्च परिवर्तितं नाम ? ॥

साचष्ट "यां शततालदघ्ने हृदे स्मरन्तीं पतिपादपद्मे
नक्रोऽग्रसन्मा; मितरेद्युरस्म्युद्गांत ऽमुनाऽजीर्णतया प्रतीरे ॥

सविस्मयं पश्यति सर्वलोके गृहङ्गता वाग्रमणीं "पुनर्माम्
संयोजयेर्मत्पतिने"ति भक्त्या आराधयन्त्यासि निविष्टचेताः ॥

देव्या आराधयित्र्या मे बभूव पलितं शिरः
न भर्तृसेवाभाग्यं मेऽस्तीति निश्चितवत्यहम् ॥

गोष्ठ्यां तत्त्वज्ञानां योगज्ञानां च कालमपनीय
मृतजननी विचरन्ती तीर्थान्यायामिहस्थदेवकुलम् ॥

विदुषां सेवित्र्या मे सुमुखासत्त्याह्वयं बुधाश्चक्रुः
सुमुखा नाम बुधा, स्तत्सविधस्थितिरुच्यते किलासक्तिः ॥

शिष्टं ज्ञातप्रायं पातिव्रत्येन संस्तुताप्येवम्
क्लिष्टा भ्रियेच जाने न कथां पत्युर्हृदपतितस्ये" ति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रुत्वा मणिस्तम्भ उवाच " साध्वि! ग्रस्तापि नक्रेण पुनर्धृतासुः
येनासि तेनैव पतिव्रतात्वे "नासून् धरेत्किं ? न पतिस्त्वदीयः ॥

माशङ्किष्ठास्सत्वरमवाप्स्यसि त्वं स्वभर्तृसंयोगम्
बहुना किमु? भर्ता ते शालीनोऽसौ "त्यदर्शयत्स स्वम् ॥

नाराचः

शृणु मम चरितं तथाऽकर्ण्य वाचं त्वदीयां क्रुधा
कलुषितहृदयो विवेकेन लुप्तेन धावन् द्रुतम्
ह्रदजलपतितोऽस्म्यथाधो जलस्तम्भविद्याचणम्
कमपि मुनिवरं समाधिस्थितं दिव्यमूर्तिङ्गतः ॥

दूरपातसमुद्भूतश्रमेणाहं निरन्तरम्
उच्छ्वसन्निश्वसन् गत्वा मन्दं मन्दमलोकयम् ॥

शालिनी

उन्मील्य स्वं नेत्रयुग्मं स सिद्धः
ईक्षाञ्चक्रे मां मकार्षं न मोऽहम्
मद्गाथामावेदयं सर्वमस्मै
" कीदृक्क्रुद्धोऽसी" ति मन्दं हसित्वा ॥

अयमैकान्तिको देश इत्यस्थामल, नार्हति
स्थातुमन्यो मुहूर्तञ्च " इत्युक्त्वा वीक्ष्य मे मुखम् ॥

हरिणी

ददनुमतिं तस्मान्निघ्ये निवस्तुमहस्त, दु
लसितहृदयस्मद्भक्त्या मे वयः स्थितकाम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मणिमसुलभं कञ्चिदिंसहं स्ववाहनमार्पिपत्
सुनिशितनसिं दिव्यं कञ्चिन्नयस्य हतिर्वृथा ॥

तन्नाम यं छेत्तुमयं धृतोऽसिः प्रोन्नीयतेऽवश्यममुं निहन्यात्''
इत्येतयोक्त्या हृषितोऽधिरुह्य सद्यस्तदाकृष्टहरिं रयेण ॥

हृदाद्गभीराद्बहिरेत्य गच्छन् व्योम्ना दिदृक्षुर्व्यचरं दिगन्तान्
हेतोर्वयस्तम्भमणेर्भवामि नाम्ना मणिस्तम्भ इति प्रसिद्धः ॥

मम गुरुगृहीतमेतं वेषं सिद्धस्य तत्प्रियं मत्वा
दिवसात्तस्मात्प्रभृति स्वीकृत्याहं चरामि भुवनानि ॥

व्यस्मार्षं तद्विनोदेन त्वामहं हृदयेश्वरीम्
अत्रागतस्य मे सर्वां ज्ञानाति भवती कथाम्'' ॥

इति तस्य वचः श्रुत्वा मणिस्तम्भस्य सुन्दरी
हसंती सुमुखासचिः प्राहसैवं परीक्षितुम् ॥

''यदि शालीनस्त्वं वद ! का विक्रटोक्तिः श्रुता त्वया मत्तः
अपतो यतो हृदे ! मां किमवोचस्त्वं रहः श्रवस्यादौ ?'' ॥

इत्युक्त्वा ''मातावद्वदतु, भवान्; प्रथमतोऽस्मि कथयामि
अस्यै कलभाषिण्या'' इति सञ्चिन्त्याह नहि समुचितमिदम् ॥

श्रोष्यति दूरश्रवणादयं; लिखित्वा प्रदर्शयामी'' ति
मत्वा विचिंत्य पुनरपि ''संद्रक्ष्यति दूरदृष्टितश्चे''ति ॥

मणिकन्धरमाहस्म ''श्रृण्वादावस्य भाषितम्
वक्ष्याम्यहं ततस्त्वां; द्रक्ष्यामस्तन्निदर्शनम्'' ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं सुमुखासत्त्या प्रोक्तो मणिकन्धरो मणिस्तम्भम्
नीत्वैकान्तभुवं तद्रहस्यमाकर्णयामास ॥

ततस्तं सुमुखासक्तिराह "शालीन एकदा
एवां ते नौ नर्मगोष्ठ्यां व्याजहार प्रसङ्गतः ॥

"पीता सुधा भवत्या ? सिद्धरसः कोप्यलम्भि वा तरुणि !
अभिवर्धते तरुणिमा प्रतिदिवसं ते दृगुत्सवं कुर्वन् ॥

पुंसोऽपि "प्रागेव हि विशीर्यते यौवनं स्त्रीणाम्
इत्याहु स्तारुण्यं तव वधु ! सितपक्षचन्द्रिकेवास्ति ॥

प्रेयसि ! वद ! को हेतुस्तस्ये" ति, ततोऽचकथमेवम्
"नहि वेद्मि निमित्तमहं नास्त्यप्यस्तीव भातिहि ममत्वात्" ॥

निशम्य शालीन उवाच "कांते लावण्यमात्मीयमसन्न, सत्यम्
न वेत्सि चेत्त्वं कथयाम्युपेहीत्याहस्म कर्णे मम वाचमेताम् ॥

शिखरिणी

"अतृप्तस्संभोगे ततनववयो नित्यसुभगम्
यथास्याद्गर्भो मा भवतुच कदापीति बहुशः
गिरां देवीं संप्रार्थयमहमसौ मे वरमदा
त्तथे "त्येतद्धेतोर्विलसति वयस्तेऽतिमधुरम्" ॥

प्रहर्षिणी

श्रुत्वा तद्वचनमवोचमाप्तचित्रा
"देव्यर्चाहृषितमतिर्मयार्थिता प्राक्
"मत्सङ्गात्तव तनयः प्रजायत मि
त्येतं मे वरमददाद्दयांतरङ्गा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परस्परविरुद्धौ द्वौ वरावेतौ कथं प्रिय !
फलेता"मि, त्यसोढ्वाऽसौ क्रुद्धोऽपप्तद्भ्रदांतरे" ॥

इति कथिते मणिकन्धर आह। "ब! सुसंवदन्ति वचनानि युवयोर्द्वयोस्तवायं माशंकिष्ठाः पतिस्त्रिसत्य" मिति ॥

शार्दूलविक्रीडितम्

सद्यः कन्दलितत्रपांकुरदृशा. संफुल्लवक्त्रांबुजा
सानन्दं सभयं सभक्तिविनयं भर्तुः स्पृशन्ती पदे
प्राह।"ज्ञा किमवद्यभाषितमहं प्रायुञ्जि नु त्वां प्रति ?
धिङ्मा"मित्यदसीयपादयुगलीं निर्मृष्टवत्यश्रुभिः ॥

किञ्चाह सा "प्रस्तुतरूपभाषा गतैर्भवान् स्मारित एव चित्ते प्रायेण सन्दृश्यत आकृतीनां संवाद इत्यासमुपेक्षयाहम् ॥

भाग्यं तदानीम् मम तावदेव हन्त धुनानेन महाजनेन
कृतं सुपर्वन वृथा; भवेद्धि देवीपदांभोरुहदिव्यसेवा" ॥

इति दृष्ट्वा मणिकन्धरमुवाच "बहुशो मया श्रुतस्सभवान् दूरश्रवणबलात्तव गीतं श्रद्धाऽमुना प्रकीर्तयता ॥

शार्दूलविक्रीडितम्

गन्धर्वो जनुषा, शुभाकृतिरसि त्वं, सङ्गीतसाहित्ययो
र्निष्णातश्च· तपोधनश्च सुमहान्, भक्ताग्रणीश्चक्रिणः
शिष्यो धातृसुतस्य नारदमुनेः पुण्यञ्च मूर्तीकृतम्,
केनाभाग्यवशेन दुःखकृदयं शापोऽपतन्मूर्ध्नि ते ? ॥

इति तच्छापं श्रुत्वा विषद्य कलभाषिणी भृशं प्राह
मणिकन्धरं प्रियतमं "कुतोऽसि नलकूबरेण शप्तस्त्वम् ? ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रुता कलापूर्णकथा त्वया प्राग्रम्भा यदा पृष्टवती तदीयम्
कथाप्रसङ्गं न कुतस्समाधाः ? "द्वारावतीप्रांतभुवी"ति तस्यै ? ॥

आकर्ण्य तत्प्राह स "न श्रुता सा
कथा मया, त्वच्छ्रुतया तु भाव्यम्"
इ, त्यब्रवी"त्सां, नहि तत्प्रसङ्ग
काले भवान् सन्निहितो म"मेति ॥

वसंततिलका

संदर्शनं प्रथममम्बुजयोनिसूनोः
प्रश्नं कुतूहलवशात्कृतमात्मना तम्
तेनोक्तमद्भुत, मपूर्व; मिदं चरित्र
मीक्षे समाहितधियेति, तथा विलोक्य ॥

त्रिकालवृत्तान्यवगत्य "नेदं स्वस्यापि वक्तव्यमिति, प्रवक्ता
संपत्समृद्धो भुवि जात एति पुत्रांश्च पौत्रा"निति च श्रुतं यत् ॥

अविहाय तद्दशानां क्रममाचष्ट सुन्दरी
सविस्मितेषु शृण्वत्सु तत्रत्येषु श्रवःप्रियम् ॥

तत्रस्थकेरलीयो ब्राह्मणमुख्योऽलघुव्रताभिख्यः
आस्ते जपन् श्रिये यः कथाश्रुतिफलं समाकर्ण्य ॥

शार्दूलविक्रीडितम्

आत्मानं स उवाच "कः खलु कलापूर्णः ? कथा कीदृशी
तस्य स्या ? ज्जपितुश्श्रिये मम कथा सा कर्णमेयात्कथम् ?
लब्धं स्याद्यदि तत्कथाश्रवणमायाति प्रभावेन त
स्यायुर्वैभवपुत्रपौत्रमुख मष्टैश्वर्य मभ्यर्थिनम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लब्धस्सदुपायो मे न सम्पदर्थं जपाम्यहं, किंतु
श्रवणाय तत्कथाया" इति जपतिस्म भुवनेश्वरीमन्त्रम् ॥

स्मृत्वा स्वशापं कलभाषिणी तम्
सिद्धं न्यगादी "ज्जहि मां स्वहेत्या
गुरूक्तरीत्या ? परिलब्धशापा
ममर्त्यनार्योपलभस्व ! राज्यम् ॥

इति कथयन्तीं युवतीमाह मणिस्तम्भ "इन्दुमुखि ! हन्तुम्
उन्नीतेऽसौ सुमुखासक्तिर्दिव्याः शशाप पद्भ्यां प्राक् ॥

क्लृप्तं क्लेशैर्मम प्राप्तैर्न हन्यां भवती"मिति
मणिकन्धरमूचे च "जही" मां कलभाषिणीम् ॥

गृहाण ! त्वं खड्गमेनं राज्यलक्ष्मीमवाप्नुहि !"
इति; सा सुमुखासक्ति "श्चैवं कुर्वि" त्युपादिशत् ॥

शार्दूलविक्रीडितम्

"शापान्मृत्युमुखान्तरं प्रविशतो दुष्कर्म लब्धं भवे
द्राज्यं किं मम कीर्तिसाधक ? मुत श्रेयस्करं वेति च
मामंस्था, न तवास्ति पाप, ममुया शापोऽनुभोग्यः; स्वयम्
चैषा प्रार्थयते, परापकृतिपुण्याप्त्या अमुष्या वधः ॥

एवं सुमुखासक्त्या बहुशो मणिकन्धरस्समुपदिष्टः
अङ्गीचकार कथमपि तं कर्तव्यं विधिं मत्वा ॥

प्रणिपत्य मणिस्थम्भं सुमुखासक्तिं च बाष्परुद्धदृशा
कलभाषिण्याह "भयान्न रोदिमि युवां न सेवितवतीति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुमुखासक्तिरवादी " ज्ञाते! ऽपैतीयतैव नः स्नेहः !
द्वौच युवां भाविनि नौ सेविष्येथे गुरुत्वभावनया " ॥!

इति वचसा संहृष्टा पुनःपुनस्तां प्रणम्य हस्तयुगम्
कलभाषिणी स्वमस्तकमारोप्य च मुकुलितं जगादैवम् ॥

श्रवणयुगं पूतं मे श्रुत्वाम्ब ! भवत्पतिव्रताधर्मम्
भवदाशिषाधिगच्छति पतितापि पुरन्ध्रितां पुण्याम् ॥

आशास्तां भवती मां कृपार्द्रहृदया यथा लभेयाहम्
परमपवित्रं पातिव्रत्यं जननान्तरे साध्वि ! ॥

सुमुखासक्तिः प्रायुजदाशिष " मधिगतपतिव्रताधर्मा
भव! लब्धराज्यविभवा रक्षतमस्मादृशान् पतिस्त्वञ्च ॥

मन्दाक्रांता

" माभैषीस्त्वं भव! धृतिमती" त्यादिधर्मोपदेशो
ऽव्यर्थो मे; ते मुखविलसिते दृश्यमाने प्रतीतम्
उद्वाहाय प्रचलितवतीत्यब्जनेत्रे श्रृणु! त्वम् ॥
दैवी कान्ता भवसि; न मनुष्याङ्गना, सत्यमेतत् " ॥

भुजङ्गप्रयातम्

इति स्वां वदन्तीं नता पुण्यसाध्वीम्
मणिस्तम्भमित्वा प्रणम्याह " देहि
असिं प्रेषये" ति प्रदत्तं गृहीत्वा
स्वहस्तेन दत्त्वा प्रियायाम्बुजाक्षी ॥

विलिप्तगन्धा धृतपुष्पमाला पद्मासनस्थाऽभिमुखी च देव्याः
फुल्लारविंदोज्ज्वलवक्त्रतेजा उद्वाह्यकन्येव निषीदतिस्म ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृथ्वी

निरीक्ष्य मणिकन्धरं प्रियमुवाच "देव्यै भवान्
समर्पयतु, संशयं च कुरुतां सुदूरं हृदः
रणेषु परकण्ठनिर्दलनमस्ति वीरोचितम्
त्वमूढशकृतौ प्रिय ! द्रुतगतिर्हि शौर्यं भवेत् ॥

इति सोत्साहं कार्ये प्रबोधयन्त्या वधूट्या: सः
शंसन् धृतिं स्वहृदयं द्रढयित्वाऽकृत वचस्तस्याः ॥

मृगेन्द्रवाहना देवी तदाह मणिकन्धरम्
"सानुकम्पो विलम्बेन त्वमकार्षीरिमं बलिम् ॥

जन्मान्तरे जातमात्रस्सद्यो यौवनमाप्स्यति
महाराज्यं चाधिगच्छेद्दिष्ट्या वर्धिष्यते भवान् ॥

कलभाषिणी विगतभीस्सधृतिर्मह्यं समर्पिपिषुरासीत्
कण्ठं, मम प्रसादात्पुनरपि जीवे, व्रजेत्स्वसदनं, मिति ॥

छिन्नकण्ठा प्राप्तजीवा पुनःश्लिष्टशिरा अभूत्
मृगेन्द्रवाहनादेव्याः प्रसादात्कलभाषिणी ॥

उन्मील्य नेत्रे पुरतो विलोक्य स द्वारकापत्तनसीमवर्ती
स्वकीय आराम इति व्यजानाद्विस्मित्य देवीमहिमानमैट्ट ॥

स्वबन्धुजालं समुपेत्य सैषा त्वामूलमात्मीयमुदन्तमुक्त्वा
नितांतमाश्चर्यमहाम्बुराशौ निमज्जयन्त्यास्त सरोरुहाक्षी ॥

छिन्नं कलभाषिण्याश्शीर्षं मणिकन्धरः पुरोऽवीक्ष्य
देवीमहिमानमसौ तुष्टाव पुनः पुनश्च विस्मयतः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

देवीमेष ततः प्रणम्य सुमुखासत्तिं मणिस्तम्भम
प्यामन्त्र्य स्वहरिप्रसादितमणीहारं समर्प्यादरात्
कृष्णायेत्यलघुव्रताय जपते, वीणामर्सि चालये
गुप्त्वा शापहतो भृगोः पिपतिषुः * श्रीशैलशृङ्गं गतः ॥

सुमुखासत्त्या; स्वप्रियदारैः शुश्रूषितो मणिस्तम्भः
देव्यालये न्यवात्सीज्जितेन्द्रियो योगमार्गकृतचेताः ॥

सुमुखासत्तिश्च प्रियशुश्रूषाया अनन्तरं योगम्
तदनुज्ञाताऽभ्यास्यत् तदभिनिवेशेन मन्मथे शमिते ॥

मणिस्तम्भस्ततो दारैर्देशांतरदिदृक्षया
सिंहवाहनमाकृष्य प्रारूढः प्रस्थितो मुदा ॥

संदृश्य स ग्राहतिमिंगिलादि नानाप्रकारैर्जलजन्तुजालैः
भयङ्करं, तुङ्गतरङ्गसङ्घै र्हृद्यञ्च वार्धिं वदतिस्म दारान् ॥

"प्रेक्षस्व ! कांते ! रविरश्मिजालै र्धलंधलच्छीकरवृन्द, मब्धिः
आविष्करोतीव निजं विभाति रत्नाकरत्वं स्वतरङ्गघोषैः ॥

प्रिये ! निरीक्षस्व ! तिमिङ्गिलेन शिरोबिलादूर्ध्वकृताम्बुधाराम्
कौतूहलेनाम्बुनिधिर्जलानि शृङ्गेण सिञ्चन्निव देवनद्याम् ॥

और्वाग्निनाम्ना विरहाग्निनार्तो रसोल्लसन्तीं त्रिदशस्रवन्तीम्
समुद्र आश्लेष्टुमिवोर्मिबाहुप्रसारणेन प्रतिभाति तन्वि !

---

* श्रीशैले कर्मारिनामकं किमपि शृङ्गमस्ति । यस्मात्पतिताः प्राप्नुवन्ति शिवसायुज्यमिति प्रथा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुष्पिताग्रा

ललितमकरिकापयोधरत्वं तरुणि ! गतास्वपि सर्वनिम्नगासु
जलनिधिरुपगूहते रसाढ्यां सुरतटिनीमिति भावये लताङ्गि ! ॥

जलं पिबन् वारिधरो रमाया वेणीव पुम्भावरतौ श्लथास्ति
शम्पा तदीयांगकरम्यकांतिरिवाब्धिरुत्तानशयो हरिर्वा ॥

इति श्रृङ्गाररसोज्ज्वलवचोभिरासस्मितामवनतास्याम्
दृष्ट्वा तां तद्विभ्रमविलासमुग्धोऽस्थिताऽमुष्यै ॥

सुमुखासचिरवादी " त्वदाशयानुसरणं हि मम धर्मः
कुत्रास्ति स्वातन्त्र्यं म" मेति, येनातिहृष्टरसः ॥

किसलयकुसुमकदम्बैर्हृद्येषु लतानिकुञ्जतल्पेषु
प्रियया सुमुखासत्त्या निरविक्षन्मन्मथक्रीडाः ॥

॥ इति सप्तमस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथाष्टमस्सर्गः

अलघुव्रतस्य जपितुर्ध्यन्दं तत्र भुवनेश्वरीमन्त्रम्
साक्षाद्भूयावोचद्दे "वीष्टि सेत्स्यसि त्वमन्यत्र" ॥

इति भाषित्वा देव्यामन्तर्धिं हन्त ! गतवत्याम्
अलघुव्रतस्त्वकाण्डे वातोद्धूतः प्रशुष्कपत्रमिव ॥

मन्दाक्रांता

व्योम्नानीतः पटुरयगतिः क्वस्यचित्पत्तनस्य
राजास्थान्यामथ निपतितो यावदुन्मीलिताक्षः
अग्रे सभ्यान् हरिहयमिवैक्षिष्ट कञ्चिन्नृपालम्
बालां काञ्चित्कनकमयडोलान्तरे शोभनाङ्गीम् ॥

चित्रीयमाणः पतनेन विप्रः प्रशान्तसंक्षुब्धमनाः क्रमेण
आशीर्वचोभिर्मणिकन्धरेण दत्तं नृपायोपजहार हारम् ॥

शिखरिणी

गृहीत्वा नत्वा तं नृपतिरुपवेश्य स्वसविधे
विदित्वा तस्याख्या मभिजनमियन्मात्र; मवदत्
"बहुश्रान्तो दृष्टस्त्वमसि; बत ! विश्राम्य ! विरत
श्शनैर्वृत्तान्तं मामवगमय ! ते तत" इति ॥

दृष्ट्वा राजा हारं "सर्वश्लाघ्योपलब्धो मे
उपहारोऽस्तु शिशोरेवेत्यस्याः कण्ठभूषणं चक्रे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मणिहारनायकमणिस्पृष्टे वक्षसि शिशुरकाण्डे
दशनप्रभाविभासितवदनसरोजा चकार मृदुहासम् ॥

हसंत्याह च "पश्यामि मणिहारमिमं पुनः
व्यब्दादनन्तरं पुण्यसंपदा से दशो" रिति ॥

तच्छ्रुत्वा तत्रत्यास्सभ्याश्चित्रलिखिता इवानिमिषाः
अविचलिताश्च बभूवुर्मुहूर्तमाश्चर्यहृतचित्ताः ॥

दृष्ट्वा शिशोराननमुर्वरेन्द्र "इदं वचश्चित्र, मियं शिशुः किम्
देवाङ्गना ? कारणमानुषी वा ? संलापयामी"ति वदन्नुवाच ॥

"चित्रं ! बाले तवास्तां न द्वौ मासौ लब्धजन्मनः
कथं वदसि दृष्टोऽयं हारो वर्षद्वयात्पुरा ? ॥

इति वाचं सा श्रुत्वा शिशुराह यथा पुरा जनुषि
अद्राक्षमिमं हारं स्मरामि संदृष्टमात्मनहम्" ॥

तां वीक्ष्य भूमीपतिराह बाले ! भाव्यं त्वया कारणजन्मनैव
कौतूहलेनास्मि गृहीतचेता आमूलमावेदय ! ते कथां माम् ॥

पूर्वे जन्मनि काऽभूस्त्वं ? कुतो जातात्र बालिके !
इति पृष्टा सभ्यबृन्दं सावधानमशुश्रवत् ॥

शार्दूलविक्रीडितम्

"राजन् संश्रृणुतां भवान् गतजनेः प्राग्जन्मनि ब्रह्मणो
देव्याऽहं पुषिता शुकी, हतविधेश्शप्ता द्वितीयं जनुः
प्राप्तं, त्वामवकर्णयामि, शृणु, तच्छापस्य मूलं कथा
मायुश्श्रीकुलवर्धनींच पवितां जिह्वालतायाः फलम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिखरिणी

वसंत्यां शुद्धान्ते मयि किं कदाप्यम्बुजभुवो
गिरांदेव्या सार्धं धृतलसदलङ्कारवसनः
गृहारामे क्रीडाविहरणविनोदेन विचरन्
सरोजामोदैस्सञ्जनितविकृतिश्चेतसि विधिः ॥

स्तम्भेन माणिक्यमयेन मध्ये सोपानजालेन हिरण्मयेन
शोभायमानस्य सरोवरस्य प्राच्यां दिशायां तरुणामरद्रोः ॥

सुमतल्पमधिशयानस्सरोवराभिमुख आस्त वाग्देव्याम्
कुर्वत्यां संवाहनमङ्कावरोप्य पादयुगलस्य ॥

क्षणात्क्षणेन प्रतिवर्धमाने मानङ्गतापेन मुखं युवत्याः
त्वरायमाणैर्वदनैश्चतुर्भिर्जिघ्रांसुरावर्तयत स्वपार्श्वम् ॥

मालिनी

प्रहसितवदना सा वीक्ष्य चेष्टास्तदीया
अवकथ "दतिचित्रं ! त्वं चतुर्भिर्मुखैश्च
अभिगतकुतुकैर्मामेकवक्त्रां प्रणिस्से
यदि कथमलमस्मि प्रेष्ठ ! सोढुं ! कृतं तैः" ॥

इति संस्तभ्यगलं, मुखमपाय्य करसंवृताधरोष्ठी सा
स्मितकोपावक्षिप्तभ्रूविलासनृत्यैः प्रदर्शयन्त्यस्थात् ॥

पृथ्वी

समुज्ज्वलितमन्मथो जलजयोनिरेतैः कृतै
र्बलाद्विनमयन् मुखं मृदुरदच्छदं योषितः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चकार रदंशितं, तदनु तद्गलेऽतर्कितम्
बभूव मधुरं मनोज्ञभणितं कलाभेदनात् ॥

शिखरिणी

सुप्तावस्थां स्वस्याः प्रियदशननिष्पीडनकृता
मपह्नोतुं तत्पीडनमसहमानेव कुपिता
असौ वाचां देवी स्वपतिविमुखाशेत, विधृति
स्तदा स्रष्टा मिथ्याधृतधृतिरभूत्तद्विरहतः ॥

तस्या ऊरुश्लेषे नयनान्तनिमीलनादिचेष्टाभिः
अज्ञासिषं मनोगतमनङ्गशास्त्रप्रसिद्धाभिः ॥

ततो विधाता पुरतःस्थवृक्षशाखासमालंबितपञ्जरस्थाम्
दृष्ट्वाह मां "कीरि! कथां शृणोमि कालं विनेतुं कथयाद्य काञ्चित् ॥

मंजुभाषिणी

इति, सद्य एवमवदं प्रणम्य तम्
"भगवन् ! कथापटुरहं पुरस्तव !
शृणुयां भवत्कथितव"स्त्विति, प्रभुः
स उवाच "तर्हि कथयामि ते यथा ॥

कासारसंज्ञे पुरभेदनेऽभूद्राजा कलापूर्ण इति प्रसिद्धः
व्यजेष्ट राजसकलान् स्वकीयलीलाकलाविक्रमसम्पदा यः ॥

जातमात्रः प्राप्तसद्योयौवनः प्रत्यपादि च
स्वभावनाम्ना सिद्धेन मणिं चापं शरान् शितान् ॥

असौ मणिश्शोणतेजा जिगीषोः पुष्पधन्वनः
जयस्य कारणं चापश्चाक्षया इषवोऽप्यमूः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मदाशयो नाम नृपो युवत्या रूपानुभूत्या निजमन्त्रिणाच
वीरस्वभावेन यदृच्छया तं राजं कलापूर्णमभिप्रयातः ॥

तदा कलपूर्णनृपः स्वकीयकोदण्डसंरम्भणचारुभङ्ग्या
वीरस्वभावं प्रदमय्य हन्त पलाययामास नितान्तमारात् ॥

मदाशयं तं शरणागतं स्वं कलत्रयुक्तं निजदास्यवृत्त्याम्
नियोजयामास॰ ततस्तदाज्ञाः कुर्वाण आस्ते स गताभिमानः ॥

निशम्य पत्युक्तकथां वधूटी कृत्वा स्मितं मामवदच्च "पृच्छ !
ततः कलापूर्णकथास्ति के" ति कौणतस्य मातापितरा" विति त्वम् ॥

इ॰ त्येवं प्रश्नकर्त्रीं मां निरीक्ष्याम्बुजसंभवः
"वृतोऽभिनवकौमुद्या सुन्दरांग्या विलास्यसौ ॥

पितास्य सुमुखासक्तिनाम्नः काचिदपांसुला
माताऽसीच्च मणिस्तम्भनामा कोऽपी" त्यवोचत ॥

वाणी हसन्ती परिवृत्य सद्यः प्रेयांसमाश्लिष्य जगाद "किं किम् ?
प्रसूः पुमां स्तस्य पिता वधूटी ? कीदृङ्मतिभ्रांतिरभूत्तवे" ति ॥

पृष्ठेऽस्य सा चपेटा हसन्मुखी कुर्वतीच तमपृच्छत्
"उपरि कथां राज्ञस्तस्यावेदय ! मा" मिति स्निग्धा ॥

तया शृङ्गारगोष्ठ्याऽभूद्विविरानन्दतुन्दिलः
सम्मुग्धः स्वप्रियाकण्ठं समाश्लिष्टः पुनःपुनः ॥

आस्यानि चत्वारि यथा स्वदेरन् तथा स आवर्त्य गलं स्वकीयम्
श्लिष्टः स्पृशन् गण्डयुगीमदात्तदोष्ठप्रपानोत्सवमाननेभ्यः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनिताधरपीडा सा वदनेनैकेन भारती रुष्टा
"नहि वेत्सीयत्ता"मिति "कृतमेते"नेत्यपृच्छदब्जभवम् ॥

"भवता कथितो राजा किमभूत्तत ?" इति विमुक्तसंश्लेषा
द्वाभ्यां पाणिभ्यां तन्मुखानि किंचिदिव वलतेस्म ॥

शार्दूलविक्रीडितम्

तेनाविष्कृतपीवरस्तनयुगं सूक्ष्मञ्च मध्यं विधिः
पश्यन् मुग्धमनास्तदीयमधरं स्वादिष्ठमस्वादत
यत्नेनैव, यदा गिरांयुवतिरा "हात्यन्तमीदृक्क्रिया
प्रज्ञालुस्त्व, मलं भवान्नरपतेर्गाथां समाख्या" त्विति ॥

एवं पृष्टो धाता भूयोभूयश्च भारतीदेव्या
अचकथदित्थं तस्यै "किं स्या ? देषोऽभवन्महाराजः ॥

सकलत्रः कलापूर्णो मन्त्रिणा सत्त्वदात्मना
पुरे क्रमुककण्ठोत्तराख्येऽङ्गविषये स्थिते ॥

भूत्वा पट्टाभिषिक्त स्साम्राज्यवैभवमाश्नुत
मदशयः पत्तनस्य तस्य निर्माय काञ्चनम् ॥

प्राकारं तत्कृपां लब्ध्वा सकलत्रो निरन्तरम्
वध्वाभिनवकौमुद्या सहितं तं महीपतिम् ॥

सेवमानो मणेस्तस्य सन्दर्शनमहत्त्वतः
प्रपेदेऽन्ते दुहितरं नाम्ना मधुरलालसाम् ॥

महिमानं मणेः ख्यान्तः प्रथमागमसंज्ञकः
द्वितीयागमनामा च तृतीयागमनामकः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थागमसंज्ञी च चत्वारस्तत्पुरोधसः
समुपेत्य कलापूर्णं तद्भूषितमहामणिम् ॥

पर्यायेण स्पृशन्तस्तत्स्पर्शेनानन्दमाप्नुवन्
वशंवदेषात्मनस्तेष्वासीत्स्निग्धः स राणमणिः ॥

शार्दूलविक्रीडितम्

तेष्वेकेन पुरोधसा बत ! मणौ स्पृष्टेऽतिमात्रं कला
पूर्णः क्रुद्धतया न केवलममुं स्वस्यापराद्धं जनम्
तान् निष्कासयतिस्म हन्त! चतुर, स्तेषांच राज्ञा पुरा
प्राकारं च मदाशयेन रचितं हैमं बभञ्ज क्षणात् ॥

मदाशयः कलापूर्णकृतेन न गतश्शुचम्
आहात्मानं "तदीयोऽहमङ्गेष्वेतस्य कुत्रचित् ॥

जीवा"मीति ततस्त्यक्त्वा कलापूर्णस्य सेवनम्
पुरं क्रमुककण्ठोत्तराख्यञ्च सकुटुम्बकम् ॥

मन्दाक्रांता

गच्छन्नग्रे कलशयुगलं वीक्ष्य पूर्णं प्रहृष्टो
गत्वा मध्यं विषयमवसद्यत्र दीर्घं सुखेन
यात्राक्षोभान्मधुरपदपूर्वाऽगमल्लालसा सा
कन्यारत्नं बत ! बत ! कृशीभावमह्नां क्रमेण ॥

उत्तरोत्तरसौख्यान्याशंसमानैर्नगण्यते
स्वकीयजनतापीडा मध्यकाले समागता ॥

पुरीं क्रमुककंठोत्तराख्यां स पुनरागतः
भाग्येनैव शिशोस्तस्याः प्रेरितो नु कलत्रयुक्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आगत्य कलापूर्णे सन्दृष्टे मधुरलालसा तनया
गतकार्श्या विलसन्ती नितरां सन्दृश्यतेस्म तदा ॥

वंशस्थम्

तथा प्रसन्नां नितरां मदाशय
स्सुतां कलापूर्णनृपस्य सन्निधिम् ॥
विनीय विज्ञाप्य तदीयसंकथाम्
स्तुवंस्तदीयं महिमानमद्भुतम् ॥

उवास तत्रैव सुखं तरुण्या पुरोधसस्ते प्रथमागमाद्या:
पुनस्समागत्य सिषेविरे च नम्रा: कलापूर्णनृपं पुरेव ॥

संवर्धिता पितृभ्यां तारुण्यं मधुरलालसा प्राप्ता
अतिमात्रमाश्नुत कलापूर्णेनात्मीययौवनस्य फलम् ॥

आकर्ण्यातिप्रेम्णा दुरपह्नवकन्दलत्स्मिता वाणी
संकुचितभ्रूयुगलाऽवेदितकोपा प्रियं प्राह ।

"अपसरतु भवान् दूरं कियान् महान् भवति ? काव्यमेतन्माम्
उद्दिष्टं खल्वि"ति, विधिरवदत्प्रहस "न्नवैषि कथ ।"मिति तत्॥

सरस्वती प्राह ततो "भवन्तं निषेवमाणा किमहं न वेद्मि ?
इयंतमर्थं ! भवते मयैव वाक्चातुरीदृक्कविता च दत्ता ॥

किं किं ? भवान् कथयतीत्युदासवृत्त्याद्ययावदहम्
आकर्णयामि कथितां कथा, मिमां विस्तृणोमि, संशृणुताम् ॥

गद्यम्

रूपकातिशयोक्त्या कथा कथिताऽत्रभवता । यथा कासारपुरं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सरोवरमिति – कलापूर्णः सरसि तस्मिन् प्रतिबिंबितं मम चन्द्र सदृशं वदनमिति । कलापूर्णः सकलान् राज्ञो लीलाकला विक्रम सम्पदा व्यजेष्ट – मम मुखं सौन्दर्येण सर्वासां स्त्रीणां मुखान्य तिशेते इति । तन्नाम लोकोत्तरसौन्दर्यशालीति । स्वभावनाम्ना सिद्धेन मणिः चापं, शितान् शरांश्च लब्धवानयम् – प्रकृत्यैव ममाधरो, भ्रुवौ, कटाक्षा लब्धा इति । मदाशयनाम्ना केनचि द्राज्ञा रूपानुभूत्या भार्यया मन्त्रिणा धीरस्वभावेन यदृच्छया भियातः कलापूर्णः कोदण्डसंरंभेन धीरस्वभावं प्रदमय्य पला यितं कृत्वा शरणागतं मदाशयं कलत्रयुक्तं निजदास्यवृत्त्यां नियोजयामास – भवति (ब्रह्मणि) हृदयं दृष्टिञ्च सरोवरगत मन्मुखप्रतिबिम्बंप्रति प्रसारयति । तत् मम मुखप्रतिबिम्बं भवतो धैर्यं दूरीकृत्य दृष्ट्यासह भवन्तं वशीचकारेति। तेन भवद्वचनेन स्मयमानाया मम स्मितमभिनवकौमुदीति तस्यकलापूर्णस्य पिता सुमुखासत्तिनाम्नी कान्ता; माता मणिस्तम्भनामा पुरुषः– मम मुखप्रतिबिम्बं शोभनमुखसामीप्यहेतुना (सुमुखासत्तिहेतुना) सरोवरस्थमणिस्तम्भादजनीति । कलापूर्णस्य मातापितरौ व्यत्यस्तौ कृत्वा कथयतो भवतो वचसा दुर्निरोधहासाया भवदभिमुखं वलन्त्या मम मुखं दृष्ट्वा (इतः पूर्वं विमुखीशेतेस्म) ममाङ्गमङ्ग देश इति कण्ठोपरिस्थितं मुखं क्रमुककण्ठाचरपुरस्य राजा कला पूर्ण इति । तस्य मदधीनतया (मुखरूपकलापूर्णस्य) सत्त्वदात्मना (समीचीनत्वदात्मना) पट्टाभिषिक्त इति मदाशयः । पत्तनस्य स्वर्णप्राकारं निर्माय सेवतेस्म – भवान् स्वर्णप्रभाभ्यां बाहुभ्यां मम कण्ठं पर्यरब्धेति । रूपानुभूत्या सह तं कलापूर्णं सेवमान स्तस्य मणेस्सन्दर्शनमहत्त्वान्मदाशयो मधुरलालसानाम्नीं तनयां प्रपेदे – ममारुणाधरं दृष्ट्वा भवतश्चुम्बनेच्छा जातेति । मणे र्महिमानं प्रशंसन्तः प्रथमागमादयश्चत्वारो मदाशयस्य पुरोधसः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलापूर्णमुपेत्य तन्मणिं संस्पृश्य महानन्दमाप्नुवन् – चुम्बनेच्छानन्तरं भवतश्चत्वारि वदनानि मदीयाधरपानेनानन्दमाप्नुवन्निति। प्रथमागमादयः ऋग्यजुस्सामाथर्ववेदाः। ते वेदा भवतश्चतुर्भ्यो मुखेभ्य एव जाताः। तेषां भवदधीनतया ते मदाशयस्य पुरोहिताइत्युक्तम्। तेष्वेकेन मणौतस्मिन्नतिमात्रं स्पृष्टे कलापूर्णः क्रुद्धस्सर्वानपि तान् निष्कास्य तत्स्वामिना च मदाशयेन निर्मितं कनकप्राकारं विघटयामास – भवतो मुखचेष्टाभिर्मम जातायामधरपीडायां तानि (मुखानि) निवार्य त्वदालिङ्गनं मया विघटितमिति मदाशयः। कलापूर्णस्य कृत्येन अविषीदन् 'अहं तदीयः तदीयेष्वङ्गेषु कुत्रचिज्जीवामीति कलापूर्णसेवां क्रमुककण्ठोत्तरपुरं च त्यक्त्वा मार्गे पूर्णकुम्भौ दृष्ट्वा मध्यदेशं गत्वा तत्र सुखं चिरमुवास – ततो भवतश्चित्तं दृष्ट्वा सह मम मुखं त्यक्त्वा मम वक्षोजौ पश्यदवलम्ब्य गतमिति। यात्राक्षोभान्मधुरलालसा कार्श्यं प्राप्ता – मम मुखत्यागात्प्रभृति चुंबनेच्छाशान्तेति। रूपानुभूत्या भार्यया सह मदाशयः पुनः क्रमुककंठोत्तरपुरं सकुटुम्बमागत्य कलापूर्णं सन्ददर्श। तेन मधुरलालसा प्रसन्ना बभूव – भवतश्चित्तं दृष्ट्वा सह मम मुखमागतं पुनरपि चुम्बनेच्छा प्रवृद्धेति। मधुरलालसा यौवनफलं कलापूर्णेनालब्ध - चुम्बनेच्छा मम मुखेन सफलीकृतेति॥

एवं रूपकातिशयोक्त्या कामुकेन भवता कथिता कथा॥

इत्युक्त्वाऽप्राक्षीत्तं "भवता सञ्चिन्तितार्थेन
भवितव्यमने" नेत्युत्प्रेक्षैः किमयं न वा वदतु॥

इति पृष्ट"स्यैवं हि त्वया मदर्थोऽञ्जसा विवृतः"
इति वक्तुः पत्युस्तत्सूनृतभाषणमभिष्टुत्य॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिहासगोष्ठिषु च नहि कदाऽपि मिथ्यावचो भवद्वदनात्
निर्याति किल, विजयतां हरिनाभिसरोरुहं प्रसूतं त्वाम्" ॥

इत्येकांते वाण्यै धात्रा कथितां कथां हृद्याम्
उक्त्वा पुनराह शिशुः श्रोतृषु चित्रीयमाणेषु ॥

"केलीपराभ्यामजभारतीभ्यां विस्मृत्य वा मामथवा तिरश्चीम्
विचिंत्यवोक्तानि वचांस्युपांशु श्रुतानि सर्वाणि मया तदात्वे ॥

शार्दूलविक्रीडितम्

तद्गोष्ठीसमये बहिर्विजितुमुत्त्रस्यन्त्यहं पञ्जरात्
तत्राऽस्थामचल, ततोऽतइत उत्प्लुत्यालपश्चालपश:
निर्याता मम पंजरा "त्वविदितावत्रास्ति कीरी"ति सा
ब्रूते, साह हसन् विरिंचिरपि "तदिस्थत्या भवेत्कि"म्विति ॥

कालेन याता कमलासनस्य सेवार्थमिंद्रेण समागतेन
साकं समायाय मरुद्वधूटी रम्भा दिदृक्षुश्शनकैश्चरंती ॥

यथा पुरं पंजरसंस्थितां मामावर्हयन्तीं मणितं श्रुतं यत्
देव्या गिरां प्राक्समुपेत्य मन्दं श्रुत्वा प्रशंसन्त्यतिमात्रमेतत् ॥

"अंवाभिराविष्कृत मेतदार्य पादोपचर्यावसरे पुरा किम् ?"
इत्यब्रवी, दज्ञतया रहस्यरक्षामकुर्वत्यपभाग्यहेतोः ॥

इत्यचिहेतु विरुतेः, प्रवृत्तां कथामजोक्तामपि चानुपूर्व्या
मुहुर्मुहुः पृष्टवतीं "ततः किं ? ततः कि ? मित्यस्म्यवदं वधू ताम् ॥

वर्धितोऽपि सरस्वत्या शिक्षितोऽपि कला बहूः
रसैः पुष्टोऽपि कीरः स्याद्बिम्बाशी मन्दधीः किल ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्युक्त्वा "मुं शब्दं त्वं कुर्वि" त्युक्तया मयाऽमुक्या
क्रियमाणे द्विस्त्रिर्गी र्देव्यायाता यदृच्छातः ॥

मन्दाक्रांता

सभ्रूभङ्गं सरभसमुपागत्य झंझामरुद्वा
पश्यन्ती मां "किमु रटसि ? किं वा रटस्यत्र हञ्जे !
धि ! ग्वाचाटा भवसि, विदिता नाद्ययाव, लभेथा
रण्डाजन्म त्वमवनितले गर्हन" चेत्यशाप्सीत् ॥

असोढ्वा कोपसंरम्भं देव्या, रम्भा प्रकम्पना
तस्या निलीय तत्राऽस्थाद्गलस्तम्भनिगूहिता ॥

स्रग्धरा

श्रुत्वा ताः क्रुद्धवाचस्सरसिरुहभवश्शीघ्रमागत्य तत्र
"प्रागदृष्टस्ते न कोपः, कथमसि कुपिता त्वं त्वियत्सुन्द"रीति
अप्राक्षीद्भारतीं, सा स्मितरुषितमुखी प्राह "वीक्षस्व ! कीरी
प्रागुद्याने प्रसक्तां प्रकटयति कथां नौ सुपर्वाङ्गनायै ॥

आगच्छन्त्यात्र मया स्तम्भान्तरया श्रुते"ति, विधिराह
"मूढाः किल तिर्यञ्चः किं वेत्तीयं ? कुतोऽशाप्सीः ? "॥

इति तामुक्त्वा शप्तां रुदतीमालोक्य मां कृपापाङ्गैः
भगवान् प्राहाब्जासन "ईष्टे शापस्य को देव्याः ? ॥

भुक्त्वा शापफलं त्वं जन्मन्यपरे मदाशयाख्यस्य
राज्ञस्तनया भूत्वा संप्राप्ता मधुरलालसा नाम ॥

कलापूर्णाख्यभूपस्य राज्ञी सर्वाश्च सम्पदः
लप्स्यसे साधुवृत्तञ्च शुकि ! माशुच्यता" मिति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाणी तदाख्यत "मदाशयो, मधुरलालसा, कलापूर्णः
इति वदति मुहुश्च भवान् किम्बुत्स्वप्नमुच्यते भवता ?" ॥

इत्यभिधाय हसन्तीं तन्वीं धाताऽवद "ममोत्स्वप्नाः
तव मुखवर्णनविषयाः प्रभवन्ति सदा, तदस्तु, नैव मृषा ॥

भवति कथेयं कथिता सत्या भवति प्रिये! सत्या
उर्व्या भविष्यति कलापूर्णो दारा इयं भवेयुश्च" ॥

इति पत्युक्तिं श्रुत्वा "शृणवानीमां कथां, कृपया
श्रावयतु भवा" नित्यमुपाभ्यर्थित आह पद्मभूरेवम् ॥

"इयं कथा सैव कथा न नव्या; तान्येव पात्राणि, विशेष एषः
भूतक्रियास्तत्र गता भवन्ति भाविक्रिया अत्र निबोध कांते! ॥

श्रोतॄणां कौतुकायास्यामुपाख्यानानि कानिचित्
तत्र तत्र प्रविष्टानि मुख्यवस्तूक्तमेव तत् ॥

शार्दूलविक्रीडितम्

साश्चर्यं पतिमाह "तर्हि सुमुखाप्तिः पिता स्यात्कथम्?
राज्ञस्तस्य! कथं भवेदपि मणिस्तम्भः प्रसूतिस्त्वसौ;
आह स्मांबुरुहोद्भव "स्मति! कृतं ते शङ्कया! तद्भवे
त्वद्वाचेति, गताद्भुतं न विदिता तस्यार्थमूचे पुनः ॥

"सृष्टिकर्ता भवान् सर्वं स्रक्ष्यति स्वेच्छया जगत्
अनृतोद्यानि वाच्यानि मारोपयितु मां प्रिय ! ॥

मत्प्रसङ्गात्समुत्थेयं त्वया विसर्यतां कथा
माचिन्त्यताञ्च स्वप्नेऽपि नखोल्लेखान्नदी वहेत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकान्तदेशे कथिता कथाल बहिर्गता, प्राह भवान् कथेयम्
लोके प्रसर्पेदिति; मूलमस्या जिज्ञासवश्च ब्रुवते पुरेत्थम् ॥

शिखरिणी

"इमां धाताऽब्रादीत्प्रथम" मिति "किं मूल ! मिति त
त्सरस्वत्या आस्यं प्रति विधिकृतं वर्णन"-मिति
प्रसक्तया ईदृश्या इदमभव" दित्यादिकथना
द्भवेयं लोकानामपहसितवाग्भाजनमहम् ॥

उदास्यतेचेद्भवताऽनुदित्वाऽनुद्घाट्यचान्यान् प्रियनाथ! गाथाम्
इमां, न कर्णं प्रविशेत्परस्य रहस्यरक्षा परिपालिता स्यात् ॥

शार्दूलविक्रीडितम्

श्रुत्वा तद्विहसन् विरिञ्चिरगद "जिह्वापवाचा इमाः
न स्वान्तस्य; तवाप्रियं भवति किं शृङ्गारलीलायशः
स्वात्मीयं ! भवदीयवाङ्मनसमस्त्येकात्मकं जिह्वया
नासां ते स्पृश ! विश्वसेय"मिति तां प्राहासयद्भारतीम् ॥

निगृह्णती स्वं हसितं प्रयत्नेनावेक्ष्य वाणी "भवतो वचोभिः
उदेति कोपो; हसितैः कृतं, मां विमानितां माकुरु!मे"ति हस्तात ॥

स्तनगुच्छप्रतिमल्लं हलकदलकन्दुकं तस्मिन्
क्षिपतिस्म स्वप्रेयसि कोपस्नेहौ यथाव्यक्तौ ॥

मन्दाक्रांता

भूयो भूयस्सरसिजभवो मत्सरेणाह वाचम्
तामे "वालं विरमतु भवा" नित्ययाचत्करेण

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कण्ठाश्लिष्टा चिबुकमुपगृह्यान्यहस्तेन गण्डम्
गण्डे स्वीये स्पृशति, कषति स्वस्तने तस्य वक्षः ॥

ततोऽभ्यधात्तां द्रुहिणो "वचस्ते यथातथावास्तु, कथा त्वदीया
प्रकाशतां यातुमपेक्षसे त्वं पुनःपुनर्मां कुत आत्थ मेति ॥

अवश्यमेषा कथिता कथैति प्रकाशनं; चेत्तदसम्मतं ते
कथं प्रकाशेत ? भवन्मयी वाग्वस्तुप्रकाशः खलु वागधीनः ॥

कलापूर्णकथा नाम शृङ्गाररस्य कथा तव
जाता मम मुखात्कान्ते ! कथं स्यादप्रिया तव ? ॥

स्वाभाविकं तव वचः प्रियानुरागप्रकाशनेच्छुरपि
तदपह्नुते वधूटी प्राहुः स्त्रीणां प्रकृतिरियमिति बुधाः ॥

पृथ्वी

निशम्य पतिमाह सा शशिमुखी "भवानीदृशो
निविष्टहृदयोऽस्ति चेत्किमु करोम्यहं सम्भवेत्
स भोक्ष्यति धरां नृपो, ऽमुककथा प्रकाशा भवे
दतं; सह तयावयोः किल कथा प्रकाशिष्यते ॥

इत्याकर्ण्याहाजः "प्रकाशतां याति नौ कथा प्रथमम्
तदनन्तरं कथा सा" त्विति, सा प्रोवाच "तर्हि वीक्षेऽहम् ॥

कथं प्रकाशतां "याति ? भवता माप्रकाश्यताम्
इति तेन प्रतिश्राव्य मां वी"क्ष्याख्य "दियं शुकी" ॥

वाराङ्गनाजन्म लभेत यस्मिन् नेयं कथास्याः स्मृतिगोचरा स्यात्
कुत्रास्ति रम्भा? करवाणि दण्डं प्रकाशयेच्चेदिति वीक्षतेस ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रवेपमानां समुपागतां ताम्
स्तम्भान्तरात्स्वांघ्रियुगावनम्राम्
रम्भामवादी " न कथा श्रुतात्र
त्वया प्रकाश्या· विदितासि मां त्वम् ।" ॥

इति कथयन्तीं वाणीं सरसीजासन उवाच हसन्
"शृणु ! तावद्वक्तारश्श्रोतारश्चोक्तमत्कथाया ये ॥

जाता क्षितौ प्राप्य च पुत्रपौत्रप्रपौत्रसन्तानमखण्डलक्ष्मीम्
सुदीर्घमायुश्शुभसञ्चयं ते जीवेयु " रित्यस्तु शुभा ममाशीः" ॥

शार्दूलविक्रीडितम्

श्रुत्वा तद्वचनं गिरां युवतिराहात्मान " माशीरियम्
न स्याद्देवगणस्य शापवचनं स्या, त्कामयन्ते न ये
भूलोके जननाय, तैरकथिता गाथा कथं व्याप्नुया
दुर्व्यां; साधु ! रहस्यकृत्यमिदमन्याज्ञेयमेवं भवेत्" ॥

इति वीक्ष्य पतिमवोचत् " फलतु भवच्छाप" इत्युपहसन्ती,
गत्वा द्वारावत्यां गणिकावंशेऽजनिष्यहं पश्चात् ॥

इति तज्जन्मोदन्तं न विहायांशमपि चावेद्य
पुनराह "तदाहं कलभाषिण्याख्या; ततो विरिंच्युक्तेः ॥

जन्मेदं संप्राप्तं, प्राग्जन्मनि शक्तिदेवकुल ऐक्षे
सरमिममिति कथित, मतो "व्यन्तरात्परमैक्ष्यते" त्युक्तम् ॥

अलघुव्रतस्तदा तां साश्चर्यं सप्रमोदमुपगम्य
बालां प्रणम्य मूर्ध्ना प्राञ्जलिराहस विनयेन ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"कलभाषिण्याह्वयया त्वया पुराजनुषि भाषितं वचनम्
स्मारितमधुना ऋत,," मित्यप्राक्षी "किं त"दिति नृपतिः ॥

सोऽख्य "तत्कलापूर्णकथाश्रुतेः स्युः पुत्राश्च पौत्रा बहुसंपदश्च
इत्याचचक्षे कलभाषिणी प्राक्छत्तयालयेऽस्मत्प्रभृतीन् यमर्थम् ॥

आकर्ण्याहं सम्पदर्थं क्रियमाणाद्विरम्य मे
तपसस्तत्कथाश्रुत्यै जपन्नासे द्विवत्सरात् ॥

साक्षाद्भूयावदद्देवी फलेदन्यत्र ते स्पृहा "
इति यावदहं तावदत्र वाताहतोऽपतम् " ॥

मन्दाक्रान्ता

इत्युक्त्वा तां पुनरपि नमन् बालिकामाह " ते वाक्
तिः सत्या, त्वं मधुरपदपूर्वा शिशो! लालसैव
यस्ते भर्ता भवति च पुरा श्रीकलापूर्णमम्ब !
प्रेक्षिष्येऽहं स्वनयनफलं तं कदा ब्रूहि " चेति ॥

शिशुरवद" त्क्षितिपुर! मम नहि वक्तुं समुचितमिदं अत्रत्याः
सर्वे विदन्ति, पृष्ट्वा तान् जानीही" ति सोऽपि तदा ॥

राजानमवेक्ष्याव "दनयोक्तं संश्रुतं भवता,
भवतश्च शिशोश्चास्या आवेदय! नामवर्तनादीनि ॥

मन्दाक्रांता

कोऽयं लोकः? पुरमपि च किं? केत्र यूयं शिशुः का?
नाहं जाने किमपि, भृशमुद्भ्रान्तचेता भवामि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रष्टुं युष्मांस्तदिदमवकाशोऽपि लब्धो न मेऽस्याम्
चक्षाणायामस्मिन्नवकथां विस्मृतस्य स्वमत्र ॥

राजा स आचष्ट "यथा न लब्धो ज्ञातुं तवास्मानवकाशलेशः
ज्ञातुञ्च मे त्वां प्रति नैव, चित्रप्रसङ्गमाकर्णयतोऽत्र विप्र ! ॥

अहं कलापूर्ण इमे स्वभावदत्ता मणीचापशरा अमी च
पुरोधसो ये प्रथमागमाद्यास्तौ सत्त्वदात्मा च मदाशयश्च ॥

रूपानुभूतिनामाऽसौ मदाशयवधूटिका
दम्पत्योरनयोः कन्यकेयं मधुरलालसा ॥

वसन्ततिलका

संत्यज्य कुत्रचिदपेत्य मदाशयोऽस्मान्
दारैः पुरा, प्रतिनिवृत्य पुनर्ब्रुवन् माम्
"त्वद्दर्शनेन तनयेयममूत्प्रसन्ने"
त्यानन्द्य दर्शयति काञ्चनदोलिकास्थाम् ॥

अंगा इमे, क्रमुकपदपूर्व ककंठोत्तराख्यपुरमेतत
अत्रानतिदूरस्थे कासारपुरेऽहमस्मि संजातः ॥

पात्राणि नामानि च वर्तनानि
विधेः कथायां कथितानि यानि
पात्राणि नामानि च वर्तनानि
तान्येव; नश्चित्रमिदं विभाति" ॥

संस्मृत्य वाणीं प्रति धातुरुक्तिं "मयोक्तश्रृङ्गारकथानकस्य
पात्राणि वृत्तानि तथैव धात्र्यां भवेयु "रित्यस्मि परास्तशङ्कः" ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आकर्ण्य तदलघुव्रत आऽावनिपाल ! वेधसोक्तायाम्
गाथायां जननी ना जनकः स्त्रीचेति कथमेतत ? ॥

प्रत्यवदद् भूनाथो "मामपि विस्मापयत्येव
तत्पृच्छ ! रहस्यमिदं कथाञ्च यौवनफलस्य शिशुमेव" ॥

इ, त्यलघुव्रत आरुयस्कृतांजलिर्वीक्ष्य बालिका "मम्ब !
नास्ति भवत्याऽविदितं जन्मकथां ब्रूहि ! राज्ञोऽस्य ॥

श्रुतं कलापूर्णकथाश्रुतेर्यत्फलं त्वयोक्तः तदनु श्रुताऽद्य
कथा च ते सत्कृपयाः ह्यरश्यं प्रत्यक्षतस्तं, त्ववशिष्टमेकम् ॥

सविस्तरं तज्जननप्रकारं श्रोतुं मनो मे कुतुकं नितान्तम
कृतार्थयस्वे"ति, शिशुर्निशम्य वक्तुं कथां प्रक्रमतेस्म चित्राम् ॥

॥ इत्यष्टमस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ नवमस्सर्गः

"मृगेन्द्रवाहनादेव्या आलये त्वमवैक्षथाः
मणिस्तम्भाह्वयं सिद्धं सुमुखासत्तिनामिकाम् ॥

पुरन्ध्री" मिति तत्पूर्ववृत्तमावेद्य तं शिशुः
उवाच योगनिष्ठौ यौ तत्रैव जितकाशिनौ ॥

कञ्चित्कालमवर्तेतां तवैतद्विदितं; ततः
मिथुनं तद्वने क्वापि निरविक्षत्स्मरोत्सवम् ॥

सिद्धोऽवदत्तां पुरुषायितेच्छु "स्त्वं पौरुषं स्त्रैणमहं भजावः"
इत्युक्तिमङ्गीकृतवत्युवाच "स्त्रैणं भवान् पुंस्त्वमहं भजावः" ॥

इति यावत्साह तावत्तयोः स्त्रीपुंसता किल
विपरीतत्वमापन्ना अद्भुतेषु महाद्भुतम् ॥

कृशोदरं; पीनकुचद्वयं, चार्वास्यं नितम्बे गुरुणीच, नेत्रे
चलाचले; नीलकचा मनोज्ञमङ्गञ्च सिद्धस्य तदोपलब्धम् ॥

अञ्जसा भर्तृरूपं सा सुमुखासत्तिरश्नुत
श्मश्रूणा मंकुरा वक्त्रे जटाजूटश्शिरस्तटे ॥

परिवर्तयितुं शक्यं बाह्यः स्त्रीपुंसयोर्वेषः
नहि दृष्टश्रुतपूर्वा त्वेषा स्त्रीपुंसभावपरिवृत्तिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिवर्तितसर्वाङ्गौ परस्परं वीक्ष्य दम्पती नितराम्
"कीदृङ्मायेऽयमिति" स्वान्ते विस्मयमवाप्तौ तौ ॥

स्मृत्वा सुमुखासक्तिः परिवृत्तिनिमित्तमाह भर्तारम्
"अधुना मयोक्तवचनप्रभाव एवेति; पुनराह ॥

"शक्त्यालये जीर्णपुराणगात्रम्
मया त्यजन्त्या "कुरु देवि ! वाचम्
सत्यां मदीया" मिति याचिता प्रा
ग्वाचः फलं नौ परिवृत्तिरेषा ॥

तत्रस्थे शासनस्तम्भे लिपिरेवंविधास्ति, सा
न वृथा स्या; दिदं जानीह्यस्मद्व्यत्ययकारणम् ॥

स आह "स्तु, भविष्ये त्वं "माऽविमृश्य वचःकुरु !
उक्ते कस्मिन् भवत्या किं विपरीतं भवेन्नु नौ ? ॥

शार्दूलविक्रीडितम्

गर्भो नैव भवेद्यथा तव सति ! त्वत्सङ्गमात्पुत्रको
सञ्जायेत यथा ममार्चितपदा नौ सुप्रसन्ना गिराम्
देवी पूर्वमदाद्वरद्वय, मिदं सिद्ध्येत्कथं प्राकृतम्
स्त्रैणं पौरुषमथावयोरनुगतंचे ? द्युक्त एष क्रमः ॥

मंजुभाषिणी

वनिताजनस्य पुरुषान्महत्तरम्
स्मरकेलिसौख्यमिति कथ्यते किल
अवगन्तुमस्य वचनस्य सत्यताम्
तरुणीशरीरभृदहं प्रवर्तितुम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कश्चित्कालमपेक्षे, त्वं चाप्येवं पुरुषाकृतिः
वर्तस्वेत्युदिता साह "नहि मेऽस्ति स्वतन्त्रता ॥

त्वद्वाक्यं वेदवाक्यं मे नचोल्लङ्घे कदाचन"
इत्युक्त्वा सुमुखासक्तिरवर्तत पुमाकृतिः ॥

स्वाकृत्योरुचिते नाम्नी पर्यवर्तयतां च तौ
स्मरक्रीडा अश्नुवातामिष्टः कृत्रिमदम्पती ॥

पुष्पिताग्रा

अथकृतकवधूटिका स्वकीयप्रियसहिता हृदये दिदृक्षया
नववनसरिदादिदेशभागान् निजहरिवाहनमात्मनाऽजुहाव ॥

गच्छन्ती हरिमारूढा संहृष्टा नभसः पथि
पुरं किमपि दृष्ट्वाऽग्रे समाचष्ट स्ववल्लभम् ॥

"पुण्यस्त्रीनूपुरीभूतप्राकारेणोपशोभितम्
गोपुरैस्सुन्दरैर्युक्तं कासाराख्यमिदं पुरम् ॥

हरिणी

महितपरिखां प्रेक्षस्वैषा मरालबकादिवा
द्विजकलकलैः "पंकेजातश्रियाऽत्र मदीयया
नहि नहि सरोजातश्रीर्मानसस्य सदृग्भवे"
दिति विहसतीवाक्ष्णोः पर्वप्रदा नितरां प्रिय ! ॥

मध्येपरिखं पश्यतु भवान् महोत्तुङ्गसङ्घातः
पद्ममिव भाति सालः कासारपुरं सरोवदवभाति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरमेतत्समायातः पुराहं, प्रीयते मनः
पुनर्द्रष्टुञ्च दक्पर्व करं, वस्तुं हृदीश्वर !" ॥

इत्युक्त्वा तद्वाहनमवतार्य शनैः प्रियतमेन
अवतीर्य तेन साकं सल्लापं कुर्वती नगरमविशत् ॥

वसंततिलका

कासारपत्तनपतिः किल सत्त्वदात्मा
तां सुन्दरीं पथि विलोक्य मनोजबाणैः
विद्धश्शितै विंत्रशहृत्कपटोपचारै
स्संसेव्य तत्कृतनिरास उदास्त तस्तः ॥

तयोः कृत्रिमदम्पत्यो र्वसतोस्सन्दिदृक्षया
तत्रत्यानि विचित्राणि जाता गर्भवती सती ॥

मुहूर्ते शोभने पञ्चसूच्चस्थानेषु शोभिषु
ग्रहेषु सा शोभनाङ्गी प्रासूतैनं नृपालकम् ॥

शिखरिणी

प्रसन्नास्सर्वाशा, मृदुलपवनोऽवात्सुरभिलः
सुमानां वर्षोऽभू, त्सुरजयरवो व्योम्न्युदचरत्
प्रणेदुर्देवानामनुपनिहता दुन्दुभिगणाः
प्रजाते राज्यस्मिन् सकलहृदयानन्दनकरे ॥

अविभाव्य वर्तमाने स्त्रीपुंसाख्ये तयोः कृतिके
सहजस्त्रीपुंसाख्ये स्मृत्वा स्रष्टा"स्य बालस्य ॥

पिता स्यात्सुमुखासक्ति मणिस्तम्भः प्रसू"रिति
प्राह, तस्य कथं वाक्यमन्यथात्वं प्रपद्यते ? ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वस्वस्त्रीपुंसभावौ तौ पुत्रोत्पत्तेरनन्तरम्
सुमुखासत्तिसत्योक्त्या प्राप्य तत्रोषतुः पुरे ॥

मन्दाक्रांता

यावज्जातश्शिशुरयमगाद्यौवनं त वदव,
*यावत्तरयं समाधिनवास्तावदेव स्वभावः
कश्चित्सिद्धोऽदित मणिधनुर्बाणतालं, न कोऽपि
पौर्वापर्यं प्रभवति जनो ज्ञातुमासां क्रियाणाम् ॥

मणिस्तम्भः कलापूर्ण नाम चक्रे शिशोः प्रसूः
कलापूर्णेन्दुतुल्यत्वान्मुखं तस्य मनोहरम् ॥

शार्दूलविक्रीडितम्

सद्यो यौवनचारुबाणमणिसलाभे शिशोस्तस्य त
त्कासाराख्यपुरस्य यः प्रभुरभावात्स्वयं दिव्यं शिशुम्
मत्वा तं हृदि सत्त्वशास्त्रपदभाक् स्वांशोऽनुतप्तो दृढा
भक्तिस्तं प्रणिपत्य सेवितुमना अस्मै स्वराज्यं ददौ" ॥

इत्याकर्ण्याप्राक्षीदलघुव्रत एव " मम्ब ! सिद्धः सः
को भवति ? कुतोऽदान्मणिशरचापान् बालकायास्मै ?" ॥

शार्दूलविक्रीडितम्

साऽब्रूतेस्म यथा "शृणोतु ! सुमुखासत्तेः स्वभावाह्वयः
सिद्धोऽभूज्जनको, विहाय सदनं कन्योद्भवानन्तरम्
यो देशान्तरमव्रजत्प्रविचरन् भूमिं महायोगिनम्
दत्तात्रेयमुपास्य तस्य कृपया योगे गतः कौशलम् ॥

---

* "प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु" इति वैजयन्ती ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्ववशीकृत्य योगेन भावं चक्रे मुनिश्चलम्
सततं येन सिद्धोऽसौ स्वभाव इति कथ्यते ॥

समाधिनिष्ठाश्रयणेच्छया संद्रष्टुं प्रशान्तं विजनस्थलं सः
पर्यट्य देशान् निजजन्मदेशे ह्रदे न्यवात्सीच्छततालदघ्ने ॥

मन्दाक्रान्ता

योगेनान्तर्ह्रद उषितमात्माङ्गनायै प्रकुप्यन्
जामातैनं ह्रदनिपतितः प्रैक्षतोपेत्य; दृष्ट्वा
ज्ञात्वा तस्मा अदित स वयस्तम्भमण्या दर्कं त
त्सम्बन्धित्वं नहितु कथयामास लेप्तुं न कांक्षन् ॥

सुचिरं ह्रदान्तरुषितो नियतिवशात्त्यक्तयोगनिष्ठस्सः
बहिरागत्य ह्रदतः श्रीशैलं प्राप पुण्यजनसेव्यम् ॥

वसंततिलका

श्रीमल्लिकार्जुनसमाख्यकलिङ्गमूर्तिम्
संसेव्य भक्तिभरितेन ह्रदा स सिद्धः
सानूनि तस्य विचरन् मणिकन्धरं द्र
ष्ट्वाद्रेर्भृगोः पिपतिषुं परिपृच्छतिस्म ॥

शार्दूलविक्रीडितम्

"कस्त्वं भद्र! कुतोऽतिसाहसमिदं वर्तुं त्वयारभ्यते?
आस्तां बोधय मां निमित्त"मिति स स्वीयाभिधानं कुलम्
पातस्याद्रिभृगोश्च कारणमथाग्रावध्युदन्तं गतम्
सिद्धं प्राह निशम्य सोऽपि दुहितुर्जामातु रप्याह्वयौ ॥

विशिष्य विज्ञाय कथां तदीयां सम्बन्धितां स्वस्य तयोरुदित्वा
वरौ विरुद्धावमुयोः फलेतां कथंन्विति प्राप्य शुचं न्यगादीत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

गन्धर्वोऽभिजनेन नारदमुनेः शुश्रूषया शिक्षया
श्रीकृष्णस्य भवानभूच्च नितरां सङ्गीतविद्याचणः
पुण्यक्षेत्रजलाभिषेकगतदुष्पङ्कोऽस्त्यमूदृग्भवान्
जन्म प्राप्स्यति सत्कुले, नहि कृतं पुण्यं वृथा स्यान्नृणाम् ॥

लब्धुं महोत्तमं जन्म प्रभवः पूर्वहेतवः
भृगुपातेन किंतस्माद्भवानिच्छति ? भाषताम्" ॥

तदाकर्ण्याह "जन्माप्तुं शुचीनां श्रीमतां गृहे
ममारम्भोऽय" मित्यख्यत्पुनस्स मणिकन्धरम् ॥

"अपेक्षतां तर्हि मदीयपुत्रीजामातरौ त्वत्पितरौ भवेताम्
इ, त्युत्तमौ यौ विदितौ तवापि भवेत्प्रियं मे तव कृत्यमेतत् ॥

वसन्ततिलका

संप्रार्थितो गुरुरदान्निशितासिमेकम्
मह्यं वद "न्न हतिरस्य वृथा कदाचित्
क्षात्रं कुलं तव भविष्यति" चेति चाह
तावर्हतस्तव मनोरथसिद्धिहेतोः ॥

परिगृह्य क्षात्रधर्मं भवान् शास्तु वसुन्धराम्
समाचरतु मे वाक्यं माशङ्किष्ट स्वचेतसि" ॥

ततस्स आहस्म "निमित्तमस्ति जन्मान्तरेऽहं भवितुं नृपालः
तथापि तस्मादपि पूतवंशे जन्माप्तुमिच्छामि भृगोः पतित्वा ॥

जातस्य मे राजकुलेऽपि पूते जयस्तु बाह्यान्तरशत्रुकोटेः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुदुर्लभो, राज्यपिशाचकी* स्यादन्धश्च मूको बधिरश्च चित्रम् ॥

शार्दूलविक्रीडितम्

निष्णातान्नितरां श्रुतिस्मृतिमहाविद्यासु संसेव्य त
द्गोष्ठ्या तादृशदोषसञ्चयमपाकर्तुं सुसाध्यं त्विति
प्रोच्येतैतदसाध्यमेव, सुलभा न ब्राह्मणास्साधवो
येऽतृष्णाः स्पृहयन्ति नैवच तृणायापि प्रभोः सम्पदः ॥

कृच्छ्रेण लब्धा अपि तादृशास्सद्विप्रास्तु कृच्छ्रस्तदनुग्रहः, सः
लब्धोऽपि कृच्छ्रश्च विवेकलाभ एकैक एषामतिदुर्लभः स्यात् ॥

भवान् क्रियाणां घटनासमर्थः शोकापनोदाय कमप्युपायम्
मह्यं ततोऽर्हत्युपदेष्टु" मित्याचक्षाणमानम्रमुवाच सिद्धः ॥

"यथा ह्यजय्योऽरिगणैस्सदा त्वं दिव्यं धनुर्दिव्यशरांश्च सृष्ट्वा
दास्यामि तुभ्यं, कृपया न दत्तालेयस्य देवस्य ममास्त्यसाध्यम् ॥

मन्दाक्रांता

माणिक्यं ते किमपि महिमोपेतमप्यर्प्यते, य
त्प्राकर्ष्यत्यागमनिगमविद्यानवद्यान् समीपम्
यस्यालोकाद्भवति सकलस्यायुरारोग्यभाग्य"
मित्युक्त्वा तं धनुरिषुमणीनेकनाड्यैव सृष्ट्वा ॥

"जनिष्यसे यावदहं भवन्तमुपेत्य दास्यामि निरीक्षमाणः
यथा विजानात्यनयोर्न कश्चित्कृत्येऽस्तु पूर्वोत्तरभावमुख्याम्" ॥

---

* पिशाचकी = पिशाचाविष्टः, अत्र "वातातिसारकाभ्यां कुक्च" (5-2-129) इति सूत्रस्थ "पिशाचाच्च" इति वार्तिकेन कुक्, इनि, प्रत्ययौ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं वदन्तं विनिशम्य सिद्धं रूपानुभूत्या च पुरोहितैश्च
यात्रागतस्तत्र मदशयाख्यः पृष्ट्वा च तन्नाम पदे प्रणम्य ॥

प्राहस भक्त्या "फलितास्मदीया श्रीशैलदेवस्य शिवस्य सेवा
चिरेण मृग्यामि; दृशोः कृतेन पुण्येन दृष्टोऽस्यधुना महात्मन्! ॥

मदाशयोऽहं नृपतिः कलत्रमेतः; मदीयास्तु पुरोधसोऽमी,
अधीतवेदादिसमस्तविद्याः धर्मे नदीष्णाश्च गुणाभिरामाः ॥

एतैः सहकलत्रोऽहं दत्तात्रेयमुपासिषि
दृष्टस्स्वप्ने जगादासौ " स्वभावाख्योऽस्ति कश्चन ॥

सिद्धो मदीयस्स मदिष्टभक्तः फलेदवश्यं तव कांक्षितार्थः
तेनैव; तद्दर्शनमर्ज"येति सन्दर्शनार्थं तव पर्यटामि ॥

अतर्कितं मयाऽश्रावि दत्तात्रेयपदं मुखात्
भवतस्तज्ज्ञातुकाम आगतोऽस्मि त्वदन्तिकम् ॥

सिद्धप्रायं कांक्षितं मे लब्धे सन्दर्शने तव"
इत्युक्त्वा सकलत्रोऽसौ प्रणामान् शतमाचरत ॥

सिद्धस्स आत्मन्यवगत्य शिष्यवात्सल्यमात्मीयगुरोरवोचत्
"कियानहं तावककांक्षितार्थसिद्धे ? विधिर्हि प्रभविष्णुरेकः ॥

आवेदयात्मीयमनोऽर्थं त्व "मित्युक्त आहस मदाशयस्सः
"अजय्यता सर्वनृपालकोट्या प्रदीयतां भो! मम सन्ततिश्च" ॥

इत्यर्थितस्सिद्ध उवाच "पश्य! धनुश्शरा दिव्यमणिश्च सृष्टाः
जनौ परस्यां मणिकन्धरस्य हेतोर्मया विश्वजयोपलब्ध्यै: ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वंशस्थम्

विनाच तं सर्वनृपान् विजेष्यसे
व्रजेतितूक्तस्स मदाशयोऽवदत्
"कृपास्ति चेत्ते मयि तावती मह !
नलं ततश्शिष्टकृतेऽस्म्यहं प्रभुः" ॥

शार्दूलविक्रीडितम्

श्रुत्वा तस्य मदाशयस्य नृपतेर्दृतं वचः प्राह सि
द्धोऽसौ "तज्जनने भविष्यसि पराभूतोऽमुनाऽसंशयम्
नैतन्मात्रमसौ कलत्रसहितं त्वां स्वीयसंसेवया
योक्ष्यत्येव, शृणु ! व्र"जेति नयनद्वन्द्वेऽरुणद्यातिनि ॥

पुरोधसस्तस्य भयाभिभूताः पणम्य तस्मै जगदु "महात्मन् !
किमेष वेत्ति ? त्रिषु भाषितेषु पतन्ति दोषाः षडमुष्य राज्ञः ॥

दासा वयं ते गुरुपादयो, स्त्वां मृगयन्त आयाम चिरात्समीपम्
तदेव मत्त्वा भगवन् ! प्रसीद ! प्रदेह्यमुष्याभिमतस्य सिद्धम् ॥

वसंततिलका

सिद्धो जगाद "न मदीयवचाऽन्यथा स्या
चद्ब्रह्मणो लिखित; मेष विजेष्यतेऽन्यान्
एनं विहाय नृपतिं, सकलत्रकोऽमुम्
सेविष्यते च सततं विगताभिमानः ॥

सेवासमये सेत्स्यति सन्ततिवांछापि युष्मदधिपस्य
दृष्टे च तस्य राज्ञो मणौ सभार्येण राज्ञा वः ॥

गृह्णाति यावन्मणिकन्धरोऽसौ जन्मान्तरं तावदमुं नृपालम्
यूयं निषेवध्व; मयश्च तावद्विजित्य शासिष्यति राजलोकम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मदाशयनृपं यूयं सेवमाना अवाप्स्यथ
महानन्दं मणेस्तस्य स्पर्शादेवे"ति तान् जनान् ॥

उक्त्वाऽमन्त्र्यच तं मणिकन्धरमात्मेच्छया गतस्सिद्धः
अनुसृत्य तस्य वचनं व्यजेष्ट राज्ञो मदाशयस्सर्वान् ॥

मणिकन्धरस्य वृत्तं संपृष्टा मधुरलालसा शिशुका
अलघुव्रतेन कथयामास यथा "भृगुनिपातसज्जस्सः ॥

मघनसमयार्णवस्ये वोच्चैर्घोषं पलायमानानाम्
अज्ञात्वान्योन्यकथामार्तजनानां बताऽश्रौषीत ॥

शार्दूलविक्रीडितम्

काचित्पीनपयोधरा; शशिमुखी, सुभ्रू, र्विनीलालका
बिंबोष्ठी, स्खलदंघ्रिरञ्ज्ययुगली; बिभ्यन्मना, स्संभ्रमात्
धावन्ती समुपेत्य तं, करगतं खड्ग प्रदायाह "भो
गन्धर्व ! त्वरितं जहीममसुरं सरक्ष चार्ता " निति ॥

शार्दूलविक्रीडितम्

उर्वीजाः प्रहताः पतन्ति च; यथा गण्डोपलादारिताः
शैलाग्राद्विलुठंति; जन्तुनिवहः क्षुण्णश्च सिंहादिकः
वर्षत्युग्रनिशाचरश्शलगणं किं राजतैर्वायसै
र्बन्धैर्वायसराजता * खनततिस्त्वेषेति शङ्काकरम् ॥

शार्दूलविक्रीडितम्

पश्यंस्तां मणिकन्धर स्स शललीवृष्टिं महादारुणाम्
साश्चर्यं प्रमदाममूमवद " दळजास्ये ! शलानां कुतः

---

* "खनोघच" इति सूत्रसिद्धं रूपम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्षोऽयं ? भवती महासिमददाद्ध्यः क एतेन मे ?
त्वं का ? कुत्र पलायसे भयमतिर्मा ब्रूहि सर्वं" त्विति ॥

वसंततिलका

साऽब्रूत "नैव वचनस्य ममावकाशो
दुर्दैत्य एष शलसूकर आगतोऽत्र
वर्षन् भृशं शललवृष्टि, मसिं गृहीत्वा
छिंद्ध्यस्य शीर्ष, भव ! मामपरान् वरेति ॥

दीनाननां साध्वसविह्वलाङ्गीं प्राहस कान्तां मणिकन्धरोऽसौ
"प्रहणिम रक्षो वधु! माबिभीहि! आर्तावनार्थं धृतकङ्कणोऽहम्" ॥

इति ब्रुवाणो भुजदण्डजाग्रदुद्दण्डखड्गं भ्रमयन् प्रचण्डम्
सम्पातिनीं दुश्शललीप्रवृष्टिं विच्छिद्य कुर्वन् शकलान्यवोचत् ॥

शार्दूलविक्रीडितम्

" रे! रे! दुष्टनिशाट! सूकर ! क्रियांस्त्वं! विद्धि" धर्मो हतो
हन्ति; त्वादृश आहताः कति पुरा लोकस्य विद्रोहिणः !
का वृत्तस्य क ? श्चेन्द्रजित्किमभवत् ? का वा गती रक्षसः
पौलस्त्यस्य ? च शम्बरप्रमुखदुर्मायाविनां का दशा ? " ॥

शार्दूलविक्रीडितम्

इत्याकर्ण्य हसन् स्वमाह दनुजः कोऽयं ? किमुन्मत्तकः ?
दर्पान्धः ? किमचेतनः ? किमु मतिभ्रान्तो ? मुमूर्षुः किमु ?
क्वासौ ? क्वाहमधःकृतोद्धतदिश स्तम्बेरमो मायिकः
किं मां हन्ति ? पुरा मया कति नरा एतादृशस्तूलिताः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रुतविलंबितम्

इति, "न जीवितुमिच्छसि चेज्जड !
सपदि मामभियाहि ! वद: कुत: ?
तव मदं दमयामि किमस्ति वा
मृगभयात्प्रपलायितकेसरी ?" ॥

शार्दूलविक्रीडितम्

इत्युक्त्वा प्रविधूय पीवर मुरूग्राङ्ग शलानां महा
वृष्टिं सञ्जनयन् निमग्नमकरोत्तस्याममुं सूकर:
तां निघ्नन् मणिकन्धरस्तमुपगत्योग्रासिना व्यच्छिदत्
कंठं, सोऽपि तदन्तरे प्रपतितैस्तीक्ष्णैश्शरैर्मारित:" ॥

अलघुव्रतो निशम्य तदुवाच "दैत्य: स को ? वधूटी सा का ? या तं शल्यासुरमजीघतच्छ्रोतुमिच्छामि" ॥

सा शिशुरवद "च्छणि"ति "महिषासुरमातुलस्य पुत्रोऽसौ कालीनिहतं महिषं श्रुत्वा कालीं जिघांसति स: ॥

शललानि शल्यरूपाण्यमुष्य; शल्यासुराह्वयो येन
अपिच खनित्रशलाख्य: खनित्ररूपाणि च शलानि ॥

दुर्गायै क्रुधितो व्यचिन्तयदसौ "पर्यट्य सर्वां भुवम्
* कालीभागवतान् विशोध्य सकलान् हन्यां भवानीगृहान्
उन्मूल्य, प्रविदार्य मूर्तिविततिं नामावशिष्टांश्च तान्
कुर्यां शाम्यति नान्यथा मम मनस्सञ्जातकोपज्वर: ॥

---

* काली भगवती यस्य कालीभागवत: यथा देवीभागवत:, शिव भागवत: इत्यादय: । (सोऽस्य भक्ति: इति सूत्रेण)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथाकर्ते शुनाशीरो मह्य क्रुध्येद्भृशं हृदि
निर्वीर्यस्य क्रोध ओष्ठदंशनायैव कल्पते ॥

भार्गवस्य वरेणाप्तो दुर्दान्तो विक्रमो मम
गणयेच्चंडिकां नैव नैव चास्याः पितामहीम् ॥

रमापती राक्षसवंशधूमकेतुर्मदुज्जृम्भणभङ्गचञ्चुः
किमाचरेन्मामिति शङ्कते हृत् प्रातक्रियामस्य विचिन्तयेयम् ॥

प्रतिक्रियां यावदहं लभेय धृत्वानवद्यां किल शांतिकन्धाम्
चराम्ययं धर्मपरोऽसुरोऽपि संश्लाघ्य आहो" इति कीर्त्यमानः ॥

इति निश्चित्य वने क्वचिदुषितं तमभिनवकौमुदी नाम्नी
शीतांशुकिरणजाता कन्योपययौ मृगीव केसरिणम् ॥

अवेक्ष्य तस्या अतिलोकरूपं विस्मृत्य तत्पूर्वकृतां स्वचिन्ताम्
मनोभवव्याधशराभिविद्धो भूत्वा मृगस्तामवदन्निरीक्ष्य ॥

पृथ्वी

" शुभाङ्गि! भुवनानि मे करगतानि सर्वाण्यपि
त्वदीयहृदयप्रियं किमपि वस्तु दातुं प्रभुः
तवातिरुचिराकृतेस्समुचितां धराम्यङ्गने!
तनूं भुवनमोहिनीं सपदि कामरूपोस्म्यहम् ॥

प्रीणीहि मां दासतया निषेवे
त्वां, तन्वि! मां शाधि ! मयि प्रसीद ! "
इत्यूचिवांसं तमुपेक्ष्य दृग्भ्यां
यान्तीं ततोऽन्यत्र, स वीक्ष्य कान्ताम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विकटभ्रूकुटिरवद " द्धिक्कृत्य वधूटि! मां व्रजन्तीं त्वाम्
कः प्रभवति संस्प्रष्टुं निरीक्षितुं चाक्षिणी समुन्मील्य ! ॥

संत्रासिताप्येवमनेन तन्वी क्रोधाभिविष्टा कथयांबभूव
" वृणोमि ते घातुकमेव नान्यं कृता प्रतिज्ञा, न जहामि गच्छ ॥

शालिनी

इत्येतस्याः क्रूरवाचं निशम्य
क्रोधेनांधोऽप्याचरन्नो विरुद्धम्
अशाविष्टः सङ्गमोऽस्याः कदाचि
त्संलभ्येतेत्यात्मकोपं निगृह्य ॥

ईष्टेऽस्य को वा खलराक्षसस्येत्येषापि चान्विच्छति तत्र तत्र
स स्वं जिघांसु विनिहन्तुकामस्तादृग्वरेच्छुर्यतते च भूयः

मृगेन्द्रवाहना देव्या दैवादालयमागतः
तत्र स्तम्भलिपिं दृष्ट्वा यावदन्तं पपाठ च ॥

स्ववांछितार्थसंसिद्ध्या उपायो युज्यते ह्ययम्
इति मत्वा प्रकारं तं चकाराभिनिविष्टधीः ॥

शिखरिणी

तथा कृत्वा "हन्तुं प्रभवति न मां कोऽपि जगती"
त्ययं क्रूरो दृप्तो विशिथिलयितुं शक्तिसदनम्
समस्तं लोकस्थं हृदि मनुत, " ईष्टेऽस्यतु कः !" इ
त्यटन्त्यत्रायाता युवतिरपि शीतांशुकरजा ॥

स्ववांछितस्य संसिद्ध्या आगताया मृगीदृशः
शल्यासुरो गोचरोऽभूत्पिशाच इव दारुणः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्दृष्टमात्रां तरुणीमुपेत्य प्राहस्म ! "मां वृण्विति याचमानम्
त्वमब्रवी"स्त्वद्वधकं विनान्यं वृणोमि नेति, क्व ममास्ति हन्ता ?॥

विच्छिद्य शीर्षं मम जीवितोऽस्मि
न घातको मेऽस्ति किल त्रिलोक्याम्
वीक्षस्व ! तत्स्तम्भलिपिं, निकृत्त
कण्ठोद्गतं रक्त"मिति प्रदर्श्य ॥

"वृणीहि ! मामब्जमुखी"ति भूय
स्समापतन्तं विनिरीक्ष्य भीता
अम्ब ! त्वदन्यच्चरणं न मेऽस्ती
त्यार्तेन कण्ठेन पलायमाना ॥

प्रविश्य तद्गर्भगृहं पपात देवीपदाम्भोरुहयोर्मृगाक्षी
निरीक्षते द्वार्यसुरश्च तस्याः प्रत्यागमं, या चिरमालयेऽस्थात् ॥

निवेद्य देव्यै तरुणी प्रतिज्ञां स्वीयाञ्च दृप्तानि वचांसि तस्य
शल्यासुरस्याह भवामि देवि ! सम्भ्रान्तचित्ता, शरणं प्रपद्ये ॥

न मे यथास्याज्जननि ! प्रतिज्ञा भङ्गस्तथार्हस्युपदेष्टुमद्य
इति प्रपन्नां प्रमदां विलोक्य देवी प्रसन्ना कथयांबभूव ॥

पृथ्वी

पुरा महिषराक्षसं हतवतीं विदित्वैष माम्
करोति हृदयं ममालयतने समुन्मूलने
तदीयनिधनोचितं विधिमहं विलोके हृदि
प्रकल्पत इदं तवागमनमत्र तत्सिद्धये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हन्यादवश्यं स्वजिघांसुमेष स्तम्भस्थलिप्त्याः भवतीक्षतां ताम्
किंत्वस्ति कश्चित्सदुपायः एष संश्रूयतां, येन हतो भवेत्सः ॥

शार्दूलविक्रीडितम्

यद्यप्यस्त्यसुको जिघांसुमभिहन्त्येवेति, नैवास्त्यसौ
न स्यात्तेन जिघांसुना निहत इत्येतस्य हेतोर्महान्
वीरः कश्चन दारुणासुरमिमं हत्वा हतः स्यात्स्वयम्
तं जन्मान्तरगं वृणोतु भवती सत्या प्रतिज्ञा यथा ॥

अन्वेष्टव्यस्तादृश इति कश्चित्कालमात्मनि विचिन्त्य
संहृष्टा देव्यकथय "दभिनवकौमुदि ! शृणूपायम् ॥

शार्दूलविक्रीडितम्

गन्धर्वो मणिकन्धरो गुणनिधिः कश्चित्पुरा कस्यचि
द्धेतोर्लब्धमसिं वृथा नहि भवेद्यस्योद्यमस्सन्निधौ
न्यास्थन्मे, प्रददामि तुभ्य, मधुनैवैनं गृहीत्वा गता
तस्मै वीरवराय देहि ! स खलं हन्यादिमं राक्षसम् ॥

हृतस्त्वदीयाप्रतिमानरूपविलासजालैरनुगच्छति त्वाम्
मा त्वं बिभीहि! प्रतिकूलमेष चरे, न्नते, कामहतोऽस्ति जाल्मः ॥

चित्रलेखा

दत्तात्रेयः प्रियमतिरददात्प्राबस्वभावाख्यसिद्धा
यामुं खड्गं, स्वदुहितृपतयेऽसौ मणिस्तम्भनाम्ने
प्रायच्छत्; स्सोऽप्यदित कलहभुङ्मौनिशिष्याय यूने
गन्धर्वाय, प्रहरणमिदमुत्कृष्टपारंपरीकम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृथ्वी

विनातु मणिकन्धरं नहि परोऽर्ईतीदं जनो,
न साधयति वांछितं फलमिदं गृहीतं परैः
स शापवशगो भृगोः पिपतिषुर्व्रत ! श्रीगिरे;
र्गताशु विरमय्य तं मृतिमुखात्प्रदद्य इदम् ॥

प्रहर्षिणी

ब्रूहि ! त्वं भृगुपतनस्य यत्फलं त
लभ्यं ते खलदनुजस्य मर्दनेन
लोकस्योद्धरणमनेकशः प्रशस्तम्
संरक्षा किल युवतेर्महत्तरेति ॥

जनिष्यते कलापूर्ण नाम्ना कासारपत्तने
स पुन, स्तं वृणीहि ! त्वं प्रतिज्ञासिद्धिमेष्यसि ॥

इत्युपदिष्टा देव्या सा सुरकन्या मृगेन्द्रवाहनया
प्रणिपत्य सुप्रसन्नामव्याजकृतां मुहुर्मुहुर्भक्त्या ॥

संवेष्ट्य मध्यं परितश्च वक्षः पटेन सा संयतकेशपाशा
असिं गृहीत्वा निरगाद्गुहायाः गर्भालयाद्वा समवीरलक्ष्मीः ॥

वेगादागच्छन्तीं निरीक्ष्य शल्यासुरोऽमरप्रमदाम्
व्यचिचिन्त द्रुनिहन्तुं स्वमुपैतीयं हतोऽस्मीति ॥

संस्थाप्य चित्तं स विलोक्य तन्वी
मुवाच "मां हन्तुमना हतः स्यात्
मया मुहूर्ता, द्वधु ! संशृणुष्व
नैवोद्विजेऽहं सुरराक्षसेभ्यः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किंतूद्विजे मामभिहत्य किंवा
भवेर्मदीयप्रदरेण" चेति
सोवाच "नाहं विदिता किमु त्वाम् ?
वर्ते त्वदिच्छामनुरुध्य पश्य !" ॥

शार्दूलविक्रीडितम्

इत्युक्त्वा तमतीत्य गच्छति वधू, वीचं गृहीत्वाऽन्यथा
रक्षस्तामनुरुध्यतेच, पुरतो यान्ती द्रुतं पृष्ठतः
कृत्वा वत्तयवहीयसे त्वमितिच, स्थित्वाच मध्येऽध्वनः
कञ्चित्कालमवेक्षते तमसुरं; भूयः पुरो धावते ॥

वाक्केल्या मन्दहासैश्च हारिभिर्मन्दधीरसौ
स्वस्मिन् स्निग्धेति मत्वा तामनुयातः कथञ्चन ॥

मन्दाक्रान्ता

बद्धो रज्ज्वा वृष इव स शल्यासुरस्तत्कटाक्षै
राश्रीशैलादनुपदमगादप्सरः कन्यकायाः
कामेनार्तो हृदि विगणयन् दूरमग्रे प्रयान्तीम्
पश्यन् पश्यन् किमपि किमपि व्याहरन् नर्मगर्भम् ॥

ततश्शल्यासुरः प्राह व्यथितस्तां तनोदरीम्
"अनुवर्ते त्वदिच्छा" मित्यवादीः किमिदं कृतम् ? ॥

कुत्र त्वं नयसे मां ? गन्तव्यं कुत्र ? किमपि चानुक्त्वा
यासि, प्रतिभास्यधुना वञ्चयितुं मां व्यवसिते" ति ॥

साह "त्वदिच्छामनुवर्त एव "किंतूद्विजे मामभिहत्य किंवा
भवेर्मदीयप्रदरेणचे"ति आत्थस्म न त्वामभिहन्मि; सत्यम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न मया वाग्भङ्गः कृत" इति, तस्यै स प्रकुप्य "मामेवम्
हन्तुं त्वां शङ्कितमतिमवगणयसि, पश्य मे बलं त्वमिति" ॥

विधूय गात्रं शललप्रवृष्टिं *प्रवर्षयामास ततोऽतिघोराम्,
विद्धा महीजाश्च यथामृगाश्च क्रन्दन्त उच्चैरपतन् प्रमीताः ॥

प्रभावमात्मीयमसौ प्रदर्श्य "अद्याप्यनृत्या कथमेष्यसि त्वम्
देशं च यं यं व्रजसि प्रणश्या त्विर्गतहत्येव स †सात्मशक्त्या ॥

उपप्लवस्यास्य निदानभूता त्वमित्यवद्यानि जना वदेयुः
कलङ्कयस्यन्वयमात्मकीयं, गृह्णीष्व मे पाणि"मिति न्यगादीत् ॥

वंशस्थम्

विलम्बनं नोचितमित्यनुत्तरा
पलायतं श्रीगिरिमप्सरावधूः
स राक्षसस्तामनुजग्मिवान् शल
प्रवृष्टिमस्याः पथि वर्षयन् भृशम् ॥

शार्दूलविक्रीडितम्

श्रीशैलं समुपेत्य तत्र भगवत्सेवागतान् यात्रिकान्
वीक्ष्यावेद्य निशाटवृत्त "मसवो वो रक्षणीया" इति
गत्वा द्राङ्मणिकन्धरं पिपतिषु शैलाग्रसानो रसिम्
दत्वा घातयतिस्म, सोऽपि निहतश्शल्यासुरेणामृत ॥

---

* स्वार्थे णिच् ।

† "सोऽचिलोपेचेत्पादपूरण" इति पाणिनीयसूत्रसिद्धम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

सा तत्रैव पुनर्जनुर्ग्रहकलापूर्णाय बद्धस्पृहा
संजातं समुपेत्य वृत्तमपि संवेद्य प्रतिश्रुत्य च
तस्मै "नैव दिवं व्रजामि, भवतस्सेवार्थिनीहे"ति तम्
गान्धर्वेण ततो विवाहविधिनोपायंस्त हृष्यन्मना: ॥

॥ इति नवमस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ दशमस्सर्गः

स्वभावसिद्धस्य वचोऽनुसृत्य मदाशयोऽरिंदम एकवीरः
उद्धृष्य कासारपुराधिनाथमास्कन्द्य तेनापजितो बभूव ॥

ततः प्रभृत्येष मदाशयोऽमुं निषेवते भूमिपतिं सदारः
विद्धयस्य राज्ञो मणिदर्शनस्य जाता महिम्नाऽस्मि मदाशयस्य ॥

ततो निष्कासितौ राज्ञा क्रुध्यता पितरौ मम
नर्मगोष्ठीकथायां तद्ब्रह्मवाण्योस्त्वया श्रुतम् ॥

त्यक्त्वा क्रमुककण्ठोत्तराख्यं मे पितरौ पुरम्
मध्यदेशं गतौ, किंतु प्रयाणक्षोभतः कृशाम् ॥

कृशीयसीं कृशिष्ठां मामनैष्टामत्र तौ पुनः
मणेस्सन्दर्शनाद्राज्ञो हृष्टपुष्टामवेक्ष्य माम् ॥

वियोगिनी

मुदितौ हृदये सविस्मयौ पितरौ मामुपनीय सन्निधिम्
विनिवेद्य नृपाय मे दशां स्तुतवन्तौ, वसतोऽत्र सांप्रतम् ॥

प्रथमागमादयोऽमी पितुर्मम पुरोधसोऽप्यमुं भूपम्
मणिमहिमवशीभूता अशिश्रियन् पुनरपिच यथापूर्वम् ॥

ततो बद्धांजलिर्नम्रोऽलघुव्रत उवाच ताम्
"प्रथमागममुख्यास्ते ब्रूहि ! केऽम्ब ! पुरोधसः ? ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति पृष्टा स्मितास्याह "नान्ये ते, तव पुत्रकाः
तव भाग्यं पुनस्तैस्त्वामद्य संयोजयिष्यति" ॥

जलोद्धतगतिः

स विस्मय मसावुवाच शिशुकां "कथं मम सुताः? कुतो विहससि?
कथं मम सुताः प्रनष्टयुवतेः? कथं सुमकथा तरौ प्रशुषिते?॥

नहि वार्धकदोषेण न क्षेत्रियरुजा च वा
प्रायेऽम्रियन्त मग्नास्ते महागम्भीरसागरे ॥

स्मारं स्मारं गुणांस्तासां वंशं शीलं शुभाकृतिम्
त्यक्तान्यतरुणीसङ्गः कथं पुत्री भवाम्यहम्? ॥

चित्रेषु चित्र मेतद्यदहं पुत्रीति; बालिकेयमिह
ग्रथ्नाति जानुफलकं शिरसा खल्वाटकस्य संयोज्य ॥

इति श्रुत्वा नृपोऽवोच "द्वाचा भाव्यं त्रिसत्यया
बालिकाया अमुष्या "इत्यपाक्षीत्तस्य तां कथाम् ॥

शार्दूलविक्रीडितम्

सा ब्रूतेस्म "पुराऽस्ति पाण्ड्यविषये श्रीसोमशर्माभिध
स्तत्त्वज्ञोऽपि तपोधनोऽपिच जगत्क्षेमाभिलाषी चरन्
गार्हस्थ्यं, सततान्नदानविधिना विप्रान् य आराधयत्;
तत्पुत्रः श्रुतिशास्त्रगन्धविकलो यो यज्ञशर्माह्वयः ॥

शतैः प्रयत्नैरपि यज्ञशर्मा नलब्धविद्यो हृदि दुःखितोऽस्ति
फलं न सूते किल केवलन्तु क्षेत्रं विना बीजममोघसारम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुःखं विसारयितुं स चतस्रः कन्यकास्सुतस्य पिता
कुलशीलशुभाकाराः करं परिग्राहयामास ॥

अन्यूनमनतिरिक्तं यथा पिता चतसृणां स्नुषाणां च
वस्त्राण्याभरणानि प्रायच्छत्तस्य हृत्प्रीत्यै ॥

चरमे समये जनको ब्रूतेस्म सुतं यथा स्नुषाः शृणुयुः
"मात्वं त्यजान्नदान व्रत, मभिनिविशस्व ! ते शुभं भूयात्" ॥

चतुरागमसन्तानं प्राप्स्यसि, न वचोऽन्यथा मे स्यात्"
इति तनयश्शिरसाऽधृत पितुरुपदेशं यथा श्रुतेरेव ॥

स यज्ञशर्मा पितृवाचि भक्त्याऽकृतान्नदानं धरणीसुरेभ्यः
वर्षाननेकांस्तृपितो यथास्यात्पितात्मनस्स्वर्गगतो नितांतम् ॥

शिखरिणी

धनं धान्यं, कुप्यं, रजतकनके, गोसमुदयम्
गृहान् सौधारामा; नपिच फलवत्क्षेत्रनिवहम्
क्रमेणाधीकृत्य प्रथममथ विक्रीय च धनम्
प्रदानयान्नस्याव्ययदविशन्नयावनिसुरः ॥

तथापि विप्रोऽविरिरंसुरन्नदानान्निविष्टो धनसंग्रहाय
विचिंत्य दीर्घं यततेऽस्म हर्तुं वधूचतुष्कस्य विभूषणानि ॥

शार्दूलविक्रीडितम्

"ब्रूयां कां प्रथमं विभूषणगणं मह्यं प्रयच्छे"त्यसौ
तुल्यप्रेमभृदासु जञ्चलमतिश्चिन्ताकुलोऽवास्थित
दृष्ट्वा ताः "प्रथमे विभूषणगणो ग्राह्यो मदीयो; मम
ग्राह्यो, मामक, इत्यहंप्रथमिकाभाजश्च चिंताकुलः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिखरिणी

विनैकं माङ्गल्यं सकलमपि भूषासमुदयम्
मिथस्पर्थिन्यस्तास्त्वरितमवमुच्यास्य पुरतः
न्यधु, निर्भूषं तद्वपुरपजहारास्य हृदयम्
पुरन्ध्रीणां भूषा भवति पतिभक्तिः सुरुचिरा ॥

व्ययो दानाय, भर्तैव घनार्थी किल याचते
स्वयं साध्व्यश्च, किं चित्रं स्पर्धमाना मिथोऽददुः ॥

शार्दूलविक्रीडितम्

गृह्णन्ति प्रसभेन मत्सरहृदो भर्तुस्सपत्न्यो घनम्
भूषाजालमनर्घ्यवस्तुनिवहं, पत्ये स्वभूषार्थिने
मात्सर्येण समर्पणं श्रुतचरं नाद्याव, धीमास्त्रियो
राशीभूतमनुत्तमं सुकृतमित्यस्ताविषुस्ता जनाः ॥

* पास्पर्थिनीनां निजसुन्दरीणां भूषा गृहीत्वा सकलाश्च तासाम्
प्रमोदयामास; स मोदतेस्म स्वात्मन्यभूषां दृढबद्धभक्त्या ॥

"चतुरागमसन्तानं प्राप्स्यसि, न वचोऽन्यथा मे स्यात्"
इति पितृवाचमधीतेस्मायं प्रातश्च सायञ्च ॥

अभजन्नपि सद्यःफलमविरम्य गुरूपदेशमनुसृत्य
मत्वा विधिमिति कुरुतेस्म यथापुरमन्नदानमवनिसुरः ॥

अलघुव्रतनामासौ स यज्ञशर्मैव भूपते ! ऽमुष्य
सततान्नदानदीक्षां वहतस्संज्ञोपलब्धेयम् ॥

---

* स्पर्धाधातोर्यङ्लुगन्तात्ताच्छील्ये णिनिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वियोगिनी

व्ययिते सति भूषणोच्चये प्रियता किंनु बभूव तास्वसौ
परिपालयितुं व्रतं सतीर्हृदि विक्रेतुममंस्त भूसुरः ॥

सतीभ्योऽवेदयित्वात्मनिश्चयं सच्छलं प्रियाः
उवाचासौ यथा नौका "वाणिज्यं कर्तुमुत्सहे ॥

सख्या च केनचिद्युक्तो यामि द्वीपांतरं, धनम्
अर्जिष्येऽन्नप्रदानाय न व्रताद्विरमाम्यहम्" ॥

वसंततिलका

ता एककण्ठमवदन् "न विना भवन्त
मुत्तमो गृहेऽत्र वसतिं, भवता सहैमः
अस्मांस्त्वया प्रिय ! नयस्व सहे"ति विप्र
आशंसते हृदि यदेव वचो वधूनाम् ॥

मूल्यं गृहीत्वा निभृतं वणिक्तः सिंधुप्रतीरं समुपेत्य नावम्
आरोपयद्यावदसौ वधूटीस्तावद्रयाद्दूरमियाय नौका ॥

यावदीषद्गता दूरं नौका तावन्महीसुरः
निर्भिन्नो शोकवज्रेण धैर्याद्रौ व्यरुदद्बत ! ॥

"धिङ्मां सतीविक्रयिकं धनाशा
विनष्टबुद्धिं, हतकं, नृशंसम्
किं विक्रयायैव समाश्रयध्वम्
मां यूय ? मत्युत्तमशीलरूपाः !" ॥

इत्यार्तनादं विनिशम्य भर्तुस्तं वञ्चयित्वा वणिजो हरन्ति
आत्मान" मित्यस्य महीसुरस्य सत्यश्चतस्रश्च शुचाभिभूताः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तुङ्गभङ्गेच तिमिङ्गिलाद्यैर्भयङ्करे वारिचरैर्महाब्धौ
हृदि स्मरन्त्य: पतिपादपद्मे उदश्रुधारा न्यपतन् स्वनावः ॥

"न गृहीताः पतन्त्यस्ता युष्माभि" रिति नाविकाः
परस्परं प्रण्यनिंदन् "धिग्युष्मा " निति शेपिरे ॥

शार्दूलविक्रीडितम्

आनायान् प्रविसार्य सागरजले नैकान्, जनांश्चाप्लुवे
निष्णातान् विनियोज्य सिंधुमभितश्चान्वेषयामास सः
केता वाणिजको वधूजनकृते· नैवोपलब्धा, स्ततो
विप्राद्दत्तधनं जहार च वणिङ्निनन्दन्, शपन्, भूरिशः ॥

ततो नासौ श्रद्दधाति "इमे स्वस्य सुता" इति
मदीयवचने राजन् ! अनन्तरकथां शृणु ! ॥

निर्मग्ना जलधेर्जले युवतयो व्यात्तेन वक्त्रेण त
त्पाथांस्युत्पिबतस्तिमिङ्गिलगिलस्यांतःप्रविष्टाः क्षणात्
मूर्ध्नस्तस्य बिलादथोर्ध्वमुखनिष्क्रांतांबुधारारया
न्निर्याता बहि, रेत दद्भुतमदृष्टाकर्णितं किं पुनः ? ॥

वसंततिलका

विद्युल्लता इव विहायसवीथिकाया
माकाशशाणकषिता इव हेमरेखा
रत्नानिवोर्मिगणसञ्चलनोद्गतानि
ता योषितो दिवि चकाशिर उज्ज्वलांग्यः ॥

दूरमुत्पत्य ता व्योम्नि विमाने प्रान्तगामिनि
दम्पत्योर्दिव्ययोश्चित्रं पतिता मूर्छिता बत ! ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ता लब्धसंज्ञास्सलिलार्द्रवस्त्रास्तौ दम्पती वीक्ष्य कृपार्द्रचित्तौ
प्रदाय दिव्यानि नवानि वासांस्याश्वासयामासतुरादरेण ॥

पृष्टा अमूभ्यां सुरदम्पतिभ्यां प्रवेपमाना अतिशीतदोषात्
वक्तुं प्रवृत्ता अमृतायमानकण्ठस्वरेणात्मकथां तरुण्यः ॥

वचांसि तासां चतरस्रशोभिरूपं विलासाश्च दृशां, वधूनाम्
परस्परस्मान्मन आहरन्त सौन्दर्यराशेर्युवतेश्च यूनः ॥

प्रसारयन्तं स्वकटाक्षजालं मुहुर्मुहुस्तासु वधूटिकासु
निवर्तयन्तं स्वभयात्पुनश्च व्याजेन वाचः परिमिश्रयन्तम् ॥

पतिं विशङ्क्यामरसुन्दरी सा स्वीयाद्विमानाद्युवतीश्चतस्रः
कस्यापि सौधे नगरस्य वारवधूटिकाया अवतार्य याता ॥

शालिनी

सौधस्यास्य स्वामिनी वीक्ष्य वेश्या
तासां स्त्रीणां तं विमानावतारम्
"दिव्यस्त्रीभिर्भाव्यमाभि, र्नकांक्ष्य
मस्माभिः किंचिच्च वस्त्वत्र सौधे" ॥

पुष्पिताग्रा

इति हृदि गणिका विचिन्त्य भीता
निकटमुपेत्य वधूटिकाः प्रणम्य
सविनयमवद "द्भवत्य ! एत
द्भवन, मिहस्थितवस्तुसञ्चयश्च ॥

अम्बा ! यदद्ययावन्मदीयमद्यप्रभृति तदस्त्वखिलम्
भवदीयं, पिबत ! सुखेनाश्नीत ! यथेच्छमत्र विहरत च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धारापूर्वकमधुना प्रददे भवतीभ्य इत्युदित्वा सा
दत्त्वा तथाऽ"सि धन्ये" त्यामन्त्र्य नितम्बिनीर्निरगात् ॥

आबालवृद्धमेषा गणिका वृत्तान्तमेतमाचख्यौ
नगरेऽश्लाघन्त जनास्तस्याः पुण्यञ्च भाग्यञ्च ॥

अतर्कितं भाग्यमुपैति जन्तुं पक्वं यदास्यात्स्वपुराणपुण्यम्
यदातु पापं परिपाकमेति स्वहस्तदण्डश्च भवेद्भुजङ्गः ॥

कपाटं चापि सौधस्य तस्यानुद्घाट्य ताः स्त्रियः
विदित्वा शकुनैर्भर्तृ; संयोगं हर्षिताः स्थिताः ॥

मन्दाक्रांता

यातायाताः पुरगतजना वीक्ष्य सञ्चारिणीस्ताः
प्रासादाग्रे मुकुलितकरा देवतामूर्तिभावाः
वन्दन्ते, ते सकृदपिच संप्रेक्ष्य लावण्यरेखाम्
स्वीयं चित्तं नहि कलुषितं कुर्वते मोहधूल्या ॥

गन्धर्वकांताः किमु ? देवनार्यः ? सिद्धाङ्गनाः किम्विति दर्शनेन
शाम्येत्स्वपापं सपदीति भक्त्याऽलुलोकिरे पौरजनास्सतीस्ताः ॥

वारक्रमेणैत्य पुरीतरुण्य स्सौधस्य तस्याङ्गणमाव्यभक्त्या
निर्मृज्य तोयैरनुलिप्य रङ्गवल्ल्या सुरेखा रचयांबभूवुः ॥

पाकाय कोऽप्यानयतिस्म शाकान् क्षीराणि कश्चिद्दधितडुलांस्तु
अन्यौ, घृतं कश्चन, काष्ठबृन्दं परश्च, भक्त्या समुपाचरंस्ताः ॥

कालेन याता द्विजसुन्दरीणां चिह्नानि गर्भस्य समुद्गतानि
प्रवृद्धगर्भा अभवंश्च मासक्रमेण; मासे नवमे प्रविष्टे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गर्भस्थबाला न्यपठन् कदाचिदाम्नायसूक्तीः; स्मृतिधर्मवाचः
उच्चैः कदाचिच्च पुराणगाथास्सविस्मयं शृण्वति पौरबृन्दे ॥

ज्येष्ठानुपूर्व्या प्रमदाश्चतस्रो लग्ने शुभे तास्सुवतेस्म पुत्रान्
यदृच्छयायातमुनिश्शिशूनां वेदोक्तसंस्कारविधींश्चकार ॥

स दिव्यदृष्ट्या विदितो यतीन्द्रो मूर्तागमा एत इति क्रमेण
चक्रे चतुर्णां प्रथम, द्वितीय, तृतीय, तुर्यागम इत्यभिख्याः ॥

श्वशुरोदितचतुरागमसंततिशब्दार्थ एष एवेति
जनयित्र्यस्ता विदिताः प्रशशंसुरलौकिकं मुनेर्ज्ञानम् ॥

प्रार्थितोऽसौ यमी ताभिः काले समुचिते गत.
चौलोपनयनादीनि श्रौतकर्माण्यचीकरत् ॥

अनधीतलब्धविद्या अकृष्टपच्या इवावनीखंडाः
अपि विधिमनुरुन्ध्यामी संयमिनोऽध्यैषताखिलाविद्याः ॥

मालिनी

समुचितशकुनामां दर्शनेनापि नित्यम्
प्रमुदितमनसोऽपि प्रेक्षणेनात्मजानाम्
अविदितपतिवार्तास्ताः पुरंध्र्यश्चतस्रो
गुरुशुगनलसंतप्तांतरङ्गा न्यवात्सुः ॥

शार्दूलविक्रीडितम्

चत्वारस्तनयाः प्रसूस्समुपसृ "त्याम्बा ! वयं भ्रातरः
पर्यट्यावनिमण्डलं पितरमन्विष्याम, संविद्महै"
इत्याज्ञामुपलभ्य ते जनपदानाहिंड्य देशन् बहून्
गच्छन्तिस्म मदाशयस्य नगरीं कैश्चिद्दिनैरंततः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

तेऽशृण्वन् "नृप एष पण्डित इति, प्राप्यं न संदर्शनम्
केनाप्यस्य विना पुरोहितजनद्वारेण चे, त्यात्मनः
कीर्तिभ्रंशभयेन पंडितवरांस्ते नानुमन्यन्त इ
त्यस्येच्छां यजनस्य कैरपि मिषैर्व्यावर्तयन्ती" ति च ॥

अपिच प्रभोस्समक्षं मूढानेव प्रवेशयन्तीति
राज्ञा पृष्टा वार्ताः "न किमपि विद्म" इति ते वदेयुरिति ॥

एवंविधाः कथाश्श्रुत्वा चत्वारश्चक्रिरे मनः
कथञ्चिन्नृपतिं दृष्ट्वा प्रादुष्कर्तुं स्वपांडितीम् ॥

शार्दूलविक्रीडितम्

भूत्वा ते किल किङ्कराः फलपुटीशीर्षा, विमूढा इव
ग्राम्यैर्भाषितचेष्टितैर्नरपतेस्सौधं प्रविष्टाः शनैः
तस्याग्रे विनिधाय ताः फलपुटीः पृष्टाश्च वार्ताः पुर
स्यानेन क्षितिपेन, मूर्तविनया लब्धावकाशा जगुः ॥

* "मायम्मानसुनीवे ! रायलवै कावदेवराजे जे जे
मायातुमलानियदि पायकसंतोसमुन्नपलमिलसामी" ॥

---

* श्लोकेऽस्मिन् संस्कृतान्ध्रभाषाश्लेषः । यथा संस्कृतपदविभागः
मा, आयं; मान, सुनीवे; रयलवा; एका, अवत, एव, राजे;
अजेजे, मा, आयातु, मलानि, न, यदि, पायक, सन्तः, अस
मुत् न, पल, मिल, सा, अमी ।
हे सुनीवे ! = शोभना नीवी(मूलधनं) यस्य, आयं = प्रजाभ्यः
करद्वारा लब्धं धनं, मामान = मागणय, तन्नाम "आये

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनिशम्य प्रतिवचनं भाषाद्वयबद्धमेतेषाम्
विदितार्थस्साश्चर्यं तेभ्यः प्रणिपत्य साष्टाङ्गम् ॥

विश्वस्य मूलधनं माव्ययय" इति भावः। अलवा = अविच्छिन्ना (अव्ययिता) रैः = धनं एकैव, अवत् = अर्थकृच्छ्रेषु रक्षति, अतो, मूलधनं रक्षणीयमिति। अत्र रैशब्दः पुंलिङ्गः। विशेषणे स्त्रीलिंगे क्लिष्टश्लेषे लिंगभेददोषो नैव गण्यते। अवतु इत्यस्य अवत् इति छान्दसं रूपम्। अजेजे =अजेन यजतीति अजेट् - तस्मैः राजे = राज्ञे (राट्शब्दस्य चतुर्थी) मा = श्रीः आयातु = आगच्छतु, (अवश्यमागच्छतीत्यर्थः) मलानि = पापानि, न =नस्पृशन्ति; पायक = हे रक्षक! सन्तः = सज्जनाः यदि = आगच्छेयुर्यदि असमुत = असन्तुष्टस्सन्. नपल = मा अवधीरय. [बहुमन्यस्वेति यावत्] मिल = तान् सङ्गच्छ, अमी = आगतास्ते सज्जनाः, सा = लक्ष्मीः; ते सज्जना वेदमूर्तयस्साक्षाल्लक्ष्मीस्वरूपिणः। अतस्तेषामाश्रयं दत्त्वा यागानिष्ट्वा भूयसीं सम्पदमुपलभस्व" इति ॥

आन्ध्रभाषापदविभागः - मायम्म. आन, सु; नीवु ए, रायलवु, ऐ, कावन्, देवरा, जे, जे जे मायातुमुल्ल, पायक, सन्तोसमु; उन्नपलमु, इलसामी !।

देवरा!=हे प्रभो! जे जे जे = जयतु, जयतु, जयतु; (जयतु भर्तेति यावत्) इलसामी = हे धरानायक! नीवु = त्वम्; रायलवै = राजासन्; कावन् = यतो रक्षसि; ततः सन्तोसमु = सन्तोषः, पायक = अविहाय [सन्ततमिति यावत्] माया तुमुल्ल = अस्मदात्मनः (अस्मन्मनांसीति यावत्) आननयदि= लग्नस्तिष्ठति, उन्नपलमु = एतत्सिद्धंफलमस्माकं. मायम्मानसु = अस्मन्मातृपादाभ्यां शपामः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुरस्तान्नृपोऽभ्यर्च्य पाद्यार्घ्याभ्यां सभासदः
व्याचख्यौ विशदीकृत्य द्वावर्थौ संस्कृतांग्रयोः ॥

आकर्ण्य कलापूर्णो "मदाशयोऽयं किमीदृशो विद्वान् ! "
इत्यभिनन्द्य निजान्तिकमुपवेश्य सभाजयामास ॥

शार्दूलविक्रीडितम्

पृष्ट्वा तच्चरितं मदाशयनृपः पित्र्याऽच्चरित्रात्प्रभृ
त्याकर्ण्य स्वपुरोधसां कुहकतां यावच्च "धिङ्मां जडम्
पूजार्हेष्वपराद्ध "मित्यपनयंस्तान् किंपुरोधो द्विजान्
स्वीयेऽमूंश्चतुरः पुरोहितपदेऽकार्षीन्नियुक्तांस्ततः ॥

वसन्ततिलका

राजाश्रयार्जितधनेन गृहीतदारा
स्साकं स्वमातृभिरिमे नगरे वसन्तः
अन्वेषणाय जनकस्य भटान् प्रजिघ्यु
र्येऽज्ञाततज्जनकथा न्यद्रुतत्वटित्वा ॥

मंजुभाषिणी

अलघुव्रतस्स निजदारविक्रयी
हृदि लज्जितस्स्वजनदूषणैर्गतः
बहुदूरदेश मवलम्ब्य भैक्षुकीम्
धनमर्जयन् विचरतिस्म तं व्रतम् ॥

यावन्नालं चरितुं व्रतं लघुमपि स परित्यज्य
भुक्तिं स्वजीवयात्रां कन्दैर्मूलैः फलैश्च नयतेस्म ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मंजुभाषिणी

विचरन् घनाय स मृगेन्द्रवाहना
महिमानमद्भुतमवेत्य यात्रिकैः
उपलभ्य मन्त्रमुपगत्य चालयम्
जपतिस्म भो ! स्तव कथाश्रुतीच्छया ॥

त्वत्कथाश्रवणं सम्पत्पुत्त्रपौत्रादिलब्धये
कल्पते खलु, तेनायं पुत्रलाभमविन्दत" ॥

आख्यायैवं मूका यावत्सा मधुरलालसा तावत्
अलघुत्रतमाह नृपः "कच्चित्ते पुत्रसंशयोऽपास्तः" ॥

प्रथमागमादयो द्रागुपेत्य पितृपादयोः पतिताः
हृष्टाः पित्रालिङ्गनमूर्धाघ्राणोपलालनैर्नितराम् ॥

कलापूर्णस्य मन्त्री यस्सत्त्वदात्माह्वयोऽभवत्
स प्राञ्जलिः प्रणम्याह बालां मधुरलालसाम् ॥

"भो अम्ब ! विस्मृत्य कुलञ्च बन्धून्
नाख्याञ्च कुत्रापिच हिंडमानम्
आनीय कासारपुरीजनो माम्
* मे सत्त्वदात्मेत्यकरादभिख्याम् ॥

कोऽहं ? व्यपदेशः कः कुलञ्च किं मम ? कथ सर्वम्
विस्मृतमासी ? देतद्बोद्धाग्मे नाम्ब ! मे कथय !" ॥

---

* ते मे शब्दौ निपातेषु। (काव्यालङ्कारसूत्रवृत्तौ पञ्चमाध्याये नवमं सूत्रम्) ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति पृच्छति सवि तस्मिन् सा बाला मधुरलालसाऽसृशती
नेत्रयुगं विकृतोष्ठी निजमध्यं प्रोन्नमय्य चक्रन्द ॥

तद्वीक्ष्य सत्त्ववदात्मवादी " दियतैव कालेन
कथमिव विचेष्टसे ? मद्वृत्तांतः कथ्यतामम्ब ! ॥

इति भूयो भूयस्तां प्रणम्य स प्रार्थयामास ॥
असांत्वच्च मुहुः स्सा त्वनिशम्यैवतदुच्चकैररुदत् ॥

"द्विमासजातासि शिशुर्मुनीना
मगोचरा वक्षि कथा विचित्राः
त्वं, तेऽपि तृट्क्षुद्रुदितानि सन्ति ?
हंते" ति केचिद् ब्रुवतेस्म दृष्ट्वा ॥

"अम्ब ! हित्वेदृशीर्माया विभूत्या दिव्ययात्मनः
स्वभावसिद्धया युक्ता प्रसीदेत्यवदन् परे ॥

"किंचान्यत्प्रष्टुमिच्छामो भवेत्सन्देहनिर्णयः
इति श्रद्दध्महे स्वांते कुतोऽवेयं विडम्बना ?" ॥

इति चान्येऽरूय, न्नेवं बहुभिर्बहुधार्थितापि सा बाला
गतदिव्यज्ञानेवाक्रंदन्निर्मिथ्यभावेन ॥

ईदृग्दिव्यबोधोऽस्याः कथमाविरभूदिति
न मयाऽकारि संप्रश्नः" इति राजान्वतप्यत ॥

रूपानुभूतिं च मदाशयश्च ततः कलापूर्ण उवाच दृष्ट्वा
श्रुताः खलूक्ता अमुया भवद्भ्यां कथा भवद्भाग्यमपूर्वमुर्व्याम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवथश्श्वश्रूश्वशुरौ युवां ममाद्य प्रभृत्यर्हौ
मुक्तौ मत्सेवाया व्रजतं ! शिशुरक्षणं कुरुतम् ॥

इति; श्रुत्वा सत्त्वदात्मा प्राह "राजन् ! यदा भवान्
मणिहारं गलेऽवध्नाच्छिशोस्ते श्वशुराविमौ ॥

सुलक्षणैषा शिशु, रर्हतीयं राज्ञीपदं ते कमलेव विष्णोः
अस्याः पदे सर्वनृपालकांता शिरोमणीनिर्मितनूपुरार्हे" ॥

प्रहर्षिणी

इत्युक्तो नरपतिरात्मनि प्रहृष्ट
स्सौवर्णाम्बरमणिभूषणोपहारैः
सम्मान्याधिकतर " मात्मजां गृहीत्वा
गन्तव्यं गृह " मिति तौ मुदा जगाद ॥

अलघुव्रताय चासौ नृपतिस्सततान्नदानपर्याप्तम्
धनराशिं दत्वा तं सत्कृत्य सपुत्रकं व्यसृजत् ॥

रूपानुभूत्या च मदाशयेन मातापितृभ्यां परिपोष्यमाणा
वलक्षपक्षस्य शशाङ्करेखेवात्रापि बाला दिवसैः प्रवृद्धिम् ॥

अङ्गकैः पुष्णती शोभां वचोभिश्श्राव्यतां भृशम्
दृशोश्च श्रवसोः पर्व चक्रे मधुरलालसा ॥

अनिमित्तस्मितरुदितै, र्दुर्ललितै, र्मधुरभाषितैश्च, पद्यैः
स्खलितैश्शैशवकेलीशतैश्च हृद्यैः प्रमोदयामास ॥

यथा विश्लेष्य वृन्तं स्वं कोरकः फुल्लतामियात्
अपास्य शैशवं तस्या गात्रं दृक्पेयतां गतम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्षोरुहे केलिगिरी, अमुष्याः करौ लते, ऊरुयुगं कदल्यौ
ओष्ठञ्च बिम्बं, हसितं सुमौघः स्मरस्य केलीवनमम्बुजाक्षी ॥

वस्तुध्वनिरालापे तदङ्गचेष्टास्वलंकृतिध्वननम्
अधरेऽस्ति रसव्यक्तिर्ध्वनिकाव्य ममूत्तदा युवती ॥

सङ्गीतमपि साहित्यं श्रितास्सर्वाः कलाश्च ताम्
फलपुष्पादयः काले संश्रयन्ति यथा लताम् ॥

उद्वाहयोग्ये वयसि प्रविष्टे नृपाय विज्ञापयितुं पितैच्छत्
यावत्स एव प्रजिघाय तस्मै कन्यां वरीतुं स्वकृते सखायम् ॥

प्रहर्षिणी

यत्तीर्थे मनसि यियासितं तदेवा
यातं मे पुरत इति प्रहृष्टचित्तः
तातस्तां स्वमधुरलालसामसुष्मा
आश्रौषीत्प्रतिनिधये धराधिपस्य ॥

नृपस्ततो मङ्गलवाद्यघोषेष्वाशीर्वचस्सु प्रसरत्सु दिक्षु
स्त्रीणां गणे गायति गीतजातं कन्यामुपायंस्त महाशयस्य ॥

शोभने शयनागारे हंसतल्पे वधूवरौ
समावेश्य स्मितास्यास्तत्सख्यो व्याजेन निर्गताः

करमूलगण्डयुगलस्तननाभ्यूरुस्थलेष्वस्याः
पतिता दृशः प्रियस्य हर्षस्पर्शा इवाप्रीणन् ॥

पश्यन्ती तं तेन दृष्टा निवर्तयति वीक्षणम्
पुनः पश्यति दृष्टा च निवर्तयति सुन्दरी ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपेतुमातुरा चित्ते प्रियं मधुरलालसा
पृष्ठतः कुरुते लज्जा विघ्नं कुर्वत्यनुक्षणम् ॥

कलापूर्णो गृहीत्वाऽस्याः पाणिपल्लवमादरात्
उपवेश्य स्वीयपार्श्वे हर्षस्तामवदद्यथा ॥

"किं पूर्णपात्रिका त्वं ! बाले ! तेऽधरसुधां कपोलौ च
कुचयुगमहमहमिकया हर्तुं मेऽङ्गान्यभिलषन्ति ॥

सखि ! ते स्तनगिरिशिखरे वसन्, पिबन् वदनचन्द्रपीयूषम्
रममाणस्तपसि दिवानिशमभिलष्यामि कालमपनेतुम् ॥

पश्यन्तीं ते मुखं दृष्टिं कुचावाकर्षतस्तव
प्रिये ! ततः कटीचोरू तन्मध्ये सा निपीड्यते ॥

"सहना ववतु" सुपाठो महितः "सह नौ भुनक्तु" चुम्बशतम्
अयि ! "सहवीर्यं करवावहै" स्मररणाङ्गणेषु चन्द्रमुखि ! ॥

"तरुणि ! त्वदङ्गमुज्ज्वलसुवर्णरूपं हि, शोभतेऽभ्यधिकम्
रत्नेन श्लिष्ट"मिति ब्रुवन् रसिकरत्नमश्लिक्षत् ॥

आगत्यैतश्चुम्बत्यागत्य ततः स्तनद्वयं स्पृशति
व्याजेन चाधरसुधां स्वदते श्लिष्यति च तन्वङ्गीम् ॥

शार्दूलविक्रीडितम्

आश्लेषं निरुणद्धि योषि, दधरं स स्वादते यत्नतो
वक्षोजग्रहणं निवारयति सा, नीवीं स उद्वेष्टते
सह्रीका परिवर्तते शशिमुखी, निःस्ते स तां पृष्ठतो
नीता तल्पमनङ्गरङ्गमवशा स्वप्रेयसा ह्लादते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शार्दूलविक्रीडितम्

निद्राव्याजयुतं प्रियं प्रियतमोपेत्याधरोष्ठं शनै
श्चुम्बन्ती कतिचिद्दिनानि; कपटं ज्ञात्वापि च प्रेयसः
अज्ञात्वेवच कुर्वती विहसता भर्त्रा समालिङ्गिता
श्लिष्टा तं हसदानना प्रमुमुदे सम्मोदयन्ती प्रियम् ॥

बाला निजाङ्कपीठे प्रियं प्रतिष्ठाप्य मन्दहाससुमैः
कुङ्माल्यैश्चाभ्यर्च्य न्यवेदयत्स्तनफलाधरसुधाश्च ॥

शार्दूलविक्रीडितम्

वक्षोजौ परिपश्यतः प्रियतमस्योरस्समाश्लिष्य सा
विश्लेष्याक्षियुगं निमीलयति सुस्मेऽानना "लालसा"
स्पृष्टे तेन वधूर्निमीलितदृशा वक्षोजयुग्मे स्मर
व्यामुग्धा पुरुषायिते परवशा प्रोज्जृम्भते भूरिशः ॥

शार्दूलविक्रीडितम्

ताटङ्कद्वयधालधरयरुचयश्शम्पा, जटानिर्गल
त्पुष्पौघो हि बलाकिकाः, करकिका विच्छिन्नमुक्तागणः
वर्षो घर्मकणा, स्तदीयकबरीभारश्च कादम्बिनी
यां दृष्ट्वा प्रियहृच्छिखी बहुतरां हृष्टा नरीनृत्यते ॥

"सुगूढस्सुप्रकाशश्च" इत्यदात्स प्रहेलिकाम्
राजा, "रतिरहस्येऽस्ति समाधि" रिति साश्लिषत् ॥

एवं रेमे स मधुरलालसया, ऽभिनवकौमुदीं ज्येष्ठाम्
आदृत तुल्यप्रेम्णा दक्षिणनेता कलापूर्णः ॥

राजाऽभिनवकौमुद्या वल्लकीमवकर्णयन्
शृणुयात्सेत्याजुहावत्प्रियां मधुरलालसाम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रुत्वा ज्येष्ठागानं "लालसया" सहित ईषदिव कालम्
आख्य "रसति! प्रवीणां शृणुमस्त्वां, गीयतां विपञ्चिकया" ॥

शालिनी

इत्युक्त्वाहस्म प्रगातुं लताङ्गीम्
संकोचन्तीं "किं कि" मित्युर्वरेन्द्रः
सा प्राचष्टाऽस्या विपंच्याः स्वरे मे
कण्ठस्वानो लीयते नेति शंके ॥

हरिणी

इति स कथितो राजाख्य "रते गलप्रकृतिर्यथा
कमलनयने! गाये" त्युक्त्वा ततोऽधरयन्त्यसौ
श्रवणसुभगास्तद्वल्लक्याः श्रुती रपरेवगी
युवतिरनिंद्पूर्वं गीतं जगौ श्रुतिपेशलम् ॥

कण्ठस्वरं तदात्वे श्रुतिमधुरं मधुरलालसाया स्सः
"एष त्रिभुवनदुर्लभ" इत्यभिनवकौमुदी च तुष्टुवतुः ॥

ततः कलापूर्ण उवाच "वीणा प्रिये! त्वदीयात्र परीक्षणीया
आनीयता"मित्यवदद्द्वितीया "सत्यं न गूहामि, शृणोतु देवः ॥

विमृशन्तु जना मां तत्सहे, कण्ठस्वरे मम
न काऽपि लीयते वीणेत्यवधेयं प्रिय! त्वया ॥

अत्र स्थितामिमां वीणां संदिदृक्षेस्स, किंत्वसौ
कियन्मात्रीति विज्ञाता भवतैवाधुना प्रिय! ॥

॥ इति दशमस्सर्गः ॥

47) CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथैकादशस्सर्गः

ततोऽभ्यधात्तामधिपोऽद्य यावदनुत्तमेयं हि विपञ्चिकेति
कृत्वा मनस्यभ्यधिकामितोऽन्यामुद्दिश्य नाहं प्रयतेस्म पूर्वं ॥

मयाधुनाऽज्ञायि विपञ्चिकेयम्
न ह्यद्वितीये", त्यवलोक्य कांताम्
ज्येष्ठामुवा"चायि ! किमस्ति यत्र
कुत्रापि वाऽस्या उचिता विपंची ?" ॥

वसंततिलका

साऽब्रूत "देव ! भवते विनिवेदिता प्रा
गेषातिशेत इतरा इति तुम्बुरुर्माम्
शिष्यां ब्रुवन्नदित मे निजदिव्यवीणा
मस्याः किमस्ति भुवनेऽत्र महत्तरान्या ?" ॥

शार्दूलविक्रीडितम्

इत्युक्त्वा पुनराह सा "श्रुतिगतं मे तुम्बुरुर्दैशिकः
पुत्रेणावजितो विधातुरिति; को हेतुर्जयस्याऽभवत् ?
हस्तेऽस्यास्यदियं विपंचिरनघाऽजेष्यन्मुनिं तुम्बुरु
वैधात्रं; प्रिय ! निश्चिनोम्यत इयं लोकोत्तराऽनुत्तमा " ॥

मन्दाक्रान्ता

वाग्भिस्ताभिः स्मृतिमुपगता तुम्बुरोर्नारदर्षे
विद्यास्पर्धा, तदनुच कथा प्राग्जनेरात्मनश्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्त्या गेहेऽविदितमथ गुप्तात्मवीणा, ततोऽ"सा
वर्हत्यस्या मधुरगलमेषैव नान्येत्यमंस्त ॥

कनीयसीं ततः प्राह कलापूर्णोऽस्ति वल्लकी
काचिदेकत्र या कण्ठं तवार्हति, लभेय ताम्" ॥

इति श्रुत्वा वचस्सख्यो ज्येष्ठया अपनीय ताम्
आनीयैकान्तिकं देशं वक्रा गिर उपादिशन् ॥

"अद्याऽपि मुग्धा किमुवा सखि ! त्वम्
गीतं सपत्न्याः स्तुवता पुर स्ते
पत्या कृतां ते नहि वेत्स्ववज्ञाम्
कदर्थयामास तवैष वीणाम् ॥

तस्या गीतं विदितमतिशायीति गीतेस्तवेतः
पूर्वं तेन त्वदधिपतिना; ऽऽह्वाय्य तां ते पुरोऽद्य
संस्तुत्य, त्वामतिलघयतिस्मा, पराद्धस्तवासा,
वेतत्सह्यं न भवति कदाचिच्च ते मानवत्याः ॥

शार्दूलविक्रीडितम्

शृण्वन् गीतमिह प्रियस्तव गृहेऽद्यार्चितयत्तां वधूम्
स्वान्ते, नोचितमेतदेव, सखि ! तामाह्वाययामास च;
अंगुल्या मणिमुद्रिकां च धृतवांस्तस्या भवत्याः पुर
श्शोच्यां वीक्ष्य कदर्थनां तव कृतां क्लिश्यामहे दुस्सहाम् ॥

शार्दूलविक्रीडितम्

मानं धरस्व ! धृतिं बधान ! निकषा त्वामागतं ते पतिम्
मा प्रत्युद्गमनेन, मा स्मितवचस्संभाषणैर्मानय !

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्स्नेहस्त्वयि नेयता शिथिलितस्स्या, द्वीक्ष्य तेऽधीरताम्
भर्ता त्वां लघयत्यतीव सखि ! शृण्वस्मद्वचस्ते हितम् ॥

यदि मधुरलालसाया गीते प्रीतिश्शृणोतु तत्सदने
भर्ताऽवामंस्त त्वां त्वत्सदने गापयित्वा ताम् ॥

प्रसीदति यथा चित्तं तव जानात्यसौ, ततः
एधि ! धीरा क्षणं, विद्मः किं न प्रेम गभीरताम् !" ॥

इत्यभिनवकौमुद्युपदिष्टा स्वसखीभि राह स्वाम्
"सत्यं सखीभि रुदितं नाद्यावधि चिंतितं मयात्वेतत् ॥

न मया विदितमिदं बत ! नहि पश्यति मन्तुमुज्ज्वलं प्रेम
तासामुपदेशानामनुसरणं विजयसाधनं भवति" ॥

इति संचिन्त्यामन्त्र्य च सखीस्समागतमवेक्ष्य भर्तारम्
गृहकार्यनिमग्नेवादत्त्वा स्वागतमुपक्षतेस्म वधूः ॥

शार्दूलविक्रीडितम्

निर्भूषां मलिनांशुका, मकृतसंस्कारालकां प्रेयसी
माहूतामपि नोपगा; मवचनामालापितामप्यसौ
वीक्ष्यात्मन्यनुमीय कारणमुवाचायि ! प्रिये ! दृश्यसेऽ
द्यान्येव प्रमदा; न मे परिचिता ईदृग्विलासास्तव ॥

शार्दूलविक्रीडितम्

संदृष्टे मयि दूरतोऽपि भवती स्मेराननाऽलंकृता
कौशेयेन, मनोज्ञभूषणचये, नानङ्गबाणानिव
मुञ्चन्ती निशिता दृशो; धृतवती रोमाञ्चपीनस्तना
वायातिस्म पुरान्तिकं मम, कुतस्तन्धा प्रिये ! दृश्यते ? ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रहर्षिणी

इत्युक्ताहं युवति "रसि नर्मगोष्ठीम्
नार्हा; ऽर्हाऽस्ति मधुरलालसा विजेत्री
गान्धर्वे मम, हृदयं निधाय तस्याम्
वाचा मामुपचरितुं समागतस्त्वम् ॥

शार्दूलविक्रीडितम्

किं कार्यं भवतो मयास्ति नृप ! ? मे भाग्यं भवद्दर्शनम्
मन्ये, ऽर्हाम्यहमीदृशीं किल भवत्सेवा, मितोऽन्यां तव
प्रेयस्यर्हति " लालसा", कलुषिते प्रेम्णि प्रियस्योचिता
मानिन्या मृतिरेव, किंतु नहि यान्तीमे दृढा मेऽसवः ॥

पृथ्वी

इति प्ररुदितां वधूं नृपतिराह " चन्द्रानने !
अहं त्वदपराद्ध इत्ययि ! निदर्श्यतां मे, ऽपदे
विशङ्कितवती वृथाहि, शृणु मे शपेऽथासुभि"
स्त्विति प्रपतितस्तदंघ्रिजलज़ातयोर्भूवरः ॥

गृहीतपादा पतिमाह तन्वी "मां मा स्पृश! त्वं परिगृह्यतां तत्
पदद्वयं तावकमोहमूर्तें " रित्यंघ्रियुग्मं विचकर्ष पश्चात् ॥

ततो वदं "स्त्वन्मम मोहमूर्तिः कान्येति संश्लिष्य गलं कराभ्याम्
जिघ्रन् मुखं शीर्षतटं मृशंश्च प्रसादयामास नृपः कथंचित् ॥

पतत्सु बाष्पेषु सगद्गदं "ते वाल्लभ्यदोषो न मनाक्च, किंतु
लज्जाविषादौ हृदयं प्रविश्य तत्तामकार्ष्टामिति सा चचक्षे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिखरिणी

कलापूर्णोऽवादीत्तरुणि ! विदितं तावकशुचो
निमित्तं, यद्वीणा तव परवधूकण्ठविजिता
विपंच्या एतस्याश्शतगुणविशिष्टास्ति मम, ताम्
समानेष्ये; दास्ये, प्रभवसि विजेतुं तत इति ॥

स ज्ञातपूर्वो मणिकन्धराख्यः प्राग्जन्मनीति प्रमदास्य वाचि
विश्वस्य वीणाऽप्रदृशीच सेति सा हस्तगा स्यादिति ह्यहृष्यत् ॥

ततोऽरंस्त तयाऽत्यन्तं कलापूर्णः प्रसन्नया
रतिः प्रणयकोपाद्या परा कोटिगुणाधिका ॥

आकर्ण्य स्वसखीभिर्वृत्तान्तं मधुरलालसाचेमम्
पत्ये च सपत्न्यै च क्रुधिता व्यथिताख्यदात्मानम् ॥

"मह्यं प्रदित्सितां वीणां स्वस्यै दापयते हि सा
पतिप्रेमाभिजग्राह ह्रिया भाव्यममूदृशा" ॥

कनीयसीमेवमवाप्तमानां वामां रतौ सांत्वयतिस्म भूपः
प्रतिश्रुताभ्यां जितराजदारशिरोमणीनिर्मितनूपुराभ्याम् ॥

एवं प्रतिश्रुत्य वधूटिकाभ्यां वीणां तुलाकोटियुगं क्रमेण
तदर्थसिद्ध्यै नहि जैत्रयात्रां विनेतरोपाय इति व्यबुद्ध ॥

स मन्त्रयित्वा सचिवैः क्रियाणां धुरंधरैस्साधकबाधकानि
तैरुक्तरीत्या चतुरङ्गसेनागणैरभीयाय दिशाञ्जयाय ॥

दर्पान्धं गौडराजं, द्विरदबलगणेनोद्धतं चोत्कलेशम्;
धौरेयं बाहुयुद्धेऽपिच शरसमरे केरलानामधीशम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शौर्याब्धिं घूर्जरेन्द्रं, कुरुमगधपती एकवीरा· वजय्यम्
हूणं, चेदीश्वरं चाप्रतिभटपृतनाऽभ्यद्रवद्राजचन्द्रः ॥

निर्जित्य कांश्चिद्विनिहत्य कांश्चिद्राज्ञोऽभियातान् स चतुर्दिशस्थ
तद्दारचूडामणिसञ्चयोपहारान् गृहीत्वा स्वपुरं निवृत्तः ॥

मृगेन्द्रवाहनादेवकुलं गत्वाऽध्वनि क्षितीट्
देवीमभ्यर्च्य पुष्पाद्यैर्वीणां गुप्तां स आहरत् ॥

अभिनवकौमुद्यै दत्त्वात्मीयां वल्लकीमसदृशीं सः
आदिक्षन्मञ्जीरौ कारयितुं सत्त्वदात्मानम् ॥

भुजङ्गप्रयातम्

वधूर्लालसा स्वीयमङ्गं कदाचि
त्परिष्कुर्वती संस्मरन्ती शिशुत्वे
मणीहारमाप्तं प्रियस्योपहारम्
दिधूर्षुर्बभूव प्रियप्रीतिहेतोः ॥

आनाय्य तं नायकरत्नमस्य यथा हृदि स्पृक्परिगुम्फय सूत्रे
पार्श्वद्वये नूत्नमणींश्च दीर्घं कृत्वा विधृत्य प्रियपार्श्वं आस्त ॥

स सत्त्वदात्मा परिगृह्य नूपुरा
वुपेत्य राज्ञा कृतनेत्रसंज्ञकः
समर्प्य तस्यै पुरतो नतोऽब्रवी
"दलङ्कुरोत्वम्ब ! पदांबुजे तव ॥

प्रतिश्रुतं त्वत्पतिना जितारिगृहदा चूडामणिनिर्मितं ते
दातुं तुलाकोटियुगं· तदेतद् गृह्णातु देवी" त्यनमत्पतित्वा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं वीक्ष्य "मा मानम ! मां, त्वमेव
वन्द्यो, ऽथयावन्नहि विद्व आवाम्
त्वं मातुलो मे भवसी"ति तस्मै
ननाम मूर्ध्ना तरुणीमतल्ली ॥

स सत्त्ववदात्मा प्रविकम्पिताङ्ग ईषन्निजांघ्री अपकृष्य पश्चात्
तस्थौ यदा साह तदा "मृषोद्यं नैत, त्विसत्यं भवती"ति नम्रा ॥

वंशस्थम्

हसन् कलापूर्ण उवाच मन्त्रिणम्
यथा "वचोऽस्या अवबुध्यतामृतम्
अमूं भवान् पृच्छतु, वेत्तु संशयम्
निवारयत्वित्यवलोक्य तां वधूम् ॥

"शैशवे ते कृतः प्रश्नः कुलनामादिकं प्रति
अनेन प्रादुरासीत्किं स बोधस्सांप्रतं तव ? ॥

कुतस्त्वं न तथा ब्रूथाः ? कथं वा वक्षि सांप्रतम्
अनुशोचामि नैतत्त्वामपृच्छ "मिति सुन्दरि ! ॥

कथयसि मातुल इति ते कथं त? दस्य कुलनाम्नी के?
कुत एष विस्मृतः स्वं वृत्तान्तं पूर्व? मवगमय! " ॥

इति श्रुत्वा " श्रावयामि संशृणुष्वेति वीजयन्
भर्तारं तालवृन्तेन कथयामास " ऽलसा "॥

" असौ महाराष्ट्रधराधिनाथः पुरा भवत्सुग्रहनामधेयः
रूपानुभूतिर्मम मातृदेवी स्वसास्य, यस्याभिजनोऽनवद्यः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संबन्धमस्याभिलषन्त ईड्यं नैके करं ग्राहयितुं स्वकन्याः
लेखाननेकान् व्यसृजन्नमुष्मै दूता विसृष्टाः कतिभिश्चिदीशैः॥

"कं वा निषिद्ध्यामि ? कमाद्रियेऽह"
मिति व्यनैषीत्स बहून्यहानि
इमामवज्ञामभिशंक्य धात्री
नाथा मिषेणाभियुः कदाचित ॥

शार्दूलविक्रीडितम्
प्राकाराद्बहिरेत्य शात्रवततेः केन प्रयोगेन दो
र्दर्पान्ध्यं प्रविलापयामि तुहिनं चण्डार्यमेवेत्यसौ
आरूढोऽश्वमयाद्विहाय नगरीं, वीरोचितं नेति नि
र्नाथक्ष्माहरणं परापतितभूपाला निवृत्ता अगुः ॥

तथा विनिर्गतं शत्रुबृन्दं सुग्रहभूपतिः
अज्ञात्वा काननं दूरं पलाय्यात्मन्यचिंतयत् ॥

शार्दूलविक्रीडितम्
"निर्यातोऽस्म्यरिपार्थिवैः परिवृतोऽनावेद्य पौरान् जना
नेकाकी, किमभूत्पुरं ? पुरजना आपन् दशां कीदृशीम् ?
किं कुर्वन्त्यरयः पुरे ? कथमिदं ज्ञेयं ? न जानन्ति माम्
गूढं कुत्र च नास्मदीयसुहृदः पौरा अमात्या भटाः ॥

यदि गच्छेयं स्वपुरं निगृहीतः स्यां परैः पराभूतः
अनुचितमिद, मेकान्तस्थितो विजानाति योऽखिलं स कृती ॥

इति तत्सर्वज्ञत्वं सम्पादयितुं दृढं विनिश्चित्य
गत्वा यमुनातीरे पुण्यं बृन्दावनं हरेस्सदनम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ध्यायमानं सदा स्वेन बालकृष्णं शयानकम्
वटपत्रे प्रतिष्ठाप्य हृदि चक्रे तपश्चिरम् ॥

वसंततिलका

न्यग्रोधपत्त्रशयबालमनोज्ञमूर्त्या
पाणिद्वयेन वदनाब्जकृतांघ्रिणा च
लालाभिषिक्तरमणीयमणीसरेण
स्वान्तर्गतस्स भगवान् हरिराविरासीत् ॥

प्रहर्षिणी

प्रत्यक्षः प्रणिगदतिस्म "वांछितं ते
किं ! ब्रूहीत्यवददयं न हर्षमूढः
संबुद्धस्तदुपरि तत्पदे प्रणम्य
साष्टाङ्गं तमचकथन्मुदश्रुनेत्रः ॥

"आनन्दमूढो नहि वेद्मचहं किं वक्तव्यमित्यल भवन्तमीश !
सर्वज्ञभावः स्पृहितो मया तं कृपार्द्रचित्तोऽनुगृहाण ! मह्यम्" ॥

हरिणी

इति निगदितो बालः कृष्णो गलादवमुच्य तम्
मणिसरमदाद् दरुय "यावच्च मध्यगतो मणिः
स्पृशति हृदयं हारस्यास्य प्रभूततरां जनो
वचसि पटुतां; सर्वज्ञत्वं च तावदवाप्नुयात् ॥

विप्रव्यथाकृतां नृणां सन्निधौ नावतिष्ठते
हारोऽयमिति चावेद्य हरिरन्तर्हितोऽभवत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यागच्छन् पुरं स्वीयं मणिहारेण सुग्रहः
वने तस्मिन् सन्ददर्श सुन्दरं सुरमन्दिरम् ॥

शिखरिणी

स्तनाभ्यां पीनाभ्या, मतिकृशितमध्येन, लसता
कपोलाभ्यां मन्दस्मितविलसिताभ्यां च हरता
मनो वक्त्राब्जेन; द्युतितसकलांगेन, रुचिरै
रलङ्कारैर्युक्तां प्रतिकृतिमवैक्षिष्ट युवनेः ॥

पश्यति प्रतिमां तस्मिन् प्रशंसतिच चेतसि
वाचंयमः कोऽपि मार्गवशात्तत्र समागतः ॥

आगत्याध्वश्रमेणायं स्वं काषायेण वीजयन्
हरिनाम स्मरन्नुच्चैर्न्यषीदन् मण्डपेऽन्तिके ॥

शार्दूलविक्रीडितम्

दृष्ट्वा स प्रतिमाममूं, कुशलतां शंसंश्च तच्छिल्पिनः
किं सन्तीदृशयोषितो भुवि ? मया सन्न्यासिना सर्वथा
द्रष्टव्यं नहि रूपमीदृश " मिति व्यावर्त्य वक्त्रं पुनः
पश्यन् किं कथयामि ? मन्मथशरव्याविद्धचित्तोऽभवत्" ॥

इत्युदित्वा शङ्कमानां कथां वक्तुमनन्तराम्
व्याजेनामन्त्र्य तां यातो मन्त्री मधुरलालसाम् ॥

ततोऽवदत्कलापूर्णः "प्रिये ! शिष्टां कथां वद !
करोति कौतुकं चित्तस्ये " ति, साऽचकथद्यथा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसंततिलका

"किं वच्मि ? भूवर ! यतिस्स विवेकहीन
श्शिश्लेष तां प्रतिकृतिं रुचिरां कराभ्याम्
उच्चैर्जहास निकटेन्तरितो महीज
स्कन्धेन सुग्रह उदीक्ष्य तथाविधं तम् ॥

नाराचः

तदनु विदितकामवृत्तिर्यतिस्स्वक्रियां गूहितुम्
प्रतिकृतिशतमेवमालिंग्य साष्टाङ्गपातं नतः
सपदि यतिमुपेत्य तं सुग्रहः प्राह "ते चेष्टितैः
कृतमतिकृतकै" रिति प्राहसद् भूयसा भूयसा ॥

प्रकुप्य तस्मै स यतिश्शशाप "स्मृतिस्तवाद्यावधिका विनश्येत्"
इ, त्यर्थितस्सानुशयेन तेन पादद्वयं स्वस्य नमस्यताह ॥

"यदा प्रकाशतां याति मदीयैषा कथा भुवि
स्मृतिलाभस्तव स्या " दित्युक्त्वाऽगाद्यतिपुङ्गवः ॥

व्यस्मार्षीत्सर्वमयं ज्ञातं शापेन तदवधि यत्
जग्राह नैव हारं गुप्तं देवालये क्वाऽपि ॥

विप्रव्यथाकृतां नृणां नैष तिष्ठति सन्निधौ
ज्ञात्वाऽपि हारितस्तेन यद्ध्रियेत ह्रियेत तत् ॥

परपापोद्घाटनेन पापी स्यादिति कथ्यते
महतां पापमुद्घाट्य न किं याति फलं जनः ॥

स्वीयं चरित्रं कुलनामनीच विस्मृत्य सोन्मत्त इवाट देशान्
सर्वञ्च वस्तु प्रतिभासतेस्म विचित्रभूतं हृदये शिशोर्वा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुमधुरा

संकेते द्रव्यजात्योर्गुणकरणयोस्स्मृत्या विगलिते
शून्ये चित्ते प्रपञ्चव्यवहृतिविदूरोऽभूच्चिरमसौ
काले यातेऽस्य यूनो मनसि तु शिशोर्वा वृद्धजनता
व्याहाराद्द्रव्यजात्योर्गुणकरणयोस्संकेत उदभूत् ॥

कुलनाम्नी विना स्वस्य तद्वेत्तरि जनेऽसति
तस्य चेतस्याविरासीत् ज्ञानं यद्व्यावहारिकम् ॥

एवं बम्भ्रम्यमाणोऽसौ तत्र तत्र कदाचन
भागीरथ्यास्सरय्वाश्च सङ्गमे काननेऽवसत् ॥

मन्दाक्रान्ता

तस्मिन् काले नृपतिरहितं वीक्ष्य कासारराष्ट्रम्
पौरामात्याः करिपतिकरे पुष्पमालां निधाय
देशान् यातास्तमनु, परितोऽटाट्य माल्यं गजोऽन्ते
न्यास्थत्कण्ठे विपिनवसतेस्सुग्रहस्याद्भुतं यत् ॥

सन्दृष्टे सुग्रहे तेषामराजकतया भृशम्
विक्लवानां कोऽपि सत्त्वः समजायत मानसे ॥

उभाभ्यां च निमित्ताभ्यां दृष्ट्वा आरोप्य तं गजम्
पुरमानीय चक्रुस्ते तस्य पट्टाभिषेचनम् ॥

स्वरूपमात्रमेतस्य सत्त्वदायितयात्मनः
सत्त्वदात्माह्वयं चक्रु स्तेऽविज्ञाततदाख्यकाः ॥

अनेन नाम्ना व्यपदिष्ट एष कासारपुर्या अधिपः प्रशासत्
निषेव्य मातापितरौ तदंते बभूव मन्त्री, कथिता कथैषा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमात्यस्सन्नङ्गदेशमाकर्ण्य निरमास्त सः
पुरं क्रमुककण्ठोत्तराख्यमेतद्विनूतनम् ॥

अभिषिक्तोऽभवत्तेन पुरस्यास्य भवानिति
ज्ञातपूर्वं त्वयाप्येतत्कथनं पिष्टपेषणम् ॥

पुरा पृष्टा सत्त्वदात्मनाब्रवं नहि तत्कथाम्
अद्याब्रवं; परा गाथाश्चागदं श्रृणु ! कारणम् ॥

इन्द्रवंशा

देवालये सुग्रह विस्मृतो मणी
हारो यदृच्छागत भूसुपर्वणा
लब्धो गृहे देव इवार्चितश्चिरम्
कृष्णाय देवाय ततस्समर्पितः ॥

हरिर्गृहीत्वा तदुपायनं तं सत्कृत्य रत्नाभरणैर्विसृज्य
हारं ददौ दण्डकरूपवृत्तेनाभिप्लुते स्वं मणिकन्धराय ॥

मंजुभाषिणी

मणिकन्धरेण स गृहीत आत्मनो
गलसीम्नि धारित, उपायनं त्वदः
गलभूषणं भगवत शिशोर्हि; ना
स्पृशदस्य मध्यमणिरस्य हृत्तटम् ॥

सर्वज्ञभावो मणिकन्धरस्य न प्रादुरासीत्तत एव, सोऽदात्
अन्ते मुमूर्षन्नलघुव्रताय, स ते ददौ, त्वं व्यतरशिशोर्मे ॥

उरःस्पृशि मणौ मध्ये बोधः प्रादुरभून्मम
चलितायां मयि स्थानाच्चुच्योताऽतो जडाभवम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य हेतोर्नैव राजन् सत्त्वदात्मकथां तदा
अब्रवं, वेत्ति नैकोऽपि बोधमूलमयं स्मरः ॥

वसंततिलका

साधारणस्सर इति भ्रमतोऽद्य यावद्
गुप्तोऽस्ति; संस्मृतिपथादपि मेऽपयातः
अद्य स्मृतिः प्रिय ! कथंचिदभू, दमुष्य
प्राप्तिं सखीभिरवकर्ण्य धृतोऽभिमानात् ॥

यावद् दृष्टस्सत्त्वदात्मा नूपुराभ्यां सहागतः
तावन्मे गोचरीभूता कथाऽस्यामूलमात्मनि ॥

भूतं भवद्भविष्यज्जगत्करामलकवद्भाति
भ्रियतामधुना भवता हारो दिव्यः परीक्ष्यतामेषः" ॥

मालिनी

नरपतिरवद्"न्मा ! मावमुञ्चस्व ! हारम्
ग्रहणमनुचितं मे ते प्रदत्तस्य पूर्वं;
कथयसि मणिहारस्यास्य दिव्यां महत्ता
मलमलमवमुच्याऽजातपत्त्रायताक्षि !" ॥

उपसृत्य तं हसन्ती "त्वं विदग्धोऽसि भूवर !
इत्याख्यांती समाश्लिष्टा स्पृष्टोद्रक्षा यथा मणिः ॥

अवदच्च "द्रष्टव्यं पश्ये"ति वधू नृपोऽब्रवीत्तरुणि !
इदमेव द्रष्टव्यं ममे" ति गाढं समाश्लिक्षत् ॥

तस्या वक्षोहारस्पर्शेन स्वीयवक्षसो राजा
तत्तद्यत्कथितं तयाञ्जसास्तीत्यवागच्छत ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शालिनी

शापान्मुक्तस्सत्त्वदात्मा स्वचित्ते
स्मृत्या दीप्ते बाल्यदृष्टे समस्ते
एत्यानंसीत्ताावुभौ "प्राज्ञस्मृतिर्मे
भूयः प्राप्ते" त्युन्मनस्को निवेद्य ॥

शिखरिणी

"त्वया संदृष्टं मे कथयसि कुतो नेति सुहृदम्
"रिपोः पक्ष्यो दण्ड्यस्त्व"मिति सचिवं, कोशगृहतः
धनं हर्तुं यत्नः कृत" इति भटान् राजपुरुषान्
महीपालो ज्ञात्वा मणिमहिमतोऽदण्डयदसौ ॥

आश्लेषेषु मणिस्पृष्टवक्षसोरुभयोर्मिथः
ज्ञातप्रेम्णोः कामलीला प्रावृतत्कुलमुद्रुजा ॥

॥ इत्येकादशस्सर्गः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ द्वादशस्सर्गः

एकांते लालसोपेतः कलापूर्णो हृदि स्मरन्
रमामुकुन्दसंवादं रचितं पूर्वजन्मनि ॥

संश्रोतुमिच्छुर्मधुरेण वीणा
मथःकृता कण्ठरवेण तस्याः
आह "प्रिये ! श्रावय ! मां रमाया
हरेश्च संवाद" मिति स्मितास्यः ॥

प्रणम्य साह "प्रिय ! यत्प्रियं ते
तस्यां क्रियायां प्रसितं मनो मे
काव्यं तवाधीय" इति ब्रुवाणा
दृशावुपस्पर्श्य गलस्थहारम् ॥

वंशस्थम्

पतिं कलापूर्ण, मथालघुव्रतम्
सुरर्षिशिष्यं मणिकन्धरं, हरिम्
महीसुरं, सुग्रहभूवरं, ततो
वटस्य पत्रे शयितं च बालकम् ॥

मणिहारागमहेतून् सप्त स्वगुरूनमून् स्मृत्वा
"मम गुरुपरंपरेयं भवेत्प्रसन्ने" त्यवाचयन्नत्वा ॥

"सीम्ना विरजानद्या संसारकथा निरुध्यते यत्र
पङ्कजभवांडबुद्बुदततिप्रकृतिसागरस्य यत्पारम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विना सूर्येन्दुवह्वीनां भासा यत्स्वप्रभोज्ज्वलम्
नित्यमुक्तास्संचरन्ति यत्र सत्त्वशरीरिणः ॥

साक्षात्कृत्य ब्रह्मतत्त्वं यत्रानन्दन्ति कोविदाः
प्रकृतेर्यच्च दोषाणां दुःस्पर्शं भुवनं महत् ॥

अरारण्याह्वयावब्धी यत्रामृतमयौ स्थितौ
सरोमाञ्चा ययोरूर्मिशीतवातैस्तटद्रुमाः ॥

विष्णुलोकस्यास्य सीमा विरजा या तरङ्गिणी
मुक्तिकन्याभक्तपाणिग्रहणे प्रतिसीरिका ॥

वसन्ततिलका

ऐरम्मदीयमिति तद्विरजासमीपे
बाभाति कापि सरसी किल चेटिकेव
शैवालकेश्य, कमलानन, भृङ्गवीक्षा
कोकस्तनी बिसकरा वरमोक्षलक्ष्म्याः ॥

निकषा चकास्ति सरसीं बिल्वतरुस्सांद्रहरितपत्त्रशतैः
निबिडस्थितशुकसंततिरिति यस्सन्दिह्यते * पश्यैः ॥

नाम्ना सामसदनमिति तत्रास्त्यश्वत्थभूरुहः कश्चित्
भाति स्वर्णमयीभि स्तिसृभिश्शाखाभिरीडितः श्रुतिभिः ॥

शार्दूलविक्रीडितम्

छायायामवनीरुहस्य महितस्यास्याप्सरोयोषितः
पाणिभ्यां सुममालिकास्सुरभिलाश्श्रीगन्धभूषाचयम्

---

* "पाघ्राध्माधेट्दृशः शः"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कौशेयान्युपगृह्य मन्दहसितैर्मुक्तान् नरानागतान्
प्रत्युद्गम्य विभूषयन्ति किल तत्कान्ता वयस्या इव ॥

शिखरिणी

क्षिपन्त्यस्स्वापाङ्गैः कुवलयततिं, मन्दहसितैः
निषिंचन्त्यो गन्धोदकमुपरि वक्त्राम्बुजततेः
हरिद्रां लिंपन्त्यस्स्वकररुचिभिस्तद्भुजतटे
वरान् मुक्तिस्त्रीणामिह परिहसन्ति स्वरचलाः ॥

राजधानी विष्णुलोकस्यास्य वैकुण्ठपत्तनम्
श्रुताऽयोध्येत्ययोध्यत्वा दिहामुत्रार्थकर्मणाम् ॥

घट इति पट इति सततं रटतां काणादगौतमीयानाम्
श्रुतिरिति च स्मृतिरिति च प्रजल्पतां जैमिनीयशास्त्रविदाम् ॥

झरिति च खरिति च बहुधा श्रवोविधां पाणिनीयानाम्
मिथ्या जगदित्युच्चैर्घोषयतां शाङ्करीयाणाम् ॥

न कदापि च प्रवेश्यं यथा वैकुंठपत्तनम्
हरे ! कृष्ण ! मुकुन्देत्युच्चरतां महतां नृणाम् ॥

शय्यासनच्छत्ररूपश्शेषः संसेवते हरिम्
तार्क्ष्यश्च भजते भूत्वा ध्वजवाहननामरम् ॥

आयुधैः पञ्चसंख्याकैश्चारपूरुषरूपिभिः
जयशब्दं कीर्तयद्भिर्भगवानुपचर्यते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्दाक्रांता

देव्या लक्ष्म्याः पदकमललाक्षांकिता भूमिभागाः
भूदेव्या दृक्कतिकृतककिंजल्कपुंजा गुलुञ्छाः
नीलातन्व्या नखरुचिगृहीतान्यरूपाः प्रवालाः
वैकुंठेऽस्मिन् पुर उपवनेष्वीक्षणे तर्पयन्ति ॥

वृक्षलताकुंजानां रूपेण च सन्ति राजन्तः
वैकुंठपत्तनस्थेषूद्यानवनेषु नित्यनिर्मुक्ताः ॥

अलिपिकशुकरूपधृतो मुक्तान् वृक्षादिरूपिणो मुक्ताः
सेवन्तेऽतिथिकृत्यैःसमाद्रियन्ते मिथो हि हरिदासाः ॥

रत्नस्तम्भसहस्रेण राजिते तत्र मंटपे
धर्मादिभिः पदैर्युक्ते रत्नसिंहासने स्थिते ॥

पद्मे सहस्रपत्राख्ये भगवान् सेव्यते हरिः
श्रिया भुवा नीलयाच शेषतल्पमधिष्ठितः ॥

जगतां माता लक्ष्मीः कथाप्रसङ्गेन दयमाना
संसृतितप्तानां बत ! मर्त्यानामाह भगवन्तम् ॥

"अवदधतु देवपादा भवतेऽस्मि निवेदयितुकामा"
इत्युक्त्वानुज्ञाता प्रणम्य पादौ ससाचख्यौ ॥

"जगतां स्रष्टा, भर्ता हर्ता च भवान् हि, परमेष्ठी
रुद्रश्चाधिकृतौस्त स्त्वयैव सृष्टिलययोः कृपया ॥

निर्मृष्टपङ्का स्सुकृतान्युपार्ज्य विज्ञाय मोक्षप्रदमीश्वरं त्वाम्
तर्तुं भवाब्धिं किल भक्तकोट्यै वेदांश्च शस्त्राण्यसृजः पुरा त्वम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रुतिशास्त्राध्ययनालसजनान् समुद्धर्तुमवतीर्णः
त्वं रामकृष्णरूपो भूलोकं सत्कृपापूर्णः ॥

हितकृत्येनानेनाप्येकद्वा एव मोक्षमधियन्ति
शिष्टा जीवा स्संसृतिसिन्धुनिमग्ना भवन्त्येव ॥

मायाविलसितमेतत्तव, प्रभवसि त्वमेव सर्वस्य
कर्तुं, मकर्तुं मितरथा कर्तुं चात्रा निवेद्यते किंचित् ॥

दातुं त्वमर्हस्यमृतं समस्तजीवप्रपञ्चस्य विपक्षपातः
कांश्चिद्विमोक्तुं बत! कांश्चिदत्र बन्धुं कुतस्ते भगवन्! विनोदः? ॥

भगवानाकर्ण्य हरिर्हृदि प्रशंसन् मतिं तस्याः
स्मितबालचन्द्रिकालंकृतवदनस्तामभाषिष्ट ॥

"तव देवि! वचनमेतत्समञ्जसं, श्रूयते हि पितुः
स्नेहोऽभ्यधिकोऽपत्ये मातुर्भवतीति लोकोक्तिः ॥

सत्यं यदुक्तं प्रभवामि कर्तुं मकर्तुं; मस्मीतरथा च कर्तुम्
तथापि तत्तज्जनकर्मणोऽहं फलं प्रदेयं गुणदोषबुद्ध्या ॥

तत्तत्कर्मानुसारेण फलदानं सनञ्जसम्
पथ्यापथ्ये अर्हतो हि रुग्णारुग्णौ विविच्यताम् ॥

गुणश्च दोषश्च परीक्ष्यते चेत्समानबुद्ध्याऽधिकृतेन देवि!
स पक्षपातो भवतीति विद्धि वदेत्समदृक्षे गुडगोमये कः? ॥

चरन् विमार्गेण सुतस्स्वपित्रा श्रेयोऽभिलाषैकहृदा यथैव
अवश्यदण्ड्योऽपथसञ्चरिष्णुर्मया च, न स्नेहविलुप्तताल ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न पक्षपातः पितुरात्मजेषु, यद्यात्मजोऽन्धो बधिरश्च मूकः
भवेदयं किं पितृदण्डपातः? करोति किं वा जनकश्च तस्मिन् ॥

तथापि कर्तुं शुभकर्म कोऽपि करोति चेतो यदि तं प्ररोच्य
हस्तावलम्बं प्रददे तरीतुं संसारवार्धिं करुणाप्रपूर्णः ॥

सर्वस्य लोकस्य च मोक्षलब्ध्यै नातिप्रयसेन मदर्चनादिः
लभ्यो यथहं निवसामि नित्यं श्रीरङ्गमुख्येषु महास्थलेषु ॥

ब्रवीषि चेत्त्वं कृपया न शक्यं पंग्वंधरुग्णैः स्थविरैश्च शोच्यैः
त्वत्क्षेत्रयात्राचरणं प्रसीदे" त्याकर्ण्यतां यत्कृतमेतदर्थम् ॥

श्रीरङ्गकांचीपुरवेङ्कटाचलाहोबलादीन्यसृजं धरित्र्याम्
क्षेत्राणि दिव्यान्यघमर्षणान्यध्यासेऽस्मि भक्तोद्धरणाय यानि ॥

मन्नित्यसान्निध्यविशिष्टतत्तत्क्षेत्राणि संसेवितुमप्यशक्तः
मूर्तिं मम ध्यायति चेतसा चेदुत्तारितः स्याद्भवघोरसिंधुम् ॥

आकर्ण्येदं देवी संतुष्टाहसा, "धन्याऽस्मि
पर्याप्तमिदं, स्तुत्यं वात्सल्यं भवत" इत्यनमत् ॥

इति लक्ष्मीनारायणसंवादं विरचितं भवता
भवदाज्ञया पठित्वा धन्यासीत्याह लालसा ललना ॥

प्रियामुखात्कलापूर्णः कदाचिदवकर्णयन्
रमामुकुन्दसंवादं दण्डकं च कदाचन ॥

उपदेशं नारदोक्तं कदापिच कृताः स्तुतीः
पुण्यक्षेत्रस्थदेवानां हृष्टरोमा समुत्सुकः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भक्त्या परमया बद्धो जलजाक्षं समर्चयन्
पितरं सुमुखासक्तिं मणिस्तम्भञ्च मातरम् ॥

प्रत्यक्षदेवतेवासौ सेवमानश्च तत्परः
कौमुदीलालसोपेतश्चिरायाशाद्रुसुन्धराम् ॥

असुवातां तरुण्यौ ते काले याते क्रमात्सुतौ
सुप्रसादाह्वयो ज्यायान् कनीयान् सरसः स्मृतः ॥

॥ इति द्वादशस्सर्गः ॥

॥ समाप्तं काव्यम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुद्धिपत्रम्

पृष्ठम्		असाधुः	साधुः
2		भोक्तं	भोक्तुं
4		पारिजातकः	पारिजातकैः
7		संविधाना	संविदाना
13		तथोक्ता	तदोक्ता
18		शरौ	शौरौ
26		मण्डव्या	माण्डव्या
28		ददन्	वदन्
32		द्रहिण	द्रुहिण
33		द्रतम्	द्रुतम्
42		परिविद्यति	परिविध्यति
49		त्यक्तवार्तो	त्यक्तवार्त
61		इति क्रुधा	इतिक्रुधा
66		हेता	हेतो
67	(द्वितीयश्लोके)	या	यं
77		जसैक	जसैकं
82		बरिंवच्य	परिंवच्य
95		छया	छाया
98		ब्रुवणा	ब्रुवाणा
99		बोभूष्य	संभूष्य
101		सपदा	संपदा
106		युग	युगं
112		तदाली	तदाऽली
118		ततनववयो	तव नववयो
127		तच्छृत्वा	तच्छ्रुत्वा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृष्ठम्	असाधुः	साधुः
131	प्रज्ञाल्ठ	प्रज्ञाल
139	जिह्वापवाचा	चिह्वाग्रवाचा
141	रहस्यकृत्त	रहस्यवृत्त
147	मिष्टः	मिष्टाः
152	ब्रह्मणा।	ब्राह्मणा।
154	सिद्धां	सिद्धिं
162	दघ्य	दध्या
179	असांत्वच्च	असांत्वच्च
190	घिघूर्षु	दिधीर्षु

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आन्ध्र प्रदेश साहित्य-एकाडेमी संस्थया प्रकटितास्संस्कृत ग्रन्थाः

१ शतकसप्तकम्:

(पद्यात्मकं) श्री॰ ति॰ गु॰ वरदाचार्यैः M. A. श्री नारसिंह संस्कृत कलाशाला प्रधानाचार्यैः (चिट्टिगूडूरु) आन्ध्रभाषाया अनूदितम् । (सुमति-शतकम्, भास्कर शतकम्, श्री कालहस्तीश्वर शतकम्, श्री दाशरथि शतकम्, वेमन शतकम्, श्री कृष्ण शतकम्, श्री नारसिंह शतकम्, इति सप्तशतकानि) मूल्यं १-५०

२ आन्ध्रदेश्यहास्यकथाः

(गद्यमय्यः) शिरोमणि बिरुदभाजा सन्निधानोपाह्वेन सूर्यनारायण शास्त्रिणा विरचिताः मूल्यं ०-७५

३ कलापूर्णोदयः

(पद्यात्मकः) आन्ध्र काव्यस्यानुवादः । शिरोमणि बिरुद भाजा सन्निधानोपाह्वेन सूर्यनारायण शास्त्रिणाऽनूदितः । मूल्यं ६-००

प्रकटयिष्यमाणा ग्रन्थाः

१ जाम्बवती परिणयः

(श्रीकृष्णदेवराय कर्तृकं नाटकम्)

२ रामायणसार तिलकम्

(श्रीमत्या मधुरवाण्या रचितम्)

३ शृंगार शेखरभाणः

(श्री वेल्लाल - उमामहेश्वर कर्तृकः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.